नारदजी बोले—शम्भो! आप शान्तचित्त हो, सतीको आप पुन अवश्य प्राप्त करेगे। सती तो आपकी नित्य सहचरी हे। परमेश्वर! उनको आकाशमे जाते देखकर भी क्या आपको विश्वास नहीं हुआ? शम्भो! आप अकाल प्रलय न करे, आप स्थिरचित्त हो जायँ ॥ ९३-९४ ॥

शिवजी बोले—नारद! ऐसा क्यो कहते हो, मैंने तुमलोगोका क्या बिगाडा ह? अथवा मैं कहाँ अकाल प्रलय कर रहा हूँ? मैं तो सतीके विरहसे दु खार्त हुआ उसके छायाशरीरको ही पाकर किसी प्रकार दु खको भुला रहा था, किसी निर्दयीने मेरे सिरसे उस देहका भी अपहरण कर लिया है ॥ ९५-९६½ ॥

नारदजी बोले—देव! आप शान्तचित्त हो, मैं आपको सब बताता हूँ। महादेव! आप हमपर प्रसन्न हो और अपना यह प्रलयकारी नृत्य बद करे। आपके इस नृत्यसे पीडित हुई पृथ्वी भी डूब रही हे, सभी पर्वत चलायमान हो गये हैं और देवगण स्वर्ग छोडकर चले गये हैं। देव-असुर तथा मानवोकी यह सारी सृष्टि नष्ट हो रही है ॥ ९७—९९ ॥

त्वया तु स्वकृतश्चासो प्रलयो नैव दृश्यते।
कथ नृत्यच्छलेनेद विश्व नाशयसि प्रभो॥ १००॥

किमीदृश कर्मसु यत्स्वकीयार्थ विनाशयेत्।
त्रैलोक्यरक्षको विष्णुर्दृष्ट्वा विपदमद्भुताम्॥ १०१॥

त्वा सान्त्वयितुकामोऽसौ धृत्वा चक्र सुदर्शनम्।
प्रक्षिप्य शनकैश्छायासतीदेह समाच्छिनत्॥ १०२॥

स देह खण्डशो भूमौ यत्र यत्र समापतत्।
महापीठास्तत्र जाता कामरूपादय प्रभो॥ १०३॥

उक्त तया जगद्धात्र्या समाराधितया त्वया।
पूर्वमेव हि देहोऽय पतिष्यति धरातले॥ १०४॥

खण्डशो बहुधा भूत्वा महापीठप्रसिद्धये।
तस्माद्विष्णुस्तथा चक्रे भव शान्त सदाशिव॥ १०५॥

श्रीमहादेव उवाच

एवमुक्तस्तु मुनिना त्यक्तनृत्य सदाशिव।
विनि श्वसन्मुहुर्विष्णु शशाप कमलापतिम्॥ १०६॥

विष्णुर्मानुपरूपेण जनिष्यति महीतले।
त्रेताया सूर्यवशेऽसौ मम शापेन निश्चितम्॥ १०७॥

तत्रातिरम्या तत्पत्नी सतीव प्राणवल्लभा।
छाया सस्थाप्य सत्यक्त्वा माययान्तर्हिता स्वयम्॥ १०८॥

भविष्यति ततश्चासौ मायया विप्रमोहित।
आनन्दमग्नचित्तश्च भूत्वा यास्यति दूरत॥ १०९॥

ततो यथा मा चक्रेऽसौ छायापत्नीवियोगिनम्।
क्रूरराक्षसवद्विष्णुस्तथा राक्षसपुङ्गव॥ ११०॥

एन करिष्यति क्रूरश्छायापत्नीवियागिनम्।
हत्वा छायामयीं पत्नीं सत्य सत्य महामुने॥ १११॥

शोकसतप्तहृदय स यथाह भविष्यति।

श्रीमहादेव उवाच

एव शप्त्वा शिवो विष्णु स्वस्थचित्तोऽभवत्तत।
प्रसार्य त्रीणि नेत्राणि ददर्श च जगत्त्रयम्॥ ११२॥

आपको अपने द्वारा उपस्थित यह प्रलय दिखायी नहीं दे रहा हे? प्रभो! इस ताण्डवनृत्यके बहाने आप सृष्टिका नाश करनेको क्यो उद्यत हैं? जो अपने लक्ष्यका ही विनाश कर दे, ऐसे कर्मका क्या प्रयोजन? त्रैलोक्यके पालनकर्ता भगवान् विष्णुने इस अद्भुत विपत्तिको देखकर आपको सान्त्वना देनेके लिये ही सुदर्शन चक्र धारण करके उससे सतीके छायाशरीरको धीरे-धीरे काटा॥ १००—१०२॥ प्रभो! उस देहके खण्ड पृथ्वीतलपर जहाँ-जहाँ गिरे, उन-उन स्थानोंपर कामरूपादि महाशक्तिपीठ अवतरित हो गये हैं॥ १०३॥ आपने जब जगज्जननीकी आराधना की थी, तब उन्होने पहले ही यह बात कही थी कि मेरा यह शरीर पृथ्वीतलपर अनेक खण्डामें गिरेगा, जहाँ मेरे प्रसिद्ध महापीठ उदित होगे। इसीलिये भगवान् विष्णुने ऐसा किया। सदाशिव! आप शान्त हो॥ १०४-१०५॥

श्रीमहादेवजी बोले—नारदके ऐसा कहनेपर भगवान् सदाशिवने नृत्यको त्यागकर बार-बार नि श्वास छोडते हुए कमलापति विष्णुको शाप दे दिया॥ १०६॥ मेरे शापके कारण निश्चय ही विष्णुको धरतीपर मनुष्यका रूप धारण करके त्रेतायुगमे सूर्यवशमे जन्म लेना पडेगा। वहाँ उनकी मनोहारिणी प्राणप्रिया पत्नी सतीके समान अपनी छायाको छोडकर मायासे स्वय अन्तर्धान हो जायँगी॥ १०७-१०८॥ तब मायासे मोहित हुए वे आनन्दमग्न होकर दूर चले जायँगे। जिस तरह क्रूर राक्षसकी भाँति विष्णुने मुझे छायापत्नीका वियोगी बना दिया है, वैसे ही राक्षसराज कठोरतापूर्वक विष्णुकी छायापत्नीका हरण करके उन्हें वियोगी बनायेगा। महामुने! यह मेरा सत्य वचन हे। विष्णु मेरी ही भाँति अवश्य ही शोकसे व्याकुलचित्त हागे*॥ १०९—१११½॥

श्रीमहादेवजी बोले—इस प्रकार विष्णुको शाप देकर शिवजी स्वस्थचित्त हो गय और अपने तीनों नेत्राको फैलाकर उन्हाने त्रिलोकीको दखा॥ ११२॥

* यहाँ पत्नीके वियोगमें भगवान् शिवका शोकसतप्त होना तथा भगवान् विष्णुको शोकसतप्त हानेका शाप देना—यह लोकशिक्षणके लिये लीलामात्र है। तत्वत शिव और विष्णुमें कोई अन्तर नहीं हैं। दोनों ही काम क्रोध शोक मोहादि प्रवृत्तियोसे नितान्त परे हैं।

दृष्ट्वा योनि कामरूपे रोमाञ्चितकलेवर ।
कामव्याकुलितोत्कण्ठो बभूव गिरिश स्वयम्॥ ११३॥

दृष्टमात्रे तु सा योनि काममुग्धेन शम्भुना।
पृथ्वीं विभिद्य पाताल गच्छन्तीव बभूव ह॥ ११४॥

दृष्ट्वैव शकर सत्या भूत्वांशेन गिरि स्वयम्।
दधार योनि हृष्टात्मा वर्णयन् भाग्यमात्मन ॥ ११५॥

सर्वेषु तेषु पीठेषु कामरूपादिषु स्वयम्।
पाषाणलिङ्गरूपेण ह्यधिष्ठाय व्यसेवत॥ ११६॥

सस्मार पूर्वं तद्वृत्त यदुक्त हि तया मुने।
योनिपीठे तपस्तप्त्वा पुनर्लब्ध्वा महेश्वरीम्॥ ११७॥

तत शान्तमना भूत्वा योगचिन्तापरोऽभवत्।
विहायसा मुनिश्चापि ययौ स्वस्थानमुत्तमम्॥ ११८॥

कामरूपदेशमे सतीके छायाशरीरका योनिभाग गिरा देखकर शिवजी कामसे व्याकुल एव उत्कण्ठित हो गये और उन्हे रोमाञ्च हो आया। कामभावसे शिवजीके द्वारा देखे जानेपर शरीरका योनिभाग पृथ्वीतलको भेदता हुआ पातालकी ओर चल पडा। ऐसा देखकर शकरजीने अपने अशसे पर्वतका रूप धारण करके अपने भाग्यको सराहते हुए प्रसन्नतापूर्वक सतीकी उस योनिको धारण कर लिया॥ ११३—११५॥ कामरूपादि सभी शक्तिपीठोमे भगवान् सदाशिव पाषाणलिङ्गके रूपमे स्वय उपस्थित होकर उससे सम्बद्ध हो गये॥ ११६॥

मुने! जगदम्बाके बताये हुए उस पूर्व वृत्तान्तको उन्होने याद किया और उस गुह्यपीठ कामरूपमे तपस्या करके महेश्वरीको पुन प्राप्त किया। तत्पश्चात् शान्तचित्त होकर वे योगारूढ हो गये। नारद मुनि भी आकाशमार्गसे अपने लोकको चले गये॥ ११७-११८॥

॥ इति श्रीमहाभागवते महापुराणे महादेवनारदसवादे छायासतीवर्णन नामैकादशोऽध्याय ॥ ११ ॥

॥ इस प्रकार महाभागवतमहापुराणके अन्तर्गत महादेव-नारद-सवादमे 'छायासतीवर्णन' नामक ग्यारहवाँ अध्याय पूर्ण हुआ॥ ११ ॥

बारहवाँ अध्याय

शकरजीका योनिपीठ कामरूप (कामाख्या)-मे जाकर तपस्या करना, जगदम्बाद्वारा प्रकट होकर शीघ्र ही गङ्गा तथा हिमालयपुत्री पार्वतीके रूपमे आविर्भूत होनेका उन्हे वर प्रदान करना, भगवान् शकरद्वारा इक्यावन शक्तिपीठोमे प्रधान कामरूपपीठके माहात्म्यका प्रतिपादन

श्रीमहादेव उवाच

गत्वा तु नारद श्रीमान् विष्णो सन्निकट तत ।
अथाब्रवीद्यथावृत्त देवदेवस्य चेष्टितम्॥ १॥

अभिशापादिक श्रुत्वा शिवस्याकुलित तथा।
ब्रह्मणा सहितो विष्णु कामरूप समभ्यगात्॥ २॥

द्रष्टु देव महेशान शोकव्याकुलमानसम्।
अश्रुधाराभिससिक्तगात्र सान्त्वयितु तथा॥ ३॥

तौ दृष्ट्वा भगवान् शम्भुर्मुक्तकण्ठो रुरोद ह।
पत्नीमाक्षिप्य बहुधा सतीं प्राकृतलोकवत्॥ ४॥

श्रीमहादेवजी बोले—तब नारदजीने विष्णुभगवान्के पास जाकर घटित घटनाओ और देवाधिदेवके सारे व्यवहारका यथावत् वर्णन किया॥ १॥ शिवजीके व्याकुलचित्त होकर शापित करनेकी बात सुनकर ब्रह्मासहित भगवान् विष्णु कामरूपप्रदेशमे गये॥ २॥ वे वहाँ शोकसे व्याकुलचित्त हुए भगवान् महेशको, जिनका सारा शरीर आँसुओसे भीग-सा गया था, देखने और सान्त्वना देने गये थे। उन दोनोको आया देखकर भगवान् शिव अपनी पत्नी सतीको अनेक प्रकारसे याद करते हुए सामान्य जनकी तरह मुक्तकण्ठसे रुदन करने लगे॥ ३-४॥

ब्रह्मविष्णू ऊचतु

किमेव देवदेवेश मृषा रोदिषि शङ्कर।
विद्यमानामपि सतीं दृष्ट्वा ज्ञात्वापि मूढवत्॥ ५ ॥

शिव उवाच

सत्य वदसि जानामि सतीं प्रकृतिरूपिणीम्।
नित्या ब्रह्ममयीं शुद्धा सृष्टिस्थित्यन्तकारिणीम्॥ ६ ॥

दृष्ट्वा स्वचक्षुषा दक्षयज्ञभङ्गोत्तर मया।
तथैव ता न दृष्ट्वैव पत्नीभावेन पूर्ववत्॥ ७ ॥

स्वगृहे मे मनोऽतीव व्याकुल जायतेऽधुना।
कथ पुनर्लभिष्यामि पूर्ववत्ता महेश्वरीम्॥ ८ ॥

उपाय ब्रूहि मे ब्रह्मन् विष्णो त्व चापि साम्प्रतम्।

ब्रह्मविष्णू ऊचतु

भूत्वा शान्तमना देव कामरूपेऽत्र सस्थित ॥ ९ ॥

तामेव मनसि ध्यात्वा तपश्चर समाहित ।
महापीठोऽयमत्रैव साक्षात्सा परमेश्वरी॥ १०॥

प्रत्यक्षफलदा देवी साधकाना न सशय ।
माहात्म्यमस्य पीठस्य वक्तु वा केन शक्यते॥ ११॥

त्वमेव सर्वं जानासि सर्वज्ञ परमेश्वर ।
किमावा कथयिष्यावो भव शान्तमना शिव॥ १२॥

शिव उवाच

अत्रैवाह तपश्चोग्र चरिष्ये सुसमाहित ।
तथापि कथितोऽप्येव युवाभ्यामपि चाधुना॥ १३॥

श्रीमहादेव उवाच

इत्युक्त्वा स शिव शान्तस्तपस्तेपे समाहित ।
कामरूपे महापीठे ध्यायस्ता परमेश्वरीम्॥ १४॥

ब्रह्मा विष्णुश्च तत्रैव महापीठे तत स्थित ।
समाहितमनास्तीव्र चचार परम तप ॥ १५॥

बहुकाले गते देवी प्रसन्ना जगदम्बिका।
प्रत्यक्षाभूज्जगन्माता तेषा त्रैलोक्यमोहिनी॥ १६॥

प्रोवाच च महादेवी कि तेऽभिलषित वद।

शिव उवाच

यथा हि कृपया पूर्वं स्थिता मद्गेहिनी स्वयम्॥ १७॥
तथैव हि पुनश्चापि भव त्व कृपयेश्वरि।

ब्रह्मा और विष्णु बोले—देवदेवेश शङ्कर! आप इस प्रकार व्यर्थ ही क्यो रो रहे हैं? आप जानते हैं कि सती विद्यमान हैं, अत सारी बात जाननेवाले आपका मूढवत् शोक करना उचित नहीं है॥ ५॥

शिवजी बोले—आपलोग ठीक कहते हैं। मैं जानता हूँ कि सती प्रकृतिरूपा हैं, व शुद्धा, नित्या, ब्रह्ममयी और सृष्टि, स्थिति तथा सहार करनेवाली हैं॥ ६॥ दक्षयज्ञके नष्ट होनेके बाद मैंने उन्हे अपनी आँखोसे उसी रूपमे देखा भी है, लेकिन पहलेकी तरह पत्नीभावसे अपने घरमे उन महेश्वरीको न पाकर इस समय मेरा मन अत्यन्त व्याकुल हो रहा है। इसलिये ब्रह्मन् विष्णो! मैं पूर्ववत् उन्हे कैसे प्राप्त करूँगा? आप मुझे अब इसका उपाय बताये॥ ७-८½॥

ब्रह्मा और विष्णु बोले—देव! आप शान्तचित्त होकर इस कामरूपपीठमे रहकर मनमे महादेवीका ध्यान करते हुए समाहितचित्तसे तपस्या करें। यह महापीठ है, यहाँ ही परमेश्वरी साक्षात् विराजमान होकर अपने साधकोंको प्रत्यक्ष फल प्रदान करती हैं। इसमे सशय नहीं है। इस सिद्धपीठका माहात्म्य कौन बता सकता है! आप तो परमेश्वर हैं, सर्वज्ञ हैं, सब कुछ जानते हैं, हमलोग आपको क्या बताये? शिव! अब आप शान्तचित्त हो जायँ॥ ९—१२॥

शिवजी बोले—मैं अब यहीं रहकर स्थिरचित्त हो उग्र तपस्या करूँगा, जैसा कि आप दोनोंने अभी कहा है॥ १३॥

श्रीमहादेवजी बोले—इतना कहकर शिवजीने कामरूप सिद्धपीठपर उन परमेश्वरी जगदम्बाका ध्यान करते हुए शान्त एव समाहितचित्त होकर तप किया। ब्रह्मा और विष्णु भी उसी महापीठपर रहते हुए समाहितचित्त होकर कठोर और परम तप करने लगे॥ १४-१५॥ बहुत समय बीतनेपर जगदम्बा प्रसन्न हुईं और उन जगन्माताने त्रैलोक्यमोहिनीरूपमे उन्हे प्रत्यक्ष दर्शन दिया। महादेवीने पूछा कि आपकी क्या अभिलाषा है, बताये॥ १६½॥

शिवजी बोले—परमेश्वरी! जिस प्रकार आप पहले मेरी गृहिणी बनकर रहती थीं, वैसे ही कृपापूर्वक पुन रह॥ १७½॥

श्रीदेव्युवाच

अतस्त्वहमचिरेणैव हिमालयसुता स्वयम्॥ १८॥
द्विधा भूत्वा भविष्यामि सत्यमेव महेश्वर।
यतस्तां शिरसा हर्षात्कृत्वा मन्नृत्यतत्पर ॥ १९॥
अहं तेनांशतो भूत्वा गङ्गा जलमयी स्वयम्।
त्वामेव पतिमापन्ना भविष्ये तव मूर्धनि॥ २०॥
अपरा पार्वती भूत्वा पत्नीभावेन शंकर।
स्थास्यामि तव गेहेऽहं पूर्णैव हि महामते॥ २१॥

देवीजी बोलीं—महेश्वर! शीघ्र ही मैं हिमालयकी पुत्री बनकर स्वयं अवतार लूँगी और निश्चय ही मैं दो रूपोंमें सामने आऊँगी। चूँकि आपने सतीके शरीरको सिरपर उठाकर हर्षपूर्वक नृत्य किया था, अतः मैं उनके अंशसे जलमयी गङ्गाका रूप धारण करके आपको ही पतिरूपमें प्राप्त कर आपके सिरपर विराजमान रहूँगी। दूसरे रूपसे मैं पार्वती होकर आपके घरमें पत्नीभावसे रहूँगी। शंकर! महामति! मेरा यह रूप पूर्णावतार होगा॥ १८-२१॥

श्रीमहादेव उवाच

ततो भगवती देवी यत्राभिलषितं वरम्।
ब्रह्मणे विष्णवे दत्त्वा स्वयमन्तर्हिताभवत्॥ २२॥
ततः सापि महादेवी द्विधा भूत्वा हिमालयम्।
प्रययौ मेनकागर्भे स्वयं दुर्गाभवत्ततः ॥ २३॥
ज्येष्ठा गङ्गाभवद्देवी कनिष्ठा पार्वती शुभा।
शिवस्तु हृष्टचित्तः सन् कामरूपे महामतिः ॥ २४॥
कामाख्यानिकटे भूयश्चचार परमं तपः ।
महापीठस्य माहात्म्याद्देवी भगवती स्वयम्॥ २५॥
महेशाय प्रसन्नाभूदभीष्टं च ददौ तथा।
एवमन्यो यदा कश्चित्तस्मिन् पीठे महेश्वरीम्॥ २६॥
समाराधयते तस्य मनोऽभीष्टं प्रयच्छति।

श्रीमहादेवजी बोले—तब ब्रह्मा और विष्णुको भी उनका अभिलषित वर प्रदान करके भगवती जगदम्बा स्वयं अन्तर्धान हो गयीं॥ २२॥ इसके अनन्तर महादेवी दुर्गाने हिमालयके यहाँ मेनकाके गर्भमें दो रूपोंमें अवतार लिया। भगवतीने ज्येष्ठा-रूपसे गङ्गा और कनिष्ठा-रूपसे शुभ लक्षणोंवाली पार्वती बनकर जन्म लिया। महामति शिव भी प्रसन्नचित्त होकर कामरूप पर्वतपर कामाख्यापीठके निकट पुनः कठोर तपस्या करने लगे। उस महापीठके माहात्म्यसे भगवतीने स्वयं प्रसन्न होकर शिवको अभीष्ट वर प्रदान किया। इसी प्रकार जब भी अन्य कोई उस सिद्धपीठमें भगवतीकी आराधना करता है तो उसे वे देवी मनोवाञ्छित फल प्रदान करती हैं॥ २३—२६½॥

श्रीनारद उवाच

कामरूपस्य माहात्म्यं कथयस्व महेश्वर॥ २७॥
यत्र साक्षाद्भगवती प्रत्यक्षफलदायिनी।
आनुपूर्व्येषु पीठेषु श्रेष्ठं यत्परमेश्वर॥ २८॥
यतस्त्वयापि तत्रैव तपसाराधितेश्वरी।

श्रीनारदजी बोले—महेश्वर! मुझे कामरूपका माहात्म्य बताये, जहाँ साक्षात् प्रकट होकर भगवती प्रत्यक्ष फल देती हैं। परमेश्वर! चूँकि सभी पीठोंकी क्रमिक गणनामें वह श्रेष्ठ पीठ है इसीलिये आपने भी वहीं तपस्या करके जगदम्बाकी आराधना की थी॥ २७-२८½॥

श्रीमहादेव उवाच

पीठानि चैकपञ्चाशदभवन्मुनिपुङ्गव॥ २९॥
अङ्गप्रत्यङ्गपातेन छायासत्या महीतले।
तेषु श्रेष्ठतमं पीठं कामरूपो महामते॥ ३०॥
यत्र साक्षाद्भगवती स्वयमेव व्यवस्थिता।
तत्र गत्वा महापीठे स्नात्वा लौहित्यवारिणि॥ ३१॥
ब्रह्महापि नरः सद्यो मुच्यते भवबन्धनात्।
ब्रह्मपुत्रः स्वयं साक्षाद्द्रवरूपी जनार्दनः ॥ ३२॥
तस्मिन्नेव कृतस्नानो मुच्यते सर्वपातकात्।

श्रीमहादेवजी बोले—मुनिश्रेष्ठ! धरातलपर छाया सतीके अङ्ग-प्रत्यङ्ग गिरनेसे इक्यावन शक्तिपीठ बन गये। महामते! उनमें कामरूप श्रेष्ठतम शक्तिपीठ है॥ २९-३०॥ जहाँ भगवती साक्षात् निवास करती हैं, उस सिद्धपीठमें जाकर ब्रह्मपुत्र नदके लालिमा लिये जलमें स्नान करके मनुष्य ब्रह्महत्याके पापसे भी सद्यः संसार-बन्धनसे मुक्त हो जाता है। ब्रह्मपुत्र नद भगवान् विष्णुका साक्षात् जलरूप है उसमें स्नान करके मनुष्य सभी पापोंसे मुक्त हो जाता है॥ ३१-३२½॥

तत्र स्नात्वा विधानेन पितॄन् संतर्प्य भक्तितः ॥ ३३ ॥

कामेश्वरीं नमस्कुर्यान्मन्त्रेणानेन साधकः ।
कामेश्वरीं च कामाख्यां कामरूपनिवासिनीम् ॥ ३४ ॥

तप्तकाञ्चनसङ्काशां तां नमामि सुरेश्वरीम् ।
ततो मानसकुण्डादितीर्थे गत्वा विधानतः ॥ ३५ ॥

कृत्वा स्नानादिकं क्षेत्रं प्रविश्य च यथाविधि ।
दृष्ट्वा पीठं नरः सद्यो मुक्तो भवति नान्यथा ॥ ३६ ॥

तत्र तन्त्रोक्तविधिना सम्पूज्य परमेश्वरीम् ।
जपहोमादिकं कृत्वा यादृशं फलमश्नुते ॥ ३७ ॥

तद्वक्तुं नैव शक्नोमि कोटिभिर्वक्त्रकैरपि ।
यस्य सञ्जायते मृत्युस्तस्मिन् क्षेत्रे महामुने ॥ ३८ ॥

स मुक्तिमेति सद्यो वै सत्यं सत्यं न संशयः ।
किमत्र बहुनोक्तेन यत्र क्षेत्रे महामुने ॥ ३९ ॥

देवा मरणमिच्छन्ति किं पुनर्मानवादयः ।
इति ते कथितं वत्स संक्षेपेण महामुने ॥ ४० ॥

कामरूपस्य माहात्म्यं सर्वपापप्रणाशनम् ।
तस्मिन् क्षेत्रे शिवः स्तुत्वा महेशीं तपसि स्थितः ॥ ४१ ॥

सती हिमवतो गेहे द्विधा भूत्वा समभ्यगात् ।
एवं दक्षगृहे जाता स्वयं प्रकृतिरुत्तमा ॥ ४२ ॥

संस्थाप्य परमां कीर्तिं लोकानां त्राणहेतवे ।
जगाम मेनकागर्भं पुनर्लब्धुं महेश्वरम् ॥ ४३ ॥

य इदं चरितं देव्या महापातकनाशनम् ।
शृणोति परया भक्त्या स शिवत्वमवाप्नुयात् ॥ ४४ ॥

देवा मनुष्या गन्धर्वा यक्षराक्षसचारणाः ।
तस्याज्ञावशगाः सर्वे भवन्तीह न संशयः ॥ ४५ ॥

अव्याहताज्ञः सर्वत्र भवेत्तच्छ्रवणान्नरः ।
भवत्यवश्यं दुर्गं च सुदुष्करमपि क्षणात् ॥ ४६ ॥

वहाँ विधिपूर्वक स्नान एवं पितरोंका तर्पण करके साधकको भक्तिपूर्वक भगवती कामेश्वरीको इस मन्त्रसे नमस्कार करना चाहिये—'मैं कामरूपमें निवास करनेवाली उन भगवती कामाख्या कामेश्वरीको नमस्कार करता हूँ, जिन सुरेश्वरीका स्वरूप तपे हुए स्वर्णकी कान्तिके समान सुशोभित है।' तत्पश्चात् मानस-कुण्डादि तीर्थोंमें जाकर विधिपूर्वक स्नान करके यथाविधि कामरूपक्षेत्रमें प्रवेश करना चाहिये। सिद्धपीठ कामाख्याके दर्शन करके मनुष्य सद्यः मुक्तिको प्राप्त कर लेता है, अन्य कोई उपाय नहीं है॥ ३३—३६ ॥ वहाँ तन्त्रोक्त विधिसे परमेश्वरीका पूजन करके जप-होमादि करनेसे जैसा फल प्राप्त होता है, करोड़ों मुखोंसे भी मैं उसका वर्णन करनेमें समर्थ नहीं हूँ॥ ३७½॥ महामुने! उस पवित्र क्षेत्रमें जिसकी मृत्यु हो जाती है, उसे सद्यः मुक्ति निश्चित ही प्राप्त हो जाती है, इसमें कोई संशय नहीं है। महामुने! अधिक क्या कहूँ, मनुष्योंकी तो बात छोड़िये, देवता भी उस पुण्यक्षेत्रमें मृत्युकी कामना करते हैं। वत्स! मैंने आपको संक्षेपमें कामरूपक्षेत्रका माहात्म्य बताया, जो सभी पापोंका नाश करनेवाला है॥ ३८—४०½॥ उस पवित्र क्षेत्रमें महादेवीकी स्तुति करके भगवान् शिव तपस्या करने लगे। सतीने हिमवान्‌के घरमें दो रूपोंमें जन्म लिया। इस प्रकार जिन परा प्रकृति भगवतीने दक्षके घरमें जन्म लिया था, उन्होंने परमकीर्ति स्थापित करके लोकरक्षणके लिये भगवान् महेश्वरको पुनः प्राप्त करनेहेतु मेनाके गर्भमें प्रवेश किया॥ ४१—४३ ॥ महापातकोंका नाश करनेवाले जगदम्बाके इस चरित्रका जो परम भक्तिपूर्वक श्रवण करता है, वह शिवत्वको प्राप्त करता है॥ ४४ ॥ सभी देवता, मनुष्य, गन्धर्व, यक्ष, राक्षस और चारणादि उस पुण्यात्मा मनुष्यके इसी जन्ममें आज्ञाके वशवर्ती हो जाते हैं, इसमें संदेह नहीं। इस पुण्य-चरित्रका श्रवण करनेवाले मनुष्यकी आज्ञाका उल्लंघन करनेमें कहीं कोई समर्थ नहीं होता। उसके दुर्गम और अति दुष्कर कार्य भी क्षणमात्रमें ही अवश्य सिद्ध हो जाते हैं॥ ४५-४६ ॥

श्रवणान्नाशमायाति पाप जन्मान्तरार्जितम्।
रिपव सक्षय यान्ति वशवृद्धि प्रजायते॥ ४७॥

इस पुण्य चरित्रके श्रवणसे जन्म-जन्मार्जित पाप नष्ट हो जाते हैं, शत्रुओका नाश होता हे ओर वशकी वृद्धि होती है॥ ४७॥

ससारे जन्म चासाद्य नैतदाकलित हि यै ।
तेषा जन्म वृथा मर्त्ये सत्यमेव महामते॥ ४८॥

श्रुत्वेद चरित देव्या ससारव्याधिभेषजम्।
जीवन्मुक्तो भवेत्सद्यो यदि स्यादतिपातकी॥ ४९॥

महामते! सत्य तो यह है कि जिन्होने ससारमे जन्म लेकर इस पुण्यचरित्रका श्रवण नहीं किया, उनका इस मृत्युलोकम जन्म लेना ही व्यर्थ है। ससाररूपी रोगके परमोषधरूप देवीके इस पवित्र आख्यानको सुनकर महान् पातकी मनुष्य भी सद्य जीवन्मुक्त हो जाता है॥ ४८-४९॥

॥ इति श्रीमहाभागवते महापुराणे श्रीमहादेवनारदसवादे कामरूपादिमाहात्म्यवर्णन नाम द्वादशोऽध्याय ॥ १२॥

॥ इस प्रकार श्रीमहाभागवतमहापुराणके अन्तर्गत श्रीमहादेव-नारद-सवादमे 'कामरूपादिमाहात्म्यवर्णन' नामक बारहवाँ अध्याय पूर्ण हुआ॥ १२॥

तेरहवाँ अध्याय

मेनकाके गर्भके अर्धांशसे गङ्गाके प्राकट्यका आख्यान, देवर्षि नारदद्वारा हिमालयको गङ्गाका माहात्म्य सुनाना, ब्रह्मादि देवताओद्वारा हिमालयसे भगवती गङ्गाको ब्रह्मलोक ले जानेकी याचना करना

श्रीमहादेव उवाच

शृणु वत्स प्रवक्ष्यामि द्विधा भूत्वा स्वय सती।
यथाऽभवन्मेनकाया गर्भे हिमवत सुता॥ १॥

तत्रादौ समभूद्गङ्गा निजाशेन सितप्रभा।
स्थातु शिरसि शम्भो सा भूत्वा द्रवमयी मुने॥ २॥

तत्पश्चात्समभूद्गौरी पूर्णा शकरगेहिनी।
सा हि यत्प्रेमभावेन शरीरार्धं महेशितु ॥ ३॥

श्रीमहादेवजी बोले—वत्स! मे वह कथा सुना रहा हूँ, जिस प्रकार सतीने दो रूप धारण कर मेनाके गर्भसे हिमवान्के घर पुत्रीरूपमे जन्म लिया॥ १॥ मुने! पहले वे अपने अशसे धवल कान्तियुक्त गङ्गाके रूपमे प्रकट हुईं। भगवान् शकरके सिरपर स्थान पानेके लिये उन्होने जलरूप धारण किया। उसके बाद गौरीके रूपमे वे शकरप्रिया पूर्णावतार धारणकर अतिशय प्रेमके कारण शिवके शरीरार्धमे स्थित होकर उनकी अर्धाङ्गिनी बनीं॥ २-३॥

तत्राभूत्सा यथा गङ्गा तच्छृणुष्व महामते।
यच्छ्रुत्वा मुच्यते पापी ब्रह्महापि नर क्षणात्॥ ४॥

महामते! वे गङ्गारूपमे कैसे प्रकट हुईं, उस प्रकरणको सुनो, जिसका श्रवण करनेसे ब्रह्म-हत्याके पापसे लिप्त मनुष्य भी तत्क्षण मुक्त हो जाता है॥ ४॥

सुमेरुतनया मेना गिरिराजस्य गेहिनी।
ता जन्मनि सुता प्राप निजाशेन महेश्वरी॥ ५॥

सुमेरुकी पुत्री मेना गिरिराज हिमवान्की पत्नी थीं। जगदम्बाने अपने अशरूपसे उनके यहाँ पुत्रीरूपमे जन्म लिया॥ ५॥

गङ्गा समभवद्गर्भे सती गिरिवराङ्गना।
सुषुवे च सुता चारुसर्वाङ्गीं रुचिराननाम्॥ ६॥

सती गङ्गारूपसे मेनाके गर्भमे आयीं और गिरिश्रेष्ठ हिमवान्की पत्नीने एक सुमुखी सर्वाङ्गसुन्दरी कन्याको जन्म दिया॥ ६॥

वैशाखे मासि शुक्लाया तृतीयाया दिनार्धके।
गङ्गा समभवच्छुक्ला सुचारुमुखपङ्कजा॥ ७॥

वैशाखमासके शुक्लपक्षकी तृतीया (अक्षयतृतीया)-के दिन मध्याह्नमे गौरवणा सुन्दर मुखकमलवाली गङ्गा प्रकट हुईं॥ ७॥

त्रिनेत्रा असितापाङ्गी चतुर्बाहुविशोभिता।
अथाद्रिराज श्रुत्वा तु पुत्रीं जाता समुत्सुक ॥ ८ ॥

मङ्गल चाकरोद्दान विप्रेभ्य प्रददौ बहु।
ववृधे सा पितुर्गेहे कलेव शशिन सिते॥ ९ ॥

वर्षासु च यथा नित्य नदी तोयेन वर्धते।
अथैकदा गिरीन्द्रस्ता क्रोडे कृत्वा पुरान्तरे॥ १० ॥

उपविष्टस्तदायातो नारदो ब्रह्मण सुत ।
गङ्गा द्रष्टु भगवतीं ज्ञात्वा जाता निजाशत ॥ ११ ॥

प्रकृति या समाराध्य कामरूपे स्थितो हर ।
गिरिराजस्तमालोक्य प्रणम्य चरणद्वयम्॥ १२ ॥

प्रक्षाल्याचमन दत्त्वा प्रोवाच विनयान्वित ।

हिमालय उवाच

मुने भाग्यवशादेव लभ्यते तव दर्शनम्॥ १३ ॥

दृष्टोऽसि साम्प्रत ब्रह्मन्कथ तेऽत्र समागम ।

नारद उवाच

श्रुतमेतन्मया लोकात्कन्या सर्वाङ्गसुन्दरी॥ १४ ॥

काचित्तव गृहे जाता ता द्रष्टुमहमागत ।

हिमालय उवाच

अहो बहुतर भाग्यमेतस्माच्च नमामि च॥ १५ ॥

यदेना द्रष्टुकामस्त्वमागतो देवदुर्लभ ।

नारद उवाच

त्व धन्य कृतकृत्यश्च सर्वसौभाग्यसयुत ॥ १६ ॥

यतस्तवैषा तनया देवानामपि दुर्लभा।

श्रीमहादेव उवाच

इत्युक्त्वा गिरिराज च मुनि परमकौतुकात्॥ १७ ॥

तस्याङ्कात्ता निजाङ्केऽसावानयत्परमादृत ।
मुनिर्विधाय ता क्रोडे गङ्गा त्रैलोक्यपावनीम्॥ १८ ॥

धन्योऽस्मीत्यब्रवीद्वाक्य रोमाञ्चितवपुस्तत ।
तत प्राह गिरि हृष्टो मुनीन्द्रो नारद स्मयन्॥ १९ ॥

पुत्रीं यथार्थत किं त्व ज्ञातवानसि वा न वा।

वे कृष्णकटाक्षयुक्त, तीन नेत्रो और चार भुजाओंसे सुशोभित थीं। कन्याजन्मकी बात सुनकर पर्वतराज बड प्रसन्न हुए। उन्हाने ब्राह्मणोसे स्वस्तिवाचन कराकर उन्हे प्रचुर दान-दक्षिणा दी। शुक्लपक्षके चन्द्रमाकी कला तथा वर्षाकालमे नदीके जलके समान वह कन्या पिताके घरमें बडी होने लगी॥ ८-९½॥ एक दिन पर्वतराज हिमालय जब उस कन्याको गोदमे लेकर अन्त पुरमें बैठे थ, उसी समय साक्षात् भगवतीके अशसे गङ्गाको उत्पन्न हुआ जानकर ब्रह्मापुत्र देवर्षि नारद उनके दर्शनहेतु वहाँ पधारे, जिन परा प्रकृतिकी आराधना करके भगवान् शकर कामरूपक्षेत्रमे स्थित रहते हैं॥ १०-११½॥ गिरिराजने नारदजीको आया जानकर उनके चरणोमें वन्दना की तथा पाद्य, आचमन आदिसे उनका सत्कार कर वे विनयपूर्वक बोले— ॥ १२½ ॥

हिमालय बोले—मुने! बडे भाग्यसे आपके दर्शन प्राप्त होते हैं। इस समय मुझे आपका दर्शन हुआ, ब्रह्मन्! कृपया बताये कि आप किस कारणसे यहाँ पधारे हैं? ॥ १३½ ॥

नारदजी बोले—मैंने लोगोसे सुना है कि आपके घर एक परम सुन्दरी कन्याका जन्म हुआ है। मैं उसीको देखने आया हूँ॥ १४½॥

हिमालय बोले—अहो! मेरा परम सौभाग्य है कि देवदुर्लभ आप मेरी इस कन्याको देखने पधारे हैं, आपको बारम्बार प्रणाम है॥ १५½ ॥

नारदजी बोले—आप धन्य हैं, कृतकृत्य हैं और परम सौभाग्यशाली हैं, जो ऐसी देवदुर्लभ कन्या आपको प्राप्त हुई है॥ १६½॥

श्रीमहादेवजी बोले—गिरिराज हिमालयसे ऐसा कहकर मुनिवर नारदजीने उत्सुकतापूर्वक उस कन्याको उनकी गोदसे आदरपूर्वक अपनी गोदमे ले लिया। मुनिवरने त्रैलोक्यपावनी उन गङ्गाको गोदमे लेकर रोमाञ्चित होकर 'मैं धन्य हुआ'—ऐसा कहा। तब हर्षपूर्वक उन्हाने हिमराजसे मुसकराते हुए पूछा कि आप अपनी पुत्रीको यथार्थरूपसे जानते हैं अथवा नहीं? ॥ १७—१९½ ॥

हिमालय उवाच

ज्ञायते मम कन्येय चार्वङ्गी शुभलक्षणा॥ २०॥
नान्यस्तु ज्ञायते कश्चिद्विशेषो मुनिपुङ्गव।

नारद उवाच

या मूलप्रकृति सूक्ष्मा दक्षकन्याभवत्पुरा॥ २१॥
नाम्ना सती सैव देवी निजाशेन महामते।
कन्या तवेय सम्भूता प्रतिलब्धु हर पतिम्॥ २२॥
गङ्गेति क्रियते नाम सर्वपातकनाशनम्।
लोकाना त्राणकर्त्रीय महापातकनाशिनी॥ २३॥
विवाहोऽस्या स्वर्गपुरे भविष्यति महागिरे।
शिव एव हि भर्तास्या पूर्वमेव सुनिश्चित ॥ २४॥
एना स्वर्गपुर नेतु ब्रह्मा लोकपितामह ।
भवन्त स्वयमागत्य प्रार्थयिष्यति यत्नत ॥ २५॥
तदा त्वया समर्प्यैषा ब्रह्मणे चारुरूपिणी।
स तु नीत्वा स्वर्गपुरे शिवमाहूय सादरम्॥ २६॥
सम्प्रदास्यति तस्मै ते पुत्रीमेना शुभाननाम्।

हिमालय उवाच

त्व ज्ञाता विषयाणा हि भूतभव्यभविष्यताम्॥ २७॥
विज्ञानचक्षुषा सर्वं प्रत्यक्षमिव पश्यसि।
विधात्रा विहित यत्तु तद्भविष्यति नान्यथा॥ २८॥
तदह कि करिष्यामि नेश्वरेच्छा वृथा भवेत्।

श्रीमहादेव उवाच

इत्युक्तो गिरिराजेन स मुनि प्रययौ द्रुतम्॥ २९॥
यत्रास्ति भगवान्ब्रह्मा सर्वलोकपितामह ।
त प्रणम्याह स मुनि प्रहृष्टात्मा महामति ॥ ३०॥
प्रभो सती समुत्पन्ना हिमालयगृहे पुन ।
निजाशेनाभवदिय गङ्गा परमसुन्दरी॥ ३१॥
पूर्णापि देवी तत्रैव सम्भविष्यत्युमापि च।

हिमालय बोले—मुनिश्रेष्ठ! मैं तो यही जानता हूँ कि यह शुभ लक्षणोवाली सुन्दर बालिका मेरी बेटी है। इसके अतिरिक्त कोई विशेष बात मुझे ज्ञात नहीं है॥ २०½ ॥

नारदजी बोले—महामते! जो सूक्ष्मा मूल प्रकृति भगवती हैं, उन्होने पहले दक्षप्रजापतिकी कन्याके रूपमे अवतार लिया था। वे ही भगवती सती अपने अशरूपसे भगवान् शिवको पतिरूपसे पुन प्राप्त करने-हेतु आपकी कन्या बनकर आयी हैं। इनका नाम गङ्गा रखा जाता है, जो सभी पापोका नाश करनेवाला है। ये सभी प्राणियोका परित्राण करनेवाली तथा पापोका नाश करनेवाली हैं॥ २१—२३॥ गिरिराज! इनका विवाह स्वर्गमे होगा। भगवान् शिव ही इनके पति बनेगे—यह पहलेसे ही सुनिश्चित है। इन्हे स्वर्ग ले जानेके लिये लोकपितामह ब्रह्माजी स्वय आपके पास आकर यत्नपूर्वक प्रार्थना करेगे॥ २४-२५॥ तब आपको उन्हे यह सुन्दर रूपवती कन्या प्रदान कर देनी चाहिये, जिसे लेकर वे स्वर्गमे चले जायँगे। वहाँ भगवान् शिवको सादर आमन्त्रित करके वे तुम्हारी इस सुन्दर मुखवाली कन्याको उन्हे प्रदान करेगे॥ २६½ ॥

हिमालय बोले—मुनिश्रेष्ठ! आप तो भूत, भविष्य और वर्तमानकी सभी बातोके ज्ञाता हैं। ज्ञानदृष्टिसे आप प्रत्यक्षके समान सब देख लेते है। इसके लिये विधाताने जो विधान बनाया है, वह तो होकर ही रहेगा, अन्यथा नहीं होगा, मैं इसमे क्या कर सकता हूँ? ईश्वरकी इच्छा वृथा नहीं हो सकती॥ २७-२८½ ॥

श्रीमहादेवजी बोले—गिरिराजके ऐसा कहनेके पश्चात् नारद मुनि शीघ्र ही वहाँसे ब्रह्मलोकको चले गये, जहाँ लोकपितामह ब्रह्माजी विराजमान थे। उन्हे प्रणाम करके महामति नारदजी प्रसन्नतापूर्वक बोले— ॥ २९-३०॥ प्रभो! सतीने हिमालयके घरमे पुन अपने अशरूपसे परमसुन्दरी गङ्गाके रूपमे जन्म ले लिया है। अपने पूर्णरूपसे भी वे जगदम्बा उमा नामसे वहीं जन्म लेगी॥ ३१½ ॥

ब्रह्मोवाच

सत्य जानामि जाता सा हिमालयगृहेऽधुना॥ ३२॥

निजांशेन महादेवी गङ्गा त्रैलोक्यपावनी।
महेशपूर्वपत्नी सा महेशमभियास्यति॥ ३३॥

शिवोऽपि तामनुप्राप्य निर्वृति लप्स्यते पराम्।
किंतु छायासती देह धृत्वा मूर्ध्नि यदा हर ॥ ३४॥

आनन्दमग्नचित्त सन्ननर्त धरणीतले।
तदा तस्य शिर सस्थ छायादेह हरि स्वयम्॥ ३५॥

चकर्तास्या मतेनैव जगद्रक्षणहेतवे।
तेनापराधेनाद्यापि रुष्टोऽस्मान्प्रति शकर ॥ ३६॥

तस्य कि वा करिष्यामि कथ तुष्टो भवेच्छिव ।

नारद उवाच

शृणु ब्रह्मन्प्रवक्ष्यामि यद्विद्वेषो महेशितु ॥ ३७॥

प्रसन्नता भवेदस्मान्प्रति येनात्र वै प्रभो।
गिरीणामधिप श्रीमान् दाता परमधर्मवित्॥ ३८॥

तत्सन्निधि समागच्छ सार्धमिन्द्रादिदैवतै ।
भिक्षयाऽर्थय ता गङ्गा तदा नून स दास्यति॥ ३९॥

ततश्च ता समानीय स्वर्गपुर्या महोत्सवम्।
कृत्वा शम्भु समाहूय गङ्गा देहि प्रयत्नत ॥ ४०॥

यथा छायासती तस्य स्थिता मूर्ध्नि तथैव हि।
इय द्रवमयी भूत्वा सस्थास्यति सुनिश्चितम्॥ ४१॥

तदैव तुष्टो भगवान्भविष्यति महेश्वर ।

ब्रह्मोवाच

पुत्र त्व तु चिरजीव यदेवमुक्तवानसि॥ ४२॥

यद्येव स्यात्तदा शम्भु प्रीतियुक्तो भविष्यति।
गच्छ पुत्र द्रुत तत्र देवानिन्द्रपुरोगमान्॥ ४३॥

कथयस्व यथावृत्तमायान्तु मम सन्निधिम्।

श्रीमहादेव उवाच

इत्युक्तो ब्रह्मणा प्रीत प्रययौ नारदो मुनि ॥ ४४॥

यत्र देवा महात्मान सन्तीन्द्राद्या महामत।

ब्रह्माजी बोले—यह सत्य है। मुझे भी ज्ञात है कि हिमालयके घरमे त्रैलोक्यपावनी गङ्गारूपसे अपने अशावतारमे भगवती प्रकट हुई हैं। वे भगवान् शकरकी पूर्वपत्नी सती ही हैं और वे महेशको ही पुन प्राप्त करेगी॥ ३२-३३॥ भगवान् शिव भी उन्हे पुन पाकर परम आनन्दित होगे, किंतु इसमे एक सदेह है। सतीके छायाशरीरको सिरपर लेकर जब शिवजी आनन्दमग्न चित्तवाले होकर पृथ्वीपर ताण्डव कर रहे थे तब उनके सिरपर स्थित उस छायाशरीरके मेरी सम्मतिसे जगत्की रक्षा करनेहेतु स्वय भगवान् विष्णुने टुकडे कर दिये थे। उस अपराधके कारण शिवजी अभीतक हम लोगोसे रुष्ट हैं। इस विषयमे अब हमे क्या करना चाहिये, जिससे कि भगवान् शिव प्रसन्न हो जायँ?॥ ३४—३६½॥

नारदजी बोले—प्रभो! ब्रह्मन्! सुनिये, मैं वह उपाय बताता हूँ, जिससे भगवान् शिवका रोष हमलोगोंके प्रति प्रसन्नताम बदल जायगा। ऐश्वर्यशाली गिरिराज हिमालय धर्मज्ञ हैं और उदार भी हैं। इन्द्रादि देवताओको साथ लेकर आप उनके पास जाकर गङ्गाको माँग ल। आपके अनुरोधसे वे अवश्य भगवती गङ्गाको आपको प्रदान कर देगे॥ ३७—३९॥ तब उन्हे स्वर्गमे लाकर एक बडे उत्सवका आयोजन करके भगवान् शिवको उसमे आमन्त्रित कर आग्रहपूर्वक गङ्गाको उन्हे प्रदान कर दीजिये॥ ४०॥ जैसे छायासती उनके सिरपर स्थित रहीं वैसे ही ये जलरूपमे उनके सिरपर निश्चित ही सुशोभित रहेगी। इससे भगवान् शकर प्रसन्न हो जायँगे॥ ४१½॥

ब्रह्माजी बोले—पुत्र! तुम चिरञ्जीवी होओ। जैसा तुमने कहा वैसा करनेसे भगवान् शकर अवश्य प्रसन्न हो जायँगे। अत पुत्र! तुम शीघ्रतापूर्वक इन्द्रादि देवाके पास जाकर उन्हे सारी बात बताकर मरे पास आनेका सदेश दे दो॥ ४२-४३½॥

श्रीमहादेवजी बोले—महामते! ब्रह्माजीके ऐसा कहनेपर नारद मुनि प्रसन्न होकर वहाँ गये, जहाँ महामना इन्द्रादि देवगण विराजमान थे॥ ४४½॥

नारद उवाच

देवराज समायातो ब्रह्मलोकादह प्रभो॥ ४५॥
युष्माक सन्निधि पित्रा समादिष्टो महात्मना।
मर्त्ये हिमवतो गेहे पुत्री जाता स्वय सती॥ ४६॥
भागार्धेन महादेवी गङ्गा त्रैलोक्यपावनी।
तामानेतु स्वर्गपुर ब्रह्मा यास्यति भूतलम्॥ ४७॥
यूयमागच्छत क्षिप्र मर्त्ये गन्तु सुरोत्तमा ।

देवा ऊचु

कि ब्रवीषि मुनिश्रेष्ठ मर्त्ये जाता स्वय सती॥ ४८॥
वृत्तमेतन्महेशाय कथित कि न वा मुने।

नारद उवाच

आनीय ता देवपुरे ततो यास्यामि शकरम्॥ ४९॥
द्रुतमागच्छत सुरा ब्रह्मणो निकट तत ।

श्रीमहादेव उवाच

तथेत्युक्त्वा सुरगणा जग्मुर्ब्रह्मपुर तदा॥ ५०॥
इन्द्राद्यास्ते मुनिश्रेष्ठ हर्षोत्फुल्लमुखाम्बुजा ।
प्रणेमुश्च महात्मान ब्रह्माण जगत पतिम्॥ ५१॥
ऊचु कृताञ्जलिपुटा किमाज्ञापयसि प्रभो।

ब्रह्मोवाच

सती हिमवतो गेहे जाता गङ्गा महेश्वरी॥ ५२॥
भागार्धेन तथैवोमा तत्रैव हि भविष्यति।
साम्प्रत ता स्वर्गपुर यास्यामो नेतुमुत्तमाम्॥ ५३॥
भवन्त स्वनिकेताच्च समागच्छन्तु माचिरात्।
इन्द्र कुबेरो वरुण सोमसूर्याग्निमारुता ॥ ५४॥
समायान्तु मया साक बुद्धिमाश्चैव नारद ।

श्रीमहादेव उवाच

तथेत्युक्त्वा ययुर्देवा इन्द्राद्या मुनिपुङ्गव॥ ५५॥
ब्रह्मा महर्षिणा तेन नारदेन ययौ द्रुतम्।
हिमाद्रिसन्निधि गङ्गायाचने कृतमानस ॥ ५६॥
तदह पूर्वरात्रे तु गङ्गा गिरिवर स्वयम्।
स्वप्ने प्राह महादेवी ज्ञात्वा देवविचेष्टितम्॥ ५७॥
स्वप्न सदर्शयामास रजन्या शेष एव हि।
शुक्ला त्रिनयना काचिद्देवी मकरवाहना॥ ५८॥
उवाच प्रमुखे स्थित्वा पितुस्ते तनया ह्यहम्।
आद्या प्रकृतिरेकैव साह दक्षप्रजापते ॥ ५९॥

नारदजी बोले—प्रभो देवराज! मैं ब्रह्मलोकसे महात्मा पिताजीकी आज्ञासे आपके पास आया हूँ। मर्त्यलोकमे हिमवान्‌के गृहमे साक्षात् देवी सतीने पुत्रीरूपसे जन्म लिया है। अपने अर्धांशसे महादेवी त्रैलोक्यपावनी गङ्गाके रूपमे आयी हैं। उन्हे स्वर्गमे लानेके लिये ब्रह्माजी पृथ्वीतलपर जायँगे। देवश्रेष्ठो! आपलोग शीघ्र ही मर्त्यलोक चलनेके लिये ब्रह्मलोक आये॥ ४५—४७½॥

देवगण बोले—मुनिवर! आप क्या कह रहे हैं? क्या स्वय सतीने मृत्युलोकमे जन्म लिया है? मुने! क्या भगवान् शकरको यह बात बता दी गयी है?॥ ४८½॥

नारदजी बोले—उन गङ्गाको स्वर्गलोकमे लानेके बाद मैं शिवजीके पास जाऊँगा, देवगणो! आपलोग शीघ्र ब्रह्माजीके निकट पहुँचे॥ ४९½॥

श्रीमहादेवजी बोले—तब देवगण 'तथास्तु' कहकर ब्रह्मलोक पहुँचे। हर्षसे विकसित मुखकमलवाले उन इन्द्रादि देवगणोने जगत्पति महात्मा ब्रह्माजीको प्रणाम किया और हाथ जोडकर पूछा—प्रभो! हमारे लिये क्या आज्ञा है?॥ ५०-५१½॥

ब्रह्माजी बोले—महादेवी सती हिमवान्‌के घरमे अपने अर्धांशसे गङ्गारूपसे जन्मी हैं। इसी प्रकार उमा भी वहाँ अवतार लेगी। उन ज्येष्ठपुत्री गङ्गाको स्वर्गमे लानेके लिये हमलोग वहाँ चलेगे॥ ५२-५३॥ इन्द्र, कुबेर, वरुण, चन्द्र, सूर्य, अग्नि, वायु और बुद्धिमान् नारद—आप सब लोग अपने-अपने स्थानासे मेरे साथ चलनेको शीघ्र तैयार हो जायँ॥ ५४½॥

श्रीमहादेवजी बोले—मुनिपुङ्गव! इन्द्रादि देवगण 'ऐसा ही हो' कहकर गङ्गाको माँगनेका विचार कर महर्षि नारद तथा ब्रह्माजीके साथ हिमालयक पास शीघ्र पहुँच गये॥ ५५-५६॥ देवताओंकी चेष्टा जानकर महादेवी गङ्गाने उससे पिछली रात्रिको ही गिरिराजको स्वप्नमें सारी बात स्वय बता दी॥ ५७॥ रात्रिके अन्तिम प्रहरमे गिरिराजको स्वप्नम श्वेतवर्णा त्रिनयना, मकरवाहना एक देवी दिखायी दीं। वे सामने आकर बोलीं—पिताजी! मैं आपकी पुत्री हूँ। एकमात्र मैं ही आद्या प्रकृति हूँ, और

पुत्री सती पितुर्यज्ञे शिव त्यक्तवती पतिम्।
शिवस्तु मद्वियोगार्त कामरूपे व्यवस्थित ॥६०॥

तपश्चरति मा लब्धु पत्नीभावेन वै पुन ।
त्वयाप्याराधिता चाह पुत्रीभावेन भक्तित ॥६१॥

तेनाह त्वद्गृहे जाता भागार्धेन तु साम्प्रतम्।
भागार्धेनापरेणापि भविष्यामि तवात्मजा॥६२॥

मा नेतुमागमिष्यन्ति ब्रह्माद्यास्त्रिदशेश्वरा ।
त्वा सम्प्रार्थ्य स्वर्गपुर यास्यामि सह तै सुरै ॥६३॥

लप्स्यामि च पति शम्भु देवैर्दत्त महात्मभि ।
मदर्थ मा शुच पित कदाचिदपि मोहित ॥६४॥

पूर्वमुक्तमतस्तात नानुशोचितुमर्हसि।
इत्येवमुक्त्वा सा स्वप्ने गङ्गा शैलाधिप मुने॥६५॥

अन्तर्हिताऽभवत्तत्र गिरिराट् प्रबुबोध च।
विचारयामास सर्व यदुक्त गङ्गया तत ॥६६॥

मोह आसीत्पुरा यो वै त तत्याज महागिरि ।
अथायाता सुरास्ते तु ब्रह्माद्या मुनिपुङ्गव॥६७॥

हिमालयगृहे गङ्गा नेतुकामा महौजस ।
स प्रणम्य गिरिश्रेष्ठस्तानुवाच महामति ॥६८॥

कथमत्रागता देवा कथयध्व यथार्हत ।

देवा ऊचु

दाता त्व सर्वलोकेषु गीयसे भूधराधिप॥६९॥

भिक्षार्थमागता स्मोऽद्य तवान्तिकमतो गिरे।

इति तेषा वच श्रुत्वा स्मृत्वा स्वप्नकथा गिरि ॥७०॥

भाषित नारदेनापि नोवाच वचन तदा।
तत सचिन्त्य मनसा देवानाह महागिरि ॥७१॥

त्रैलोक्यस्याधिपा यूय कथ भिक्षार्थिन सुरा ।
कि प्रदास्यामि युष्मभ्य तन्मे वदत साम्प्रतम्॥७२॥

मैं वही हूँ जिसका दक्षप्रजापतिकी पुत्री सतीरूपसे पिताके यज्ञम शरीर त्यागकर अपने पति शिवस वियाग हो गया था। शिवजी भी मेरे वियोगमें व्यथित हाकर कामरूपक्षेत्रम रहने लगे। वे मुझे पत्नीरूपसे पुन प्राप्त करनेके लिये तप कर रहे हैं। आपने भी पुत्रीरूपस मुझे पानके लिये भक्तिपूर्वक मेरी आराधना की है। इसलिये मैं अपने अधाशसे इस समय आपके घरम आया हूँ। अपने दूसरे अर्धांशसे भी मैं आपकी ही पुत्री बनूँगी॥५८—६२॥ मुझे ले जानेके लिये ब्रह्मादि देवगण आपके पास प्रार्थना करने आयगे। मैं उन देवताआक साथ स्वर्ग चली जाऊँगी और उन महान् देवताआक द्वारा भगवान् शकरको दी जानेपर मैं पुन उन्हें पतिरूपसे प्राप्त कर लूँगी। पिताजी। मेरे लिये आप मोहासक्त होकर कभी भी शोक न करे॥६३-६४॥ पिताजी। आपको ये बाते पहले ही इसलिये बता दी हैं, जिससे आप ऐसा होनेपर दु खी न हो। मुने। गिरिराजसे स्वप्नमें ऐसा कह करके वे गङ्गाजी अन्तर्धान हो गयीं और तब हिमवान् जग गये। उन्होने गङ्गाजीकी कही हुई सारी बातोंपर विचार किया॥६५-६६॥ गिरिराजको इस विषयमें पहले जो मोह था, वह दूर हो गया। मुनिश्रेष्ठ। तब महान् तेजस्वी ब्रह्मादि देवगण हिमालयके यहाँ गङ्गाको ले जानेकी इच्छासे आये। उन बुद्धिमान् गिरिराजने उन्हें प्रणाम करके कहा—देवगणो। आप यहाँ कैसे आये? जो उचित हो, वेसा आप मुझे कहिये॥६७-६८½॥

देवगण बोले—पर्वतराज। सभी लोकोमे दानीके रूपमे आपकी कीर्ति गायी जाती है। गिरे। आज हम सभी आपके पास भिक्षा माँगने आये हैं॥६९½॥ उनका ऐसा वचन सुनकर गिरिराजको स्वप्नमें देखा सारा वृत्तान्त याद आ गया कि नारदजीने भी पूर्वमे ऐसा ही कहा था, तब हिमालयने कोई उत्तर नहीं दिया था। तदनन्तर मनम विचारकर गिरिराजने देवताओसे यह कहा—॥७०-७१॥ देवगणो। आपलोग तो त्रिलोकके स्वामी हैं। आप देवोंको भिक्षा माँगनेकी क्या आवश्यकता हो गयी? आप बताये कि मैं आपको क्या प्रदान करूँ?॥७२॥

ब्रह्मोवाच

शृणु वत्स प्रवक्ष्यामि यदर्थं समुपागता।
इमे देवास्तव पुर सर्वरत्नसुशोभिता॥ ७३॥

प्रकृति परमा जाता दक्षपुत्री स्वय सती।
शिव वृतवती साध्वी पति त्रिभुवनेश्वरम्॥ ७४॥

दक्षस्तु शिवनिन्दासु रत कुमतिरीश्वरम्।
शिव द्विषन्महायज्ञमारभद्गिरिपुङ्गव॥ ७५॥

सर्वानेवाह्वयत्तत्र देवानिन्द्रपुरोगमान्।
विष्णु मा च महामोहाद्वर्जयित्वा सतीशिवौ॥ ७६॥

तेन क्रुद्धा महादेवी गन्तु दक्षपुर स्वयम्।
समुद्यता महेशेन निषिद्धा बहुधा गिरे॥ ७७॥

प्रभुत्वाभिमतेनेति शम्भुर्जातोऽपराधकृत्।
तेन क्रुद्धा शिव त्यक्त्वा दक्षगेह गता सती॥ ७८॥

दक्षोऽपि मायया मुग्ध शिवमेव व्यनिन्दयत्।
तेन त च परित्यज्य शिव चाप्यपराधिनम्॥ ७९॥

विमोह्य मायया देवी छायया मृतरूपया।
नित्या ब्रह्ममयी पूर्णा स्वयमन्तर्हिताभवत्॥ ८०॥

तेन शोकेन दु खार्त शिवस्त्रिभुवनेश्वर।
ता छाया शिरसा धृत्वा ननर्त धरणीतले॥ ८१॥

तेन नृत्येन भुवन रसातलगमोद्यतम्।
दृष्ट्वा विष्णु देवगणा ऊचू रक्ष जगत्त्रयम्॥ ८२॥

ततश्चक्रेण भगवान् विष्णु परमपूरुष।
छायासत्यास्तु त देह प्रचिच्छेद शनै शनै॥ ८३॥

स तद्देहवियोगेन दु खित परमेश्वर।
अद्यापि रुष्ट आस्तेऽस्मान्प्रति भूधरपुङ्गव॥ ८४॥

सैव दाक्षायणी देवी साम्प्रत तव वेश्मनि।
अशेन तनया जाता गङ्गा त्रिभुवनेश्वरी॥ ८५॥

शिवस्य पूर्वपत्नीय शिवमेव हि लप्स्यति।
केवल रुष्टचित्तोऽस्मान्प्रति स्थास्यति शकर॥ ८६॥

अतस्त्व यदि चास्मभ्य कन्यामेना प्रयच्छसि।
तदा स्वर्गपुर नीत्वा महोत्सवपुर सरम्॥ ८७॥

महेशाय समर्प्यैव प्राप्स्यामो निर्वृति पराम्।

ब्रह्माजी बोले—वत्स! सुनो, मैं बताता हूँ जिस कारण सभी प्रकारके रत्नोसे सुशोभित ये देवता आपके पास आये हैं॥ ७३॥ परा प्रकृति ही स्वय दक्षप्रजापतिकी कन्या सती बनकर जन्मी थीं। उन साध्वीने त्रिभुवनपति भगवान् शकरका वरण किया था। गिरिश्रेष्ठ! दक्षप्रजापतिने कुबुद्धिके कारण भगवान् शकरकी निन्दामे लीन रहते हुए द्वेष-बुद्धिसे एक महायज्ञका आयोजन किया। उसने इन्द्र प्रभृति सभी देवताओको आमन्त्रित किया। मुझे और विष्णुको भी बुलाया, किंतु महान् मूर्खतावश सती और शिवको नहीं बुलाया॥ ७४—७६॥ गिरे! इस कारण महादेवी सती कुपित होकर स्वय दक्षके नगरको जानेके लिये उद्यत हुई, यद्यपि शिवजीने उन्हे अनेक प्रकारसे रोकना चाहा॥ ७७॥ अपने प्रभुत्वके अभिमानसे शिवजीने ऐसा किया है—यह सोचकर सतीने भगवान् शिवको अपराधी समझा और क्रुद्ध होकर वे उन्हे छोडकर दक्षके घरको चली गयीं॥ ७८॥ दक्षप्रजापतिने भी मायाके वशीभूत होकर शिवकी ही निन्दा की। इसलिये सतीने अपराधी दक्ष और शिव दोनोको विमोहित कर और छोडकर अपनी मायासे मृत छायाशरीर धारण कर लिया। स्वय वे पूर्णा नित्या ब्रह्मस्वरूपा अन्तर्धान हो गयीं॥ ७९-८०॥ त्रिभुवनपति भगवान् शिव दु खसे व्याकुल होकर उस छायासतीको सिरपर लिये धरातलपर नृत्य करने लगे। उस ताण्डवसे त्रिभुवन रसातलको जाने लगा। ऐसा देखकर देवताओने विष्णुसे त्रिभुवनकी रक्षा करनेकी प्रार्थना की॥ ८१-८२॥ पर्वतराज! परमपुरुष भगवान् विष्णुने चक्रसे छायासतीके उस शरीरको धीरे-धीरे काट दिया। परमेश्वर शिव उस देहके वियोगसे दु खी होकर आज भी हमसे रुष्ट हैं॥ ८३-८४॥ वे ही भगवती दाक्षायणी सती अब तुम्हारे घरमे अपने अशभागसे त्रिलोकेश्वरी गङ्गाके रूपमे आयी हैं। ये भगवान् शिवकी पूर्वपत्नी हैं और उन्हे ही पुन प्राप्त करेगी, परतु भगवान् शकर हमलोगोंसे रुष्ट ही रह जायँगे। अत यदि आप इस कन्याको हमें दे दे और हम इसे स्वर्गलोकमे ले जाकर एक महोत्सवका आयोजन कर भगवान् शकरको समर्पित कर दे तो इससे हमे परम आनन्द प्राप्त होगा॥ ८५—८७½॥

या देवी पूर्णभावेन भविष्यत्यपरा सुता॥ ८८॥
ता त्वमेव महेशाय सम्प्रदास्यसि सादरम्।
एना दहि त्विमा नीत्वा ददाम शम्भवे गिरे॥ ८९॥

जो जगदम्बा अपने पूर्णांशसे आपकी दूसरी पुत्रीके रूपमे जन्मेगी उन्हे आप स्वय ही परमेश्वर सदाशिवको सादर समर्पित करेगे। गिरे! इस कन्याको हम दे दीजिये। हम इसे ले जाकर भगवान् शम्भुको समर्पित कर देगे॥ ८८-८९॥

हिमालय उवाच

कन्याया न पितुर्गेहे स्थितिर्भवति शाश्वती।
परार्थाय भवेत्कन्या न स्वकीया कदाचन॥ ९०॥
जानाम्येव बहुविध तथापि मम चेतसि।
गङ्गाविरहज दु ख दु सह सम्भविष्यति॥ ९१॥

हिमालय बोले—कन्या अपने पिताके घरमें हमेशाके लिये तो रहती नहीं। वह तो दूसरेको देनेके लिये ही होती है, अपनी नहीं होती। इस बातको मैं अच्छी तरह समझता हूँ, फिर भी गङ्गाके जानेका मेरे मनमे असहनीय दु ख होगा॥ ९०-९१॥

श्रीमहादव उवाच

एवमुक्त्वा गिरिश्रेष्ठ साश्रुपूर्णविलोचन।
रुरोद बहुधा गङ्गा क्रोडे कृत्वा महामति॥ ९२॥
गङ्गा प्राह पितस्त्व तु त्यज शोक कृते मम।
प्रयच्छ ब्रह्मणे चास्मै यास्ये स्वर्गं तु साम्प्रतम्॥ ९३॥
नाह तव विदूरस्था न मे दूरस्थितो भवान्।
त्व भक्तो भक्तिगम्याह सदैव निकटे स्थिता॥ ९४॥
एवमुक्त्वा तु पितर प्रणम्य गिरिनन्दिनी।
ब्रह्मणो निकट प्रायाद्गन्तु भूतपति पतिम्॥ ९५॥

श्रीमहादेवजी बोले—ऐसा कहकर महामति गिरिराज हिमालय गङ्गाको गोदमे बिठाकर अश्रुभरे नेत्रोसे बहुविध रुदन करने लगे। तब गङ्गाजी बोलीं—पिताजी! आप मेरे लिये दु खी न हा। मुझे ब्रह्माजीको दे दे। अब में स्वर्ग जाऊँगी॥ ९२-९३॥ मैं आपसे दूर नहीं हूँ और न आप ही मुझसे दूर हैं। आप भक्त हैं और मैं भक्तिसे प्राप्य हूँ। अत आप मुझे सदा अपने निकट ही पायगे॥ ९४॥ पितासे ऐसा कहकर तथा उन्हे प्रणाम करके गिरिसुता गङ्गा भूतपति सदाशिवको पतिरूपमे प्राप्त करनेके लिये ब्रह्माजीके पास चली गयीं॥ ९५॥

॥ इति श्रीमहाभागवते महापुराणे श्रीमहादेवनारदसवादे गङ्गागमन नाम त्रयोदशोऽध्याय ॥ १३॥

॥ इस प्रकार श्रीमहाभागवतमहापुराणके अन्तर्गत श्रीमहादेव-नारद-सवादमे 'गङ्गागमन' नामक तेरहवाँ अध्याय पूर्ण हुआ॥ १३॥

चौदहवाँ अध्याय

ब्रह्माजीका गङ्गाजीको कमण्डलुमे लेकर स्वर्गमे आना, मातासे मिले विना गङ्गाके स्वर्गलोक चले जानेपर क्रुद्ध मेनाद्वारा उन्हे जलरूप होकर पुन पृथ्वीलोक आनेका शाप देना, स्वर्गलोकमे देवी गङ्गासे भगवान् शकरका विवाह

श्रीमहादेव उवाच

तता ब्रह्मा गिरीन्द्रानुमतौ गङ्गा महामुने।
कमण्डलौ समादाय प्रायात्स्वर्गपुर द्रुतम्॥ १॥
अथ मेना ममागत्य गिरीन्द्रस्यान्तिक तदा।
अदृष्ट्वा तनया वाचमुवाच गिरिपुङ्गवम्॥ २॥

श्रीमहादेवजी बोले—महामुने! तब ब्रह्माजी गिरिराजकी अनुमतिसे गङ्गाजीको अपने कमण्डलुमें लेकर शीघ्र ही स्वर्गलोक आ गये॥ १॥ इधर मेना जब गिरिराजके पाम आयीं, तब बेटीका वहाँ न देखकर गिरिश्रेष्ठ हिमालयसे कहने लगीं॥ २॥

मेनकोवाच

क्व गता म सुता राजन् गङ्गा प्राणममा प्रभो।
मम्प्रिया तु तया सा कन नीता यद प्रभा॥ ३॥

मेनका बोलीं—राजन्! प्रभो! मेरी प्राणप्यारी पुत्री गङ्गा कहाँ गयी? वह ता आपकी गोदमें बैठी थी उसे कौन ले गया? प्रभा! मुझे बताइय॥ ३॥

श्रीमहादेव उवाच

तत साश्रुपरीताक्ष प्राह तस्यै हिमालय ।
गङ्गाया गमन स्वर्गे याञ्चया ब्रह्मणोऽपि च॥ ४ ॥

तच्छ्रुत्वा तु मुनिश्रेष्ठ गङ्गाविच्छेददु खिता।
रुरोद गिरिराजस्य पत्नी मेनातिविस्तरम्॥ ५ ॥

ततस्ता सान्त्वयामास गिरीन्द्रो ज्ञानिना वर ।
श्रावयन् भाषित सर्वं गङ्गाया स्वयमेव हि॥ ६ ॥

तत स्वतनया रोषाच्छशाप गिरिगेहिनी।
असम्भाष्य गता स्वर्ग गङ्गा प्राणसमामपि॥ ७ ॥

मातर मामसम्भाष्य गता यस्मात्त्रिविष्टपम्।
ततो द्रवमयी भूत्वा पुनरेहि धरातलम्॥ ८ ॥

एव कृत्वाभिशाप तु मेना हिमवतोऽङ्गना।
प्रविवेश गृह देवी गिरिराजोऽपि नारद॥ ९ ॥

अथ स्वर्गपुरे देवा गङ्गा नीत्वा समुत्सुका ।
अकार्षुर्मङ्गल तस्या विवाहार्थं महामते॥ १० ॥

नारद प्रेषयामास ब्रह्मा हृष्टमनास्तदा।
कामरूप महापीठ शम्भुमानेतुमादरात्॥ ११ ॥

तत स नारदो गत्वा कामरूपे महेश्वरम्।
ददर्श ध्यानसन्निष्ठ योगचिन्तापरायणम्॥ १२ ॥

निवृत्तेन्द्रियकार्यं हि महायोगविचिन्तकम्।
मध्याह्नार्कसहस्राभ स्फुरदिन्दुविलोचनम्॥ १३ ॥

एव विलोक्य देवेश नारदस्तत्र सस्थित ।
चिन्तयामास भीतात्मा ध्यानभङ्गे महेशितु ॥ १४ ॥

यद्येन कथये देव्या सत्या हिमवतो गृहे।
जन्माभूदिति तत्तस्य ध्यानभङ्गो भविष्यति॥ १५ ॥

न चेद्वदामि तद्भ्रष्टप्रतिज्ञोऽह भवामि च।
किवा श्रुत्वा सतीदेव्या पुनर्जन्म महेश्वर ॥ १६ ॥

तुष्ट्या परमया युक्तो मयि प्रीतो भविष्यति।
इति सचिन्त्य शनकै शम्भोरन्तिकमाययौ॥ १७ ॥

उवाच नारदो देव योगैकासक्तमानसम्।

श्रीमहादेवजी बोले—तब गिरिराज हिमालयने ऑसूभरी ऑखोसे मेनाको देखकर ब्रह्माकी याचना तथा गङ्गाके स्वर्ग जानेकी बात बता दी॥ ४॥ मुनिश्रेष्ठ! ऐसा सुनकर गङ्गाके विरहसे दु खी गिरिराजपत्नी मेना अनेक प्रकारसे रुदन करने लगीं। ज्ञानियोंमें श्रेष्ठ गिरिराजने मेनाको सान्त्वना दी और उन्हे वह सारी बात भी बतायी, जो गङ्गाने स्वय उनसे कही थी॥ ५-६॥ अपनी माँसे बिना कोई बात किये ही स्वर्ग चले जानेके कारण गिरिराजपत्नी मेनाने अपनी प्राणप्रिया पुत्री गङ्गाको कुपित होकर (इस प्रकारका) शाप दे दिया॥ ७॥ 'मुझ मातासे बिना बात किये तुम स्वर्ग चली गयी, इसलिये तुम्हे जलरूपमे पुन पृथ्वीलोकमे आना होगा'॥ ८॥ नारद! इस प्रकार हिमवान्की पत्नी मेना शाप देकर भवनमे चली गयीं और गिरिराज हिमवान् भी उनके साथ चले गये॥ ९॥ महामते! इधर स्वर्गलोकमे गङ्गाको लाकर देवगण अत्यन्त उल्लासपूर्वक उनकी विवाहसम्बन्धी माङ्गलिक क्रियाएँ करने लगे॥ १०॥ तदनन्तर प्रसन्नमन ब्रह्माजीने शिवजीको आदरपूर्वक बुलानेहेतु नारदजीको कामरूप महापीठ भेजा॥ ११॥ नारदजीने कामरूपमें जाकर भगवान् शिवको योगाभ्यासमें सलग्न एव ध्यानमग्न देखा॥ १२॥ इन्द्रियोंकी वृत्तियोको समेटकर योगकी गहन साधनामें लीन, मध्याह्नकालके सहस्रो सूर्योके समान तेजस्वी और चन्द्रमाके समान प्रकाशित नेत्रवाले भगवान् शिवको देखकर नारदजी वहीं खडे रहे और सदाशिवके ध्यानको भग करनेके भयसे विचार करने लगे कि यदि देवी सतीके हिमालयके घरमे जन्मकी बात इनसे कहूँ तो इनका ध्यान भग हो जायगा॥ १३—१५॥ यदि कुछ न कहूँ तो मुझे प्रतिज्ञाभगका पाप लगेगा। यह भी हो सकता ह कि देवी सतीके पुनर्जन्मकी बात सुनकर भगवान् शिव परम सन्तुष्ट होकर मुझपर प्रसन्न हो जायँ। यह सब सोचकर धीरे-धीरे नारदजी भगवान् शकरके समीप पहुँचे और योगमें लीन सदाशिवसे बोले—॥ १६-१७½॥

नारद उवाच

देवदेव नमस्ये त्वा प्रसन्नो मे जगद्गुरो॥ १८॥

यस्ते सतीं समानेतु प्रत्युद्यातस्त्वदन्तिकात्।
जाता तव सती भूयस्त्वामिच्छन्ती पति प्रभो॥ १९॥

ता ग्रहीतु समागच्छ त्यज योगविचिन्तनम्।

श्रीमहादेव उवाच

इति श्रुत्वा महादेवो ध्यान त्यक्त्वा तदैव हि॥ २०॥

क्वास्ति मे सा सतीत्येवमुक्त्वा तस्थौ महीतले।
ततस्त प्राह देवर्षिर्जाता हिमवत सुता॥ २१॥

अशेन सा सती देवी गङ्गा नाम्ना सुलोचना।
ता ब्रह्मा तु समानीय स्वर्गे सर्वसुरै सह॥ २२॥

तुभ्य दत्तमना भूत्वा प्रेषयामास मा प्रभो।
त्वमेहि परिगृह्णीष्व पत्नी ते चारुरूपिणी।
तत कमण्डलो ब्रह्मापश्यत्ता चारुरूपिणीम्॥ २३॥

स्थितामशेन त्रैलोक्यपावनीं शिवगेहिनीम्।
महेशस्ता प्रगृह्यैव तत प्रायान्महामते॥ २४॥

कैलास सुप्रसन्नात्मा समस्तै प्रमथैर्वृत ।

स्थिता कमण्डलौ या तु सैव मायापुर हरम्॥ २५॥

प्राप्य द्रवमयी भूत्वा वसुधामपि सागमत्।
स्वर्गाद्ब्रह्मनदीरूपा समुपागत्य भूतलम्॥ २६॥

उद्धृत्य सागर वश प्राप्य सागरमम्बुधिम्।
पाताल प्राप्य लोकाना परित्राणाय नारद॥ २७॥

एव हिमगिरे पुत्री भूत्वाशेन सती मुने।
पतिमाप महादेव प्रसन्ना जगदम्बिका॥ २८॥

अपरापि मुनिश्रेष्ठ ततस्तु सा सती स्वयम्।
सम्भूयापि च पूर्णैव पतिमाप च शकरम्॥ २९॥

नारदजी बोले—जगद्गुरु महादेव! आपको नमस्कार करता हूँ। आप मुझपर प्रसन्न हों। मैं आपके पाससे आपके लिये सतीको लानेहेतु गया था। प्रभो! आपकी प्रिया सती पुन आपको पतिरूपमे पानेकी इच्छासे जन्म ले चुकी हैं। उन्हे प्राप्त करनेहेतु मेरे साथ चलिये। अब योगचिन्तन छोडिये॥ १८-१९½ ॥

श्रीमहादेवजी बोले—नारदजीकी बाते सुनकर भगवान् शकर उसी समय ध्यान छोडकर 'वह मेरी सती कहाँ है' ऐसा कहते हुए स्थित हो गये। तब नारदजीने उन्हे बताया—प्रभो! भगवती सती अपने अशरूपसे हिमालयकी सुन्दर नेत्रावाली बेटीके रूपमे गङ्गाके नामसे जन्मी हैं। उन्हे सभी देवताओंके साथ ब्रह्माजी स्वर्ग ले आये हैं और आपको प्रदान करना चाहते हैं। इसी निमित्त मुझे भेजा गया है। अत आप मेरे साथ चले और अपनी रमणीया पत्नीको प्राप्त करे। तवतक ब्रह्माजी अपने कमण्डलुमें स्थित परा प्रकृतिके अशसे उत्पन्न, तीनो लोकोको पवित्र करनेवाली, सुन्दर स्वरूपवाली उन शिवप्रियाकी देखभाल करते रहे। महामते! तव शिवजी उन्हे लेकर प्रसन्नचित्तसे अपने प्रमथगणोके साथ कैलासपर्वतपर चले गये॥ २०—२४½ ॥ जो जगदम्बा ब्रह्माके कमण्डलुमे रही थीं, वे ही भगवान् शिवको प्राप्त करनेके बाद जलरूपमे अवतीर्ण होकर पृथ्वीलोकमें मायापुर आयीं। नारद! स्वर्गसे ब्रह्मनदीने पृथ्वीलोकमें आकर सगरपुत्रोका उद्धार किया ओर जलनिधि सागरमें मिलकर वे पाताललोकतक प्राणियाका कल्याण करती रहती हैं॥ २५—२७॥ मुने! इस प्रकार सतीने अशरूपसे हिमालयकी पुत्री होकर भगवान् शकरको पतिरूपमें पुन प्राप्त किया। मुनिवर! भगवती सतीने ही अपने दूसरे रूप पूर्णावतारम पार्वतीरूपसे जन्म लेकर भगवान् शकरको पतिरूपसे प्राप्त किया॥ २८-२९॥

॥ इति श्रीमहाभागवते महापुराणे श्रीमहादेवनारदसवादे गङ्गाविवाहवर्णन नाम चतुर्दशोऽध्याय ॥ १४॥

॥ इस प्रकार श्रीमहाभागवतमहापुराणके अन्तर्गत महादेव-नारद-सवादमे 'गङ्गाविवाहवर्णन' नामक चौदहवाँ अध्याय पूर्ण हुआ॥ १४॥

पन्द्रहवाँ अध्याय

हिमालय और मेनाकी तपस्यासे प्रसन्न हो आद्यशक्तिका 'पार्वती' नामसे हिमालयके यहाँ प्रकट होना और उन्हे दिव्य विज्ञानयोगका उपदेश प्रदान करना (भगवतीगीताका प्रारम्भ)

नारद उवाच

ब्रूहि देव महेशान यथा सा परमेश्वरी।
बभूव मेनकागर्भे पूर्णभावेन पार्वती॥ १ ॥

श्रुत बहुपुराणेषु ज्ञायतेऽपि च यद्यपि।
जन्मकर्मादिक तस्यास्तथापि परमेश्वर॥ २ ॥

श्रोतु समिष्यते त्वत्तो यतस्त्व वेत्सि तत्त्वत ।
तद्वदस्व महादेव विस्तरेण महामते॥ ३ ॥

श्रीमहादेव उवाच

त्रैलोक्यजननी दुर्गा ब्रह्मरूपा सनातनी।
प्रार्थिता गिरिराजेन तत्पत्न्या मेनयापि च॥ ४ ॥

महोग्रतपसा पुत्रीभावेन मुनिपुङ्गव।
प्रार्थिता च महेशेन सतीविरहदु खिना॥ ५ ॥

प्रययौ मेनकागर्भे पूर्णब्रह्ममयी स्वयम्।
तत शुभदिने मेना राजीवसदृशाननाम्॥ ६ ॥

सुषुवे तनया देवीं सुप्रभा जगदम्बिकाम्।
ततोऽभवत्पुष्पवृष्टि सर्वतो मुनिसत्तम॥ ७ ॥

पुण्यगन्धो ववौ वायु प्रसन्नाश्च दिशो दश।
तथाद्रिराज श्रुत्वा तु पुत्रीं जाता शुभाननाम्॥ ८ ॥

तरुणादित्यकोट्याभा त्रिनेत्रा दिव्यरूपिणीम्।
अष्टहस्ता विशालाक्षीं चन्द्रार्धकृतशेखराम्॥ ९ ॥

मेने ता प्रकृति सूक्ष्मामाद्या जाता स्वलीलया।
तदा हृष्टमना भूत्वा विप्रेभ्यो प्रददौ बहु॥ १० ॥

धन वासासि च मुने दोग्ध्रीर्गाश्च सहस्रश ।
द्रष्टु प्रतिययौ चाशु बन्धुभि परिवारित ॥ ११ ॥

ततस्तामागत ज्ञात्वा गिरीन्द्र मेनका तदा।
प्रोवाच तनया पश्य राजन् राजीवलोचनाम्॥ १२ ॥

नारदजी बोले—महादेव! परमेश्वरी सती जिस प्रकार अपने पूर्णावतारमे पार्वतीरूपसे मेनकाके गर्भमे आयीं, उस कथाको कृपापूर्वक बताये॥ १ ॥ परमेश्वर! यद्यपि उन जगदम्बाके जन्म, कर्मादिकी कथा अनेक पुराणोमे सुनी गयी है तथा ज्ञात भी है तथापि उसे मैं आपसे अच्छी तरह सुनना चाहता हूँ, क्योकि आप इस वृत्तान्तको ठीक-ठीक जानते हैं। महामते! महादेव! इसलिये कृपाकर विस्तारपूर्वक वह कथा कहे॥ २-३ ॥

श्रीमहादेवजी बोले—मुनिश्रेष्ठ! गिरिराज और उनकी पत्नी मेनाने त्रैलोक्यमाता, सनातनी ओर ब्रह्मरूपा दुर्गादेवीकी महान् उग्र तपस्या करके उन्हे पुत्रीरूपसे पानेकी प्रार्थना की थी। भगवान् शिवने भी सतीके विरहसे दु खी होकर उन्हे प्राप्त करनेका अनुरोध किया था। अत ब्रह्मरूपा जगदम्बिका स्वय मेनाके गर्भमे आयीं। तदनन्तर देवी मेनाने शुभ दिनमे कमलके समान मुखवाली, सुन्दर प्रभावाली, जगन्माता भगवतीको पुत्रीरूपसे जन्म दिया। मुनिवर! उस समय सर्वत्र पुष्पवृष्टि होने लगी॥ ४—७ ॥ दसो दिशाओम प्रकाश फैल गया और सुगन्धित वायु बहने लगी। जब पर्वतराजने सुना कि उनके यहाँ सुन्दर कन्याने जन्म लिया है, जो करोडो मध्याह्नकालीन सूर्यके समान तेजस्विनी, तीन नेत्रोवाली, दिव्यस्वरूपा, बडी-बडी आँखोवाली, आठ भुजाओसे युक्त और मस्तकपर अर्धचन्द्रको धारण किये है तो उन्होने जान लिया कि सूक्ष्मा परा-प्रकृतिने ही अपनी लीलासे उनके यहाँ अवतार ग्रहण किया है। मुने! उन्होने हर्षित होकर ब्राह्मणाको प्रचुर धन, वस्त्र और हजारो दुधार गौएँ प्रदान कीं। तत्पश्चात् वे बन्धु-बान्धवोसहित शीघ्र ही कन्याको देखने पहुँचे॥ ८—११ ॥ गिरिराजको आया जानकर मेनाने उनसे कहा—राजन्! अपनी

आवयोस्तपसा जाता सर्वभूतहिताय च।
तत सोऽपि निरीक्ष्येना ज्ञात्वा ता जगदम्बिकाम्॥ १३॥

प्रणम्य शिरसा भूमौ कृताञ्जलिपुट स्थित ।
प्रोवाच वचन देवीं भक्त्या गद्गदया गिरा॥ १४॥

हिमालय उवाच

का त्व मातर्विशालाक्षि चित्ररूपा सुलक्षणा।
न जाने त्वामह वत्से यथावत्कथयस्व माम्॥ १५॥

श्रीदेव्युवाच

जानीहि मा परा शक्ति महेश्वरकृताश्रयाम्।
शाश्वतैश्वर्यविज्ञानमूर्तिं सर्वप्रवर्तिकाम्॥ १६॥

ब्रह्मविष्णुमहेशादिजननीं सर्वमुक्तिदाम्।
सृष्टिस्थितिविनाशाना विधात्रीं जगदम्बिकाम्॥ १७॥

अह सर्वान्तरस्था च ससारार्णवतारिणी।
नित्यानन्दमयी नित्या ब्रह्मरूपेश्वरीति च॥ १८॥

युवयास्तपसा तुष्टा पुत्रीभावेन लीलया।
जाता तव गृहे तात बहुभाग्यवशात्तव॥ १९॥

हिमालय उवाच

मातस्त्व कृपया गृहे मम सुता जातासि नित्यापि यद्-
भाग्य मे बहुजन्मजन्मजनित मन्ये महत्पुण्यदम्।
दृष्ट रूपमिद परात्परतरा मूर्ति भवान्या अपि
माहेशीं प्रति दर्शयाशु कृपया विश्वेशि तुभ्य नम ॥ २०॥

श्रीदेव्युवाच

ददामि चक्षुस्ते दिव्य पश्य मे रूपमैश्वरम्।
छिन्धि हृत्सशय विद्धि सर्वदेवमयीं पित ॥ २१॥

श्रीमहादेव उवाच

इत्युक्त्वा त गिरिश्रेष्ठ दत्त्वा विज्ञानमुत्तमम्।
स्वरूप दर्शयामास दिव्य माहेश्वर तदा॥ २२॥

शशिकोटिप्रभ चारुचन्द्रार्धकृतशेखरम्।
त्रिशूलवरहस्त च जटामण्डितमस्तकम्॥ २३॥

पुत्रीको देखिये, ये हम दोनाकी तपस्याका फल हैं और सभी प्राणियाके कल्याणहेतु प्रकट हुई हैं। तब गिरिराजने भी कन्याको देखकर उसे जगदम्बिकाके रूपमें जाना। भूमिपर सिर झुकाकर प्रणाम करते हुए हाथ जोडकर भक्तिपूर्वक गद्गद वाणीसे वे देवीसे कहने लगे॥ १२—१४॥

हिमालय बोले—माता! विशालाक्षी! इस विलक्षण विचित्र रूपमे आप कौन हैं ? पुत्री! मैं आपको नहीं जान पा रहा हूँ। मुझे यथावत् अपना वृत्तान्त बताइये॥ १५॥

श्रीदेवी बोलीं—परमेश्वर शिवकी आश्रिता मुझे पराशक्ति समझो। मैं सारी सृष्टिका सचालन करती हूँ तथा शाश्वत ज्ञान और ऐश्वर्यकी मूर्ति हूँ। मैं ही ब्रह्मा, विष्णु और महेश आदिकी जन्मदात्री हूँ और सृष्टि, स्थिति, विनाशका विधान करनेवाली मुक्तिदायिनी जगदम्बिका हूँ। मैं सबकी अन्तरात्माके रूपमे स्थित हूँ और ससारसमुद्रसे उद्धार करनेवाली हूँ। मुझे नित्यानन्दमयी ब्रह्मरूपा नित्या महेश्वरी समझो। तात! तुम दोनाकी तपस्यासे सन्तुष्ट होकर मैंने अपनी लीलासे तुम्हारी पुत्री बनकर तुम्हारे घरमे जन्म लिया है। तुम बहुत भाग्यशाली हो॥ १६—१९॥

हिमालय बोले—माता! आपने नित्या होकर भी कृपापूर्वक मेरे घरमे पुत्रीरूपसे जन्म लिया है, यह मेरे अनेक जन्मामे किये पुण्याका ही फल है तथा इसे मैं अपना सौभाग्य मानता हूँ। मैंने आपका यह रूप देख लिया। अब आप परात्पर भगवतीका दिव्य शिवप्रियारूप मुझे कृपापूर्वक शीघ्र ही दिखाये। विश्वेश्वरी! आपको नमस्कार है॥ २०॥

श्रीदेवी बोलीं—पिताजी! मैं आपको दिव्य चक्षु प्रदान करती हूँ, जिनसे मेरे ऐश्वर्यशाली रूपके दर्शन कर आप अपने हृदयका सशय मिटा लीजिये और मुझे ही सर्वदेवमयी समझिये॥ २१॥

श्रीमहादेवजी बोले—ऐसा कहकर गिरिराज हिमवान्‌को दिव्य दृष्टि प्रदान कर जगदम्बाने अपने अलौकिक माहेश्वरस्वरूपके दर्शन कराये॥ २२॥ उनका वह ज्योतिर्मय रूप करोडो चन्द्रमाओंकी प्रभासे युक्त था, उनके मस्तकपर अर्धचन्द्रकी सुन्दर लेखा विराजमान थी। उनके हाथमे श्रेष्ठ त्रिशूल और मस्तकपर जटाएँ सुशोभित हो रही

भयानक घोररूप कालानलसहस्त्रभम्।
पञ्चवक्त्र त्रिनेत्र च नागयज्ञोपवीतिनम्॥ २४॥

द्वीपिचर्माम्बरधर नागेन्द्रकृतभूषणम्।
एव विलोक्य तद्रूप विस्मितो हिमवान् पुन ॥ २५॥

प्रोवाच वचन माता रूपमन्यत्प्रदर्शय।
तत सहृत्य तद्रूप दर्शयामास तत्क्षणात्॥ २६॥

रूपमन्यन्मुनिश्रेष्ठ विश्वरूपा सनातनी।
शरच्चन्द्रनिभ चारुमुकुटोज्ज्वलमस्तकम्॥ २७॥

शङ्खचक्रगदापद्महस्त नेत्रत्रयोज्ज्वलम्।
दिव्यमाल्याम्बरधर दिव्यगन्धानुलेपनम्॥ २८॥

योगीन्द्रवृन्दसवन्द्य सुचारुचरणाम्बुजम्।
सर्वत पाणिपाद च सर्वतोऽक्षिशिरोमुखम्॥ २९॥

दृष्ट्वा तदेतत्परम रूप स हिमवान् पुन ।
प्रणम्य तनया प्राह विस्मयोत्फुल्ललोचन ॥ ३०॥

हिमालय उवाच

मातस्तवेद परम रूपमैश्वरमुत्तमम्।
विस्मितोऽस्मि समालोक्य रूपमन्यत्प्रदर्शय॥ ३१॥

त्व यस्य सो ह्यशोच्यो हि धन्यश्च परमेश्वरि।
अनुगृह्णीष्व मातर्मा कृपया त्वा नमो नम ॥ ३२॥

श्रीमहादेव उवाच

इत्युक्ता सा तदा पित्रा शैलराजेन पार्वती।
तद्रूपमपि सहृत्य दिव्य रूप समादधे॥ ३३॥

नीलोत्पलदलश्याम वनमालाविभूषितम्।
शङ्खचक्रगदापद्ममभिव्यक्त चतुर्भुजम्॥ ३४॥

एव विलोक्य तद्रूप शैलानामधिपस्तत ।
कृताञ्जलिपुट स्थित्वा हर्षेण महता युत ॥ ३५॥

स्तोत्रेणानेन ता देवीं तुष्टाव परमेश्वरीम्।
सर्वदेवमयीमाद्या ब्रह्मविष्णुशिवात्मिकाम्॥ ३६॥

थीं। हजारो कालाग्निकी आभाके समान उनका रूप भयानक और उग्र था। उनके पाँच मुख और तीन नेत्र थे तथा उन्होने सर्पका यज्ञोपवीत धारण कर रखा था। इस प्रकार व्याघ्रचर्मको धारण किये हुए तथा श्रेष्ठ सर्पोके आभूषणसे सुशोभित उनके उस रूपको देखकर हिमवान् बडे चकित हुए॥ २३—२५॥ तब उनकी माँ मेनाने कहा कि मुझे अपना दूसरा रूप दिखाइये, तब जगदम्बाने अपने उस माहेश्वररूपको तिरोहित करके तत्क्षण ही दूसरा रूप प्रकट किया। मुनिश्रेष्ठ! उन सनातनी विश्वरूपा जगदम्बाकी आभा शरत्कालके चन्द्रमाके समान थी, सुन्दर मुकुटसे उनका मस्तक प्रकाशमान था। वे हाथोमे शङ्ख, चक्र, गदा एव पद्म धारण किये हुए थीं। उनके तीन सुन्दर नेत्र थे। उन्होने दिव्य वस्त्र, माला और गन्धानुलेप धारण कर रखा था। वे योगीन्द्रवृन्दसे वन्दनीय थीं, उनके चरणकमल अति सुन्दर थे तथा अपने हाथ, पेर, आँख, मुख, सिर आदि दिव्य विग्रहसे वे सभी दिशाओको व्याप्त किये हुए थीं। इस प्रकारके परम अद्भुत उस रूपको देखकर हिमवान्ने अपनी कन्याको पुन प्रणाम किया और विस्मयपूर्ण विकसित नेत्रोसे उन्हे देखते हुए वे बोले—॥ २६—३०॥

हिमालय बोले—माता! आपका यह श्रेष्ठ रूप भी परम ऐश्वर्यसे सम्पन्न है, जिसे देखकर मैं चकित हूँ। मुझे तो कोई अन्य ही रूप दिखाइये। परमेश्वरी! आप जिसकी आश्रय हैं, वह व्यक्ति निश्चय ही अशोच्य और धन्य है। माँ! कृपापूर्वक मुझपर अनुग्रह करे, आपको बारम्बार नमस्कार है॥ ३१-३२॥

युगानुकारिणी, यज्ञरूपा, सूर्यसमप्रभा, युगान्तानिलवेगा, सर्वयज्ञफलप्रदा, संसारयोनि, संसारव्यापिनी, सकलास्पदा, संसारतरुनि सेव्या, संसारार्णवतारिणी, सर्वार्थसाधिका, सर्वा, संसारव्यापिनी, संसारबन्धकर्त्री, संसारपरिवर्जिता, दुर्निरीक्ष्या, सुदुष्प्राप्या, भूति, भूतिमती, अत्यन्तविभवारूपा, महाविभवरूपिणी, शब्दब्रह्मस्वरूपा, शब्दयोनि, परात्परा, भूतिदा, भूतिमाता, भूति, तन्द्री, विभूतिदा॥ ९६—१०० ॥ भूतान्तरस्था, कूटस्था, भूतनाथप्रियाङ्गना, भूतमाता, भूतनाथा, भूतालयनिवासिनी, भूतनृत्यपिया, भूतसङ्गिनी, भूतलाश्रया, जन्ममृत्युजरातीता, महापुरुषसङ्गता, भुजगा, तामसी, व्यक्ता, तमोगुणवती, त्रितत्त्वतत्त्वरूपा, तत्त्वज्ञा, तत्त्वकप्रिया, त्र्यम्बका, त्र्यम्बकरता, शुक्ला, त्र्यम्बकरूपिणी, त्रिकालज्ञा, जन्महीना, रक्ताङ्गी, ज्ञानरूपिणी, अकार्या, कार्यजननी, ब्रह्माख्या, ब्रह्मसंस्थिता, वैराग्ययुक्ता, विज्ञानगम्या, धर्मस्वरूपिणी॥ १०१—१०५ ॥ सर्वधर्मविधानज्ञा, धर्मिष्ठा, धर्मतत्परा, धर्मिष्ठपालनकरी धर्मशास्त्रपरायणा, धर्मा, अधर्मविहीना, धर्मजन्यफलप्रदा, धर्मिणी, धर्मनिरता, धर्मिणामिष्टदायिनी, धन्या, धी, धारणा, धीरा, धन्वनी, धनदायिनी, धनुष्मती, धरासंस्था धरणिस्थितिकारिणी, सर्वयोनि, विश्वयोनि, अपायोनि, अयोनिजा, रुद्राणी, रुद्रवनिता, रुद्रैकादशरूपिणी, रुद्राक्षमालिनी, रौद्री भुक्तिमुक्तिफलप्रदा, ब्रह्मोपेन्द्रप्रवन्द्या, नित्य मुदितमानसा॥ १०६—११० ॥ इन्द्राणी वासवी, ऐन्द्री, विचित्रा, ऐरावतस्थिता, [illegible], दिव्याङ्गा, दिव्यकेशविलासिनी, [illegible] [illegible], दिव्यचन्दनचर्चिता, [illegible], दिव्यश्वेतचामरवीजिता, [illegible] [illegible], दिव्यनूपुर[illegible] केयूरशोभिता, [illegible], [illegible]चित्तप्रहर्षिणी [illegible] [illegible], [illegible]पादा[illegible], देव[illegible] रजसा, [illegible], रक्तपुष्पप्रिया [illegible] [illegible] ॥ १११—११५ ॥

रक्ताभा रक्तवस्त्रा च रक्तचन्दनचर्चिता।
रक्तेक्षणा रक्तभक्ष्या रक्तमत्तोरगाश्रया॥ ११६॥
रक्तदन्ता रक्तजिह्वा रक्तभक्षणतत्परा।
रक्तप्रिया रक्ततुष्टा रक्तपानसुतत्परा॥ ११७॥
बन्धूककुसुमाभा च रक्तमाल्यानुलेपना।
स्फुरद्रक्ताञ्चिततनु स्फुरत्सूर्यशतप्रभा॥ ११८॥
स्फुरन्नेत्रा पिङ्गजटा पिङ्गला पिङ्गलेक्षणा।
बगला पीतवस्त्रा च पीतपुष्पप्रिया सदा॥ ११९॥
पीताम्बरा पिबद्रक्ता पीतपुष्पोपशोभिता।
शत्रुघ्नी शत्रुसम्मोहजननी शत्रुतापिनी॥ १२०॥
शत्रुप्रमर्दिनी शत्रुवाक्यस्तम्भनकारिणी।
उच्चाटनकरी सर्वदुष्टोत्सारणकारिणी॥ १२१॥
शत्रुविद्राविणी शत्रुसम्मोहनकरी तथा।
विपक्षमर्दनकरी शत्रुपक्षक्षयङ्करी॥ १२२॥
सर्वदुष्टघातिनी च सर्वदुष्टविनाशिनी।
द्विभुजा शूलहस्ता च त्रिशूलवरधारिणी॥ १२३॥
दुष्टसन्तापजननी दुष्टक्षोभप्रवर्धिनी।
दुष्टाना क्षोभसम्बद्धा भक्तक्षोभनिवारिणी॥ १२४॥
दुष्टसन्तापिनी दुष्टसन्तापपरिमर्दिनी।
सन्तापरहिता भक्तसन्तापपरिनाशिनी॥ १२५॥
अद्वैता द्वैतरहिता निष्कला ब्रह्मरूपिणी।
त्रिदशेशी त्रिलोकेशी सर्वेशी जगदीश्वरी॥ १२६॥
ब्रह्मेशसेवितपदा सर्ववन्द्यपदाम्बुजा।
अचिन्त्यरूपचरिता चाचिन्त्यबलविक्रमा॥ १२७॥
सर्वाचिन्त्यप्रभावा च स्वप्रभावप्रदर्शिनी।
अचिन्त्यमहिमाचिन्त्यरूपसौन्दर्यशालिनी॥ १२८॥
अचिन्त्यवेशशोभा च लोकाचिन्त्यगुणान्विता।
अचिन्त्यशक्तिर्दुश्चिन्त्यप्रभावा चिन्त्यरूपिणी॥ १२९॥
योगचिन्त्या महाचिन्तानाशिनी चेतनात्मिका।
गिरिजा दक्षजा विश्वजनयित्री जगत्प्रसू॥ १३०॥
सनम्या प्रणता सर्वप्रणतार्तिहरा तथा।
प्रणतैश्वर्यदा सर्वप्रणताशुभनाशिनी॥ १३१॥
प्रणतापन्नाशकरी प्रणताशुभमाचनी।
सिद्धेश्वरी सिद्धसेव्या सिद्धचारणसेविता॥ १३२॥
सिद्धिप्रदा सिद्धिकरी सर्वसिद्धगणेश्वरी।
अष्टसिद्धिप्रदा सिद्धगणसेव्यपदाम्बुजा॥ १३३॥
कात्यायनी स्वधा स्वाहा वषड्वौषट्स्वरूपिणी।
पितृणा तृप्तिजननी कव्यरूपा सुरेश्वरी॥ १३४॥
हव्यभोक्त्री हव्यतुष्टा पितृरूपाऽसितप्रिया।
कृष्णपक्षप्रपूज्या च प्रेतपक्षसमर्पिता॥ १३५॥

रक्ताभा, रक्तवस्त्रा, रक्तचन्दनचर्चिता, रक्तेक्षणा रक्तभक्ष्या, रक्तमत्ता, उरगाश्रया, रक्तदन्ता, रक्तजिह्वा, रक्तभक्षणतत्परा, रक्तप्रिया, रक्ततुष्टा, रक्तपानसुतत्परा बन्धूककुसुमाभा, रक्तमाल्या, रक्तानुलेपना, स्फुरद्रक्ताञ्चिततनु, स्फुरत्सूर्यशतप्रभा, स्फुरन्नेत्रा, पिङ्गजटा, पिङ्गला, पिङ्गलेक्षणा, बगला, पीतवस्त्रा, पीतपुष्पप्रिया, पीताम्बरा, पिबद्रक्ता, पीतपुष्पोपशोभिता, शत्रुघ्नी, शत्रुसम्मोहजननी, शत्रुतापिनी॥ ११६—१२०॥ शत्रुप्रमर्दिनी, शत्रुवाक्यस्तम्भनकारिणी, उच्चाटनकरी, सर्वदुष्टोत्सारण-कारिणी, शत्रुविद्राविणी, शत्रुसम्मोहनकरी, विपक्षमर्दनकरी, शत्रुपक्षक्षयङ्करी, सर्वदुष्टघातिनी, सर्वदुष्टविनाशिनी, द्विभुजा, शूलहस्ता, त्रिशूलवरधारिणी, दुष्टसतापजननी, दुष्टक्षोभप्रवर्धिनी, दुष्टाना क्षोभसम्बद्धा, भक्तक्षोभनिवारिणी, दुष्टसतापिनी, दुष्टसतापपरिमर्दिनी, सतापरहिता, भक्तसतापपरिनाशिनी॥ १२१—१२५॥ अद्वैता, द्वैतरहिता, निष्कला, ब्रह्मरूपिणी, त्रिदशेशी, त्रिलोकेशी, सर्वेशी, जगदीश्वरी, ब्रह्मेशसेवितपदा, सर्ववन्द्यपदाम्बुजा, अचिन्त्यरूपचरिता, अचिन्त्यबलविक्रमा, सर्वाचिन्त्य-प्रभावा, स्वप्रभावप्रदर्शिनी, अचिन्त्यमहिमा, अचिन्त्यरूप-सौन्दर्यशालिनी, अचिन्त्यवेशशोभा, लोकाचिन्त्यगुणान्विता, अचिन्त्यशक्ति, दुश्चिन्त्यप्रभावा, चिन्त्यरूपिणी, योगचिन्त्या, महाचिन्तानाशिनी, चेतनात्मिका, गिरिजा, दक्षजा विश्वजनयित्री, जगत्प्रसू॥ १२६—१३०॥ सनम्या, प्रणता सर्वप्रणतार्तिहरा, प्रणतैश्वर्यदा, सर्वप्रणता, अशुभनाशिनी, प्रणतापन्नाशकरी, प्रणताशुभमोचनी, सिद्धेश्वरी, सिद्धसेव्या, सिद्धचारणसेविता, सिद्धिप्रदा, सिद्धिकरी, सर्वसिद्धगणेश्वरी, अष्टसिद्धिप्रदा, सिद्धगणसेव्यपदाम्बुजा, कात्यायनी, स्वधा, स्वाहा, वषड्वौषट्स्वरूपिणी, पितृणा तृप्तिजननी, कव्यरूपा, सुरेश्वरी हव्यभोक्त्री, हव्यतुष्टा, पितृरूपा, असितप्रिया कृष्णपक्षप्रपूज्या, प्रतपक्षसमर्पिता॥ १३१—१३५॥

अष्टहस्ता दशभुजा चाष्टादशभुजान्विता।
चतुर्दशभुजाऽसख्यभुजवल्लीविराजिता ॥ १३६ ॥
सिंहपृष्ठसमारूढा सहस्रभुजराजिता।
भुवनेशी चान्नपूर्णा महात्रिपुरसुन्दरी ॥ १३७ ॥
त्रिपुरा सुन्दरी सौम्यमुखी सुन्दरलोचना।
सुन्दरास्या शुभदंष्ट्रा सुभ्रू पर्वतनन्दिनी ॥ १३८ ॥
नीलोत्पलदलश्यामा स्मेरोत्फुल्लमुखाम्बुजा।
सत्यसंधा पद्मवक्त्रा भ्रूकुटीकुटिलानना ॥ १३९ ॥
विद्याधरी वरारोहा महासंध्यास्वरूपिणी।
अरुन्धती हिरण्याक्षी सुधूम्राक्षी शुभेक्षणा ॥ १४० ॥
श्रुति स्मृति कृतिर्योगमाया पुण्या पुरातनी।
वाग्देवता वेदविद्या ब्रह्मविद्यास्वरूपिणी ॥ १४१ ॥
वेदशक्तिर्वेदमाता वेदाद्या परमागति।
आन्वीक्षिकी तर्कविद्या योगशास्त्रप्रकाशिनी ॥ १४२ ॥
धूमावती वियन्मूर्तिर्विद्युन्मालाविलासिनी।
महाव्रता सदानन्दनन्दिनी नगनन्दिनी ॥ १४३ ॥
सुनन्दा यमुना चण्डी रुद्रचण्डी प्रभावती।
पारिजातवनावासा पारिजातवनप्रिया ॥ १४४ ॥
सुपुष्पगन्धसंतुष्टा दिव्यपुष्पोपशोभिता।
पुष्पकाननसद्वासा पुष्पमालाविलासिनी ॥ १४५ ॥
पुष्पमाल्यधरा पुष्पगुच्छालंकृतदेहिका।
प्रतप्तकाञ्चनाभासा शुद्धकाञ्चनमण्डिता ॥ १४६ ॥
सुवर्णकुण्डलवती स्वर्णपुष्पप्रिया सदा।
नर्मदा सिन्धुनिलया समुद्रतनया तथा ॥ १४७ ॥
षोडशी षोडशभुजा महाभुजगमण्डिता।
पातालवासिनी नागी नागेन्द्रकृतभूषणा ॥ १४८ ॥
नागिनी नागकन्या च नागमाता नगालया।
दुर्गापत्तारिणी दुर्गदुष्टग्रहनिवारिणी ॥ १४९ ॥
अभयापन्निहन्त्री च सर्वापत्परिनाशिनी।
ब्रह्मण्या श्रुतिशास्त्रज्ञा जगता कारणात्मिका ॥ १५० ॥
निष्कारणा जन्महीना मृत्युञ्जयमनोरमा।
मृत्युञ्जयहृदावासा मूलाधारनिवासिनी ॥ १५१ ॥
षट्चक्रसंस्था महती महोत्सवविलासिनी।
रोहिणी सुन्दरमुखी सर्वविद्याविशारदा ॥ १५२ ॥
सदसद्वस्तुरूपा च निष्कामा कामपीडिता।
कामातुरा काममत्ता काममानससत्तनु ॥ १५३ ॥
कामरूपा च कालिन्दी कचालम्बितविग्रहा।
अतसीकुसुमाभासा सिंहपृष्ठनिषेदुषी ॥ १५४ ॥
युवती यौवनोद्रिक्ता यौवनोद्रिक्तमानसा।
अदितिर्देवजननी त्रिदशार्तिविनाशिनी ॥ १५५ ॥

अष्टहस्ता, दशभुजा, अष्टादशभुजान्विता, चतुर्दशभुजा, असंख्यभुजवल्लीविराजिता, सिंहपृष्ठसमारूढा, सहस्रभुजराजिता, भुवनेशी, अन्नपूर्णा, महात्रिपुरसुन्दरी, त्रिपुरा, सुन्दरी, सौम्यमुखी, सुन्दरलोचना, सुन्दरास्या, शुभदंष्ट्रा, सुभ्रू, पर्वतनन्दिनी, नीलोत्पलदलश्यामा, स्मेरोत्फुल्ल-मुखाम्बुजा, सत्यसंधा, पद्मवक्त्रा, भ्रूकुटीकुटिलानना, विद्याधरी, वरारोहा, महासंध्यास्वरूपिणी, अरुन्धती, हिरण्याक्षी, सुधूम्राक्षी, शुभेक्षणा ॥ १३६—१४० ॥ श्रुति, स्मृति, कृति, योगमाया, पुण्या, पुरातनी, वाग्देवता, वेदविद्या, ब्रह्मविद्यास्वरूपिणी, वेदशक्ति, वेदमाता, वेदाद्या, परमागति, आन्वीक्षिकी, तर्कविद्या, योगशास्त्र-प्रकाशिनी, धूमावती, वियन्मूर्ति, विद्युन्मालाविलासिनी, महाव्रता, सदानन्दनन्दिनी, नगनन्दिनी, सुनन्दा, यमुना, चण्डी, रुद्रचण्डी, प्रभावती, पारिजातवनावासा, पारिजातवनप्रिया, सुपुष्पगन्धसंतुष्टा, दिव्यपुष्पोपशोभिता, पुष्पकाननसद्वासा, पुष्पमालाविलासिनी ॥ १४१—१४५ ॥ पुष्पमाल्यधरा, पुष्पगुच्छालंकृतदेहिका, प्रतप्तकाञ्चनाभासा, शुद्धकाञ्चनमण्डिता, सुवर्णकुण्डलवती, स्वर्णपुष्पप्रिया, नर्मदा, सिन्धुनिलया, समुद्रतनया, षोडशी, षोडशभुजा, महाभुजगमण्डिता, पातालवासिनी, नागी, नागेन्द्रकृतभूषणा, नागिनी, नागकन्या, नागमाता, नगालया, दुर्गापत्तारिणी, दुर्गदुष्टग्रहनिवारिणी, अभया, आपन्निहन्त्री, सर्वापत्परिनाशिनी, ब्रह्मण्या, श्रुतिशास्त्रज्ञा, जगता कारणात्मिका ॥ १४६—१५० ॥

निष्कारणा, जन्महीना, मृत्युञ्जयमनोरमा, मृत्युञ्जयहृदावासा मूलाधारनिवासिनी, षट्चक्रसंस्था, महती, महोत्सवविलासिनी, रोहिणी, सुन्दरमुखी, सर्वविद्याविशारदा, सदसद्वस्तुरूपा, निष्कामा, कामपीडिता, कामातुरा, काममत्ता, काममानससत्तनु, कामरूपा, कालिन्दी, कचालम्बितविग्रहा, अतसीकुसुमाभासा, सिंहपृष्ठनिषेदुषी युवती यौवनोद्रिक्ता, यौवनोद्रिक्तमानसा, अदिति, देवजननी, त्रिदशार्तिविनाशिनी ॥ १५१—१५५ ॥

दक्षिणाऽपूर्ववसना पूर्वकालविवर्जिता।
अशोका शोकरहिता सर्वशोकनिवारिणी॥ १५६॥
अशोककुसुमाभासा शोकदु:खक्षयङ्करी।
सर्वयोपित्स्वरूपा च सर्वप्राणिमनोरमा॥ १५७॥
महाश्चर्या मदाश्चर्या महामोहस्वरूपिणी।
महामोक्षकरी मोहकारिणी मोहदायिनी॥ १५८॥
अशोच्या पूर्णकामा च पूर्णा पूर्णमनोरथा।
पूर्णाभिलपिता पूर्णनिशानाथसमानना॥ १५९॥
द्वादशार्कस्वरूपा च सहस्रार्कसमप्रभा।
तेजस्विनी सिद्धमात्रा चन्द्रानयनरक्षणा॥ १६०॥
अपरापारमाहात्म्या नित्यविज्ञानशालिनी।
विवस्वती हव्यवाहा जातवेद स्वरूपिणी॥ १६१॥
स्वैरिणी स्वेच्छविहरा निर्बीजा बीजरूपिणी।
अनन्तवर्णाऽनन्ताख्याऽनन्तसस्था महोदरी॥ १६२॥
दुष्टभूतापहन्त्री च सद्वृत्तपरिपालिका।
कपारिनी पानमत्ता मत्तवारणगामिनी॥ १६३॥
विन्ध्यस्था विन्ध्यनिलया विन्ध्यपर्वतवासिनी।
बन्धुप्रिया जगद्बन्धु पवित्रा सपवित्रिणी॥ १६४॥
परामृताऽमृतकला चापमृत्युविनाशिनी।
महारजतसकाशा रजताद्रिनिवासिनी॥ १६५॥
काशीविलासिनी काशीक्षेत्ररक्षणतत्परा।
योनिरूपा योनिपीठस्थिता योनिस्वरूपिणी॥ १६६॥
कामालसितचार्वङ्गी कटाक्षक्षेपमोहिनी।
कटाक्षक्षेपनिरता कल्पवृक्षस्वरूपिणी॥ १६७॥
पाशाङ्कुशधरा शक्तिर्धारिणी खेटकायुधा।
बाणायुधाऽमोघशस्त्रा दिव्यशस्त्रास्त्रवर्षिणी॥ १६८॥
महास्त्रजालविक्षेपविपक्षक्षयकारिणी।
घण्टिनी पाशिनी पाशहस्ता पाशाङ्कुशायुधा॥ १६९॥
चित्रसिंहासनगता महासिंहासनस्थिता।
मन्त्रात्मिका मन्त्रबीजा मन्त्राधिष्ठातृदेवता॥ १७०॥
सुरूपाऽनेकरूपा च विरूपा बहुरूपिणी।
विरूपाक्षप्रियतमा विरूपाक्षमनोरमा॥ १७१॥
विरूपाक्षा कोटराक्षी कूटस्था कूटरूपिणी।
करालास्या विशालास्या धर्मशास्त्रार्थपारगा॥ १७२॥
अध्यापयित्री शास्त्रार्थकुशला शैलनन्दिनी।
नगाधिराजपुत्री च नगपुत्री नगोद्भवा॥ १७३॥
गिरीन्द्रबाला गिरिशप्राणतुल्या मनोरमा।
प्रसन्ना चारुवदना प्रसन्नास्या प्रसन्नदा॥ १७४॥
शिवप्राणा पतिप्राणा पतिसम्मोहकारिणी।
मृगाक्षी चञ्चलापाङ्गी सुदृष्टिर्हंसगामिनी॥ १७५॥

दक्षिणा, अपूर्ववसना, पूर्वकालविवर्जिता, अशोका, शोकरहिता, सर्वशोकनिवारिणी, अशोककुसुमाभासा, शोकदु:खक्षयङ्करी, सर्वयोपित्स्वरूपा, सर्वप्राणिमनोरमा, महाश्चर्या, मदाश्चर्या, महामोहस्वरूपिणी, महामोक्षकरा, मोहकारिणी, मोहदायिनी, अशोच्या, पूर्णकामा, पूर्णा, पूर्णमनोरथा, पूर्णाभिलपिता, पूर्णनिशानाथसमानना, द्वादशार्कस्वरूपा, सहस्रार्कसमप्रभा, तेजस्विनी, सिद्धमात्रा, चन्द्रानयनरक्षणा॥ १५६—१६०॥ अपरा, अपारमाहात्म्या, नित्यविज्ञानशालिनी, विवस्वती, हव्यवाहा, जातवेद स्वरूपिणी, स्वैरिणी, स्वेच्छविहरा, निर्बीजा, बीजरूपिणी, अनन्तवर्णा, अनन्ताख्या, अनन्तसस्था महोदरी, दुष्टभूतापहन्त्री, सद्वृत्तपरिपालिका, कपालिनी पानमत्ता, मत्तवारणगामिनी, विन्ध्यस्था, विन्ध्यनिलया विन्ध्यपर्वतवासिनी, बन्धुप्रिया, जगद्बन्धु, पवित्रा, सपवित्रिणी, परा, अमृता, अमृतकला, अपमृत्युविनाशिनी, महारजतसकाशा, रजताद्रिनिवासिनी॥ १६१—१६५॥

काशीविलासिनी, काशीक्षेत्ररक्षणतत्परा, योनिरूपा योनिपीठस्थिता, योनिस्वरूपिणी, कामालसित चार्वङ्गी, कटाक्षक्षेपमोहिनी, कटाक्षक्षेपनिरता कल्पवृक्षस्वरूपिणी, पाशाङ्कुशधरा शक्ति, धारिणी, खेटकायुधा, बाणायुधा, अमोघशस्त्रा, दिव्यशस्त्रास्त्रवर्षिणी, महास्त्रजालविक्षेपविपक्षक्षयकारिणी, घण्टिनी पाशिनी, पाशहस्ता पाशाङ्कुशायुधा, चित्रसिंहासनगता महासिंहासनस्थिता, मन्त्रात्मिका, मन्त्रबीजा मन्त्राधिष्ठातृदेवता॥ १६६—१७०॥

सुरूपा, अनेकरूपा विरूपा बहुरूपिणी विरूपाक्षप्रियतमा विरूपाक्षमनोरमा विरूपाक्षा कोटराक्षी कूटस्था, कूटरूपिणी, करालास्या विशालास्या धर्मशास्त्रार्थपारगा अध्यापयित्री शास्त्रार्थकुशला, शैलनन्दिनी नगाधिराजपुत्री नगपुत्री नगोद्भवा गिरीन्द्रबाला गिरिशप्राणतुल्या मनोरमा प्रसन्ना, चारुवदना प्रसन्नास्या प्रसन्नदा शिवप्राणा पतिप्राणा पति-सम्मोहकारिणी मृगाक्षी चञ्चलापाङ्गी सुदृष्टि

नित्य कुतूहलपरा नित्यानन्दाभिनन्दिता।
सत्यविज्ञानरूपा च तत्त्वज्ञानैककारिणी॥ १७६॥

त्रैलोक्यसाक्षिणी लोकधर्माधर्मप्रदर्शिनी।
धर्माधर्मविधात्री च शम्भुप्राणात्मिका परा॥ १७७॥

मेनकागर्भसम्भूता मैनाकभगिनी तथा।
श्रीकण्ठाकण्ठहारा च श्रीकण्ठहृदयस्थिता॥ १७८॥

श्रीकण्ठकण्ठजप्या च नीलकण्ठमनोरमा।
कालकूटात्मिका कालकूटभक्षणकारिणी॥ १७९॥

महाकालप्रिया कालकलनैकविधायिनी।
अक्षोभ्यपत्नी सक्षोभनाशिनी ते नमो नम ॥ १८०॥

श्रीमहादेव उवाच

एव नामसहस्रेण सस्तुता पर्वतात्मजा।
वाक्यमेतन्महेशानमुवाच मुनिसत्तम॥ १८१॥

श्रीदेव्युवाच

अह त्वदर्थे शैलेन्द्रतनयात्वमुपागता।
त्व मे प्राणसमो भर्ता त्वदनन्याहमङ्गना॥ १८२॥

त्व मदर्थे तपस्तीव्र सुचिर कृतवानसि।
अह च तपसाराध्या त्वा लप्स्यामि पुन पतिम्॥ १८३॥

श्रीमहादेव उवाच

त्वमाराध्यतमा सर्वजननी प्रकृति परा।
तवाराध्यो जगत्यत्र विद्यते नैव कोऽपि हि॥ १८४॥

अह त्वया निजगुणैरनुग्राह्यो महेश्वरि।
प्रार्थनीयस्त्वयि शिवे एष एव वरो मम॥ १८५॥

यत्र यत्र तवेद हि कालीरूप मनोहरम्।
आविर्भवति तत्रैव शिवरूपस्य मे हृदि॥ १८६॥

सस्थातव्य त्वया लोके ख्याता च शववाहना।
भविष्यसि महाकाली प्रसीद जगदम्बिके॥ १८७॥

श्रीमहादेव उवाच

इत्युक्ता शम्भुना काली कालमेघसमप्रभा।
तथेत्युक्त्वा समभवत्पुनर्गौरी यथा पुरा॥ १८८॥

हसगामिनी॥ १७१—१७५॥ नित्य कुतूहलपरा, नित्यानन्दा, अभिनन्दिता, सत्यविज्ञानरूपा, तत्त्वज्ञानैककारिणी, त्रैलोक्यसाक्षिणी, लोकधर्माधर्मप्रदर्शिनी, धर्माधर्मविधात्री, शम्भुप्राणात्मिका, परा, मेनकागर्भसम्भूता, मैनाकभगिनी, श्रीकण्ठाकण्ठहारा, श्रीकण्ठहृदयस्थिता, श्रीकण्ठकण्ठ-जप्या, नीलकण्ठमनोरमा, कालकूटात्मिका, कालकूट-भक्षणकारिणी, महाकालप्रिया, कालकलनैकविधायिनी, अक्षोभ्यपत्नी, सक्षोभनाशिनी [देवी!] आपको बार-बार नमस्कार है॥ १७६—१८०॥

श्रीमहादेवजी बोले—मुनिश्रेष्ठ! इस प्रकार सहस्रनामसे स्तुति करनेपर गिरिराजपुत्री पार्वतीजीने शकरजीसे यह बात कही—॥ १८१॥

श्रीदेवीजी बोलीं—मैं आपके लिये ही गिरिराजके पुत्रीभावको प्राप्त हुई हूँ। आप मेरे प्राणके समान पति हैं तथा मैं आपकी अनन्य अर्धाङ्गिनी हूँ। आपने मेरे लिये दीर्घकालतक कठिन तपस्या की है और मैं तपस्याके द्वारा आराधित होकर पुन आपको पतिके रूपमे प्राप्त करूँगी॥ १८२-१८३॥

श्रीमहादेवजी बोले—आप श्रेष्ठतम आराध्या, सभीकी माता तथा पराप्रकृति हैं। इस जगत्मे आपके लिये कोई भी आराध्य नहीं है। आप अपने कृपापरवत्ता आदि गुणोसे मेरे ऊपर अनुग्रह करे। शिवे! मैं इसी वरके लिये आपसे प्रार्थना करता हूँ॥ १८४-१८५॥ जहाँ-जहाँ आपका यह सुन्दर कालीरूप स्थापित हो, वहाँ मेरे हृदयपर भी कल्याणकारी उस रूपकी स्थापना हो और जगदम्बिके! आप इस ससारमे शववाहना महाकालीके नामसे विख्यात होगी। आप मुझपर प्रसन्न होइये॥ १८६-१८७॥

श्रीमहादेवजी बोले—भगवान् शकरके द्वारा इस प्रकार कहनेपर प्रलयकालीन मेघके समान कान्तिमान् भगवती काली 'ऐसा ही हो'—इस प्रकार कहकर पुन गौरीके रूपमे पूर्ववत् परिणत हो गयीं॥ १८८॥

य इद पठते देव्या नाम्ना भक्त्या सहस्रकम्।
स्तोत्र श्रीशम्भुना प्रोक्त स देव्या समतामियात्॥ १८९॥

अभ्यर्च्य गन्धपुष्पैश्च धूपदीपैर्महेश्वरीम्।
य पठेत्स्तोत्रमेतच्च स लभेत्परम पदम्॥ १९०॥

अनन्यमनसा देवीं स्तोत्रेणानेन यो नर ।
सस्तौति प्रत्यह तस्य सर्वसिद्धि प्रजायते॥ १९१॥

राजानो वशगास्तस्य नश्यन्ति रिपवस्तथा।
सिहव्याघ्रमुखा सर्वे हिंसका दस्यवस्तथा॥ १९२॥

दूरादेव पलायन्ते तस्य दर्शनमात्रत ।
अव्याहताज्ञ सर्वत्र लभते मङ्गल महत्॥ १९३॥

अन्ते दुर्गास्मृति लब्ध्वा स्वय देवीकलामियात्॥ १९४॥

जो व्यक्ति भगवान् श्रीशकरके द्वारा कह गये देवीके इस सहस्रनामस्तोत्रका भक्तिपूर्वक पाठ करता है वह देवीके सारूप्य मोक्षको प्राप्त करता है। जो व्यक्ति गन्ध पुष्प, धूप और दीपस महेश्वरीकी आराधना कर यह स्तोत्र पढता है, वह परम पदको प्राप्त करता है॥ १८९-१९०॥ जो व्यक्ति अनन्यभावसे इस स्तोत्रक द्वारा देवीकी प्रतिदिन स्तुति करता है, उसे सभी प्रकारकी सिद्धियाँ प्राप्त हो जाती हैं। राजा उसके वशीभूत हो जाते हैं, सभी शत्रु नष्ट हो जाते हैं और सिह, बाघ आदि सभी हिसक प्राणी तथा चोर आदि उसको देखनेमात्रसे दूरसे ही भाग जाते हैं। वह अनुल्लघनीय आज्ञावाला हो जाता है तथा सर्वत्र महान् कल्याणको प्राप्त करता है। अन्तमे दुर्गाजीकी स्मृतिको प्राप्तकर स्वय देवीका अश हो जाता है॥ १९१—१९४॥

॥ इति श्रीमहाभागवते महापुराणे श्रीमहादेवनारदसवादे शिववक्त्रविनिर्गत ललितासहस्रनामस्तोत्र नाम त्रयोविंशतितमोऽध्याय ॥ २३॥

॥ इस प्रकार श्रीमहाभागवतमहापुराणके अन्तर्गत श्रीमहादेव-नारद-सवादमे 'शिववक्त्रविनिर्गत-ललितासहस्रनामस्तोत्र' नामक तेईसवाँ अध्याय पूर्ण हुआ॥ २३॥

चौबीसवाँ अध्याय

भगवान् शकरद्वारा पार्वतीके समक्ष विवाहका प्रस्ताव रखना, मरीचि आदि ऋषियोका हिमालयके पास जाकर अपनी पुत्री भगवान् शकरको समर्पित करनेका परामर्श देना तथा हिमालयद्वारा इसकी स्वीकृति

श्रीमहादेव उवाच

तत शम्भु समादाय कामदेवशरीरजम्।
भस्म सर्वेषु देहेषु भूतिलेप विधाय च॥ १॥

पुनस्तपसि शैलेन्द्रशृङ्ग भूतगणै सह।
पार्वत्यपि च शैलेन्द्रे तपसे समुपाविशत्॥ २॥

शम्भु सध्याय ता देवीं देवी तमपि शङ्करम्।
सध्याय मनसा वर्षसहस्रत्रयमानयत्॥ ३॥

तत शम्भु सुदु खार्त कामेन भस्मरूपिणा।
पार्वतीनिकट गत्वा कृताञ्जलिरिद वच ॥ ४॥

प्राब्रवीत्परमेशानि तपस्त्यज सुदुश्चरम्।
ध्यानेन परिजप्येन मौनेन महता त्वया॥ ५॥

श्रीमहादेवजी बोले—तब भगवान् शकर कामदेवके शरीरका भस्म लेकर अपने सम्पूर्ण शरीरमे उसका लेपन कर पुन अपने भूतगणोके साथ पर्वतराज हिमालयके शिखरपर तपस्यारत हो गये और पार्वती भी उसी हिमालय पर्वतपर तपस्यामें सलग्न हो गयीं॥ १-२॥ भगवान् शकरने मनसे उन देवीका और देवी पार्वतीने उन महेश्वरका ध्यान करते हुए तीन हजार वर्ष व्यतीत कर दिये॥ ३॥ तब भस्मीभूत कामसे अत्यन्त दु खित भगवान् शकर पार्वतीके निकट जाकर हाथ जोडकर यह वचन बोले—परमेशानि! अत्यन्त कठिन तपस्याका त्याग कीजिये। आपके कठिन ध्यान, जप और

क्रीतस्तवैव दासोऽह मा सेवायै नियोजय।
त्वदङ्गमार्जने हारकेयूरपरिधापने॥ ६ ॥

त्वदङ्गपरिसस्कारेऽलक्तकादिभिरादरात् ।
नियुङ्क्ष्व पर्वतसुते प्रसन्ना यदि मे शिवे॥ ७ ॥

निर्दग्धोऽस्मि भृश भस्मरूपिणा मदनेन च।
देहस्थेन महादेवि मामुद्धर मनोभवात्॥ ८ ॥

त्व सर्वदुर्गार्तिहरा दुर्गाऽभीष्टफलप्रदा।
त्वामाश्रयन्ति ये तेषा दु ख सञ्जायते नहि॥ ९ ॥

अह त्वा सर्वथा भक्तिभावेन समुपाश्रित ।
मामुद्धर महादुर्गे कामसागरमध्यत ॥ १० ॥

यथा त्व सस्मृतिजुषा मोक्षदासि दयामयि।
तथा मा कृपया कामसागराच्च समुद्धर॥ ११ ॥

एव सम्प्रार्थिता शम्भु प्रोवाच हिमदेहजा।
सखीं सम्बोध्य लज्जाभिनतवक्त्रा स्मितानना॥ १२ ॥

असम्प्रदत्ता पित्राह कथमेनमुपागता।
भविष्यामि तत पाणि गृह्णातु विधिवद्धर ॥ १३ ॥

पितर मे गिरिश्रेष्ठ केनचिन्मतिशालिना।
स्वाभिप्राय ज्ञापयतु विवाहार्थं महेश्वर ॥ १४ ॥

इत्युक्त सोऽपि भगवान्महादेवस्त्रिलोचन ।
तथ्य मेने गिरिसुतावचन कामुकोऽपि सन्॥ १५ ॥

तत सा प्रययौ शीघ्र सखीभि परिवारिता।
पितुर्गेह भगवती प्रफुल्लकमलानना॥ १६ ॥

पार्वतीमागता श्रुत्वा गिरीन्द्र सहसोत्थित ।
आगत्याङ्के समारोप्य पुरमध्य समानयत्॥ १७ ॥

मौनव्रतसे मैं आपका क्रीतदास हो गया हूँ। मुझे अपनी सेवामे नियुक्त कर लीजिये। पर्वतसुता शिवा! यदि आप मुझपर प्रसन्न हैं तो अपने अङ्गमार्जनमे, हार-केयूर पहनानेमे तथा अलक्तक आदि रागद्रव्योसे सम्मानपूर्वक अङ्गोको अलकृत करनेम मुझे नियुक्त कीजिये॥ ४—७॥ मैं देहमे स्थित भस्मीभूत कामदेवसे अत्यन्त जलाया जा रहा हूँ। महादेवि! कामदेवसे मेरा उद्धार कीजिये। आप सबकी कठिन पीडाको हरनेवाली हैं, आप अभीष्ट वर देनेवाली दुर्गा हैं। जो आपका आश्रय ग्रहण करते हैं, उन्हे कभी दु ख होता ही नहीं। मैंने भक्तिभावसे सभी प्रकारसे आपका आश्रय ग्रहण किया है। महादुर्गे! कामरूपी सागरके मध्यसे मेरा उद्धार कीजिये। दयामयी! जिस प्रकार आप अपने स्मरण करनेवाले भक्तको मोक्ष प्रदान करती हैं, उसी प्रकार कृपा करके मेरा इस कामरूपी समुद्रसे उद्धार कीजिये॥ ८—११॥ ऐसी प्रार्थना करनेपर लज्जासे सिर झुकायी हुई, मुसकानभरे मुखवाली, शैलपुत्री पार्वती अपनी सखीको सम्बोधित करते हुए भगवान् शकरसे इस प्रकार बोलीं—॥ १२॥

मैं पिताके द्वारा बिना दिये इन्हे कैसे प्राप्त हो सकती हूँ? पिताके द्वारा सम्प्रदान करनेपर ही भगवान् शकर विधिपूर्वक मेरा पाणिग्रहण करे। महेश्वर किसी बुद्धिमान् व्यक्तिके द्वारा अपने विवाहके लिये अपना अभिप्राय मेरे पिता पर्वतराजको बतायें॥ १३-१४॥

ऐसा कहनेपर त्रिलोचन भगवान् महादेवने कामासक्त होते हुए भी गिरिराजपुत्रीके वचनको तथ्ययुक्त माना॥ १५॥ तदनन्तर प्रफुल्लित कमलके समान मुखवाली वे भगवती सखियासे घिरी हुई शीघ्र ही पिताके घर चली गयीं॥ १६॥ पार्वतीके आनेकी बात सुनकर गिरिराज अकस्मात् उठ पडे ओर आकर उनको गोदम लेकर पुरके मध्यम ले आये।

आगत्य मेनका पुत्रीमालिङ्ग्य निजपाणिना।
अश्रुपूर्णेक्षणा वक्त्र चुचुम्ब परमादरात्॥ १८॥

उवाच मातस्त्व पुत्री मम प्राणसमा ह्यसि।
त्वद्विच्छेदमृतामद्य मा कुरुष्व सुजीविताम्॥ १९॥

मैनाकप्रमुखा सर्वे पार्वत्या भ्रातरस्तथा।
बान्धवाश्च तथैवान्ये दृष्ट्वा हर्षं प्रपदिरे॥ २०॥

तस्या सखीभ्या शैलेन्द्रश्रेष्ठायापि निवेदितम्।
यथा दृष्ट वने शम्भो पार्वत्यामभिचेष्टितम्॥ २१॥

गिरीन्द्रस्तत्समाकर्ण्य हर्षेण महता युत ।
प्रतीक्ष्यमाणो वार्ता स गिरिशस्य तदा स्थित ॥ २२॥

विवाहेपु सुतायास्तु पार्वत्या मुनिपुङ्गव।
शम्भुश्च तत्र शैलाग्रे सस्थित प्रमथै सह॥ २३॥

उवास पर्वते पाणिग्रहणे कृतनिश्चय ।
तत सस्मार गिरिशो मरीच्यादीन्महामुनीन्॥ २४॥

अभिप्राय गिरीन्द्राय विज्ञापयितुमात्मन ।
ततस्ते समुपायाता मरीच्याद्या महर्षय ॥ २५॥

तत्क्षणाच्छिवसान्निध्य वातोद्धूतघना इव।
ते प्रणम्य महादेव पप्रच्छुस्त्रिदशेश्वरम्॥ २६॥

किमर्थमस्मान्भगवन् स्मृतवानसि तद्वद।
तत प्राह महादेवो मरीच्यादीन्पृथक् पृथक्॥ २७॥

सम्बोध्य कामनिर्दग्धहृदयो मुनिपुङ्गव।
हिताय सर्वजगता तथा सतानवृद्धये॥ २८॥

दारग्रहे मतिर्मेऽद्य जायते मुनिसत्तमा ।
यावत्सती मा सत्यज्य गतासीन्निजमायया॥ २९॥

तावत्तामेव हृदये सन्ध्याय तपसे स्थित ।
सा तेन तपसा तुष्टा स्वय हिमगिरे सुता॥ ३०॥

महारानी मेनकाने वहाँ आकर अपनी बाहासे पुत्रीका आलिङ्गन कर अश्रुपूरित नेत्रोंसे परम आदरपूर्वक उनके मुखका चुम्बन किया और कहा—माता! आप मेरे प्राणके समान पुत्री हैं। आपके वियोगसे मुझ मरी हुईको इस समय जीवित कीजिये॥ १७—१९॥ गिरिराजपुत्री पार्वतीके मैनाक आदि सभी भाई, बन्धु-बान्धव और अन्य लोग उन्हें देखकर हर्षसे भर गये॥ २०॥ उनकी सखियोंने शम्भुद्वारा पार्वतीविषयक चेष्टाओंको वनमें जैसा देखा था, वैसा पर्वतराज हिमालयको बता दिया। मुनिश्रेष्ठ! गिरिराज उन बातोंको सुनकर अपनी पुत्री पार्वतीके विवाहके लिये भगवान् शंकरके प्रस्तावकी प्रतीक्षा करते हुए महान् हर्षसे भर गये॥ २१-२२½॥

भगवान् शंकर पाणिग्रहणका निश्चय करके अपने प्रमथगणोंके साथ हिमालयके शिखरपर रहने लगे। तदनन्तर भगवान् शंकरने अपना अभिप्राय गिरिराजसे बतानेके लिये मरीचि आदि सप्तर्षियोंका स्मरण किया॥ २३-२४½॥ तब वे मरीचि आदि महर्षिगण उसी क्षण वायुसे उड़ाये गये मेघोंकी भाँति भगवान्

शंकरके समीप पहुँच गये। उन्होंने देवाधिदेव महादेवको प्रणाम कर उनसे पूछा—भगवन्! आपने हमलोगोंका किसलिये स्मरण किया? उसे बताइये॥ २५-२६½॥ मुनिपुङ्गव! तब कामसे निर्दग्ध हृदयवाले भगवान् महादेवने मरीचि आदि मुनियोंको पृथक्-पृथक् सम्बोधित करके कहा— ॥ २७½॥ श्रेष्ठ मुनियो! सम्पूर्ण विश्वके कल्याणके लिये और संतानवृद्धिके लिये आज मेरी विवाह करनेकी इच्छा हो रही है। जबसे दक्षतनया सती अपनी मायासे मुझे छोड़कर चली गयी हैं, उसी समयसे ही हृदयमें उनका ध्यान करके मैं तपस्यामें संलग्न हूँ।

भूत्वा मा पतिभावेन स्वीचकार निजेच्छया।
कितु तस्या पिता शैलराजेन्द्रो हिमवान् यदि॥ ३१॥

आहूय मा ददात्येना पाणिग्रहणकर्मणि।
तदा सा मम पत्नी स्याच्चार्वङ्गी रुचिरानना॥ ३२॥

भस्मीभूतेन कामेन दह्येऽह दिनरात्रकम्।
न शान्तिमभिलप्स्यामि विना ता पर्वतात्मजाम्॥ ३३॥

यदि कृत्वा तु साहाय्य ता मत्प्राणैकवल्लभाम्।
मह्य दापयितु शक्तास्तदाह स्थातुमुत्सहे॥ ३४॥

उस तपस्यासे सतुष्ट होकर उन्होने स्वय गिरिराजतनया होकर अपनी इच्छासे मुझे पतिके रूपमे स्वीकार कर लिया है, किंतु उनके पिता गिरिराज हिमवान् यदि मुझे बुलाकर पाणिग्रहण-सस्कार करके उनको देते हैं, तभी वे मनोरम मुखवाली सुन्दरी मेरी पत्नी होगी। भस्मीभूत कामदेवसे मैं दिन-रात जल रहा हूँ। बिना उन गिरिराजपुत्रीके मैं शान्ति नहीं प्राप्त कर सकूँगा। यदि आपलोग मेरी सहायता करके उन मेरी एकमात्र प्राणप्रियाको प्राप्त करानेमे समर्थ हो सके तभी मैं स्थित रह सकता हूँ॥ २८—३४॥

ऋषय ऊचु

यथाभिचेष्टित देव त्वमाज्ञापयसि प्रभो।
तथास्माभिश्चेष्टितव्य कि नु कार्यमत परम्॥ ३५॥

आद्या हि परमा विद्या पूर्णा प्रकृतिरुत्तमा।
जाता हिमवत पुत्री तवैव पूर्वगेहिनी॥ ३६॥

अवश्य हिमवास्तुभ्य दास्यत्येवाचिरेण वै।
निमित्तमात्रमत्रैव भविष्यामो वय शिव॥ ३७॥

ऋषिगण बोले—देव! प्रभो! जो करणीय हो, वैसी आप हमे आज्ञा दीजिये, उसी प्रकार हमलोग प्रयत्न करेगे। इससे बढकर हमलोगोका और कौन-सा कार्य हो सकता है। आदिशक्ति, परमा, विद्या, पूर्णस्वरूपा, परा प्रकृति जो हिमालयकी पुत्री हैं, वे ही आपकी पूर्वगृहिणी हैं। शिव! हिमवान् निश्चय ही अविलम्ब अपनी पुत्री पार्वती आपको दे देगे। इस कार्यमे हमलोग तो केवल निमित्तमात्र होगे॥ ३५—३७॥

श्रीमहादेव उवाच

इत्युक्त्वा वचन त वै शम्भु ते हि महर्षय।
प्रययुर्गिरिराजस्य पुर परमहर्षिता॥ ३८॥

विवाहार्थं महेशस्य सयोजयितुमम्बिकाम्।
तान्दृष्ट्वा समुपायातान् गिरीन्द्रोऽपि यथाविधि॥ ३९॥

पूजयित्वा यथान्यायमासनेषूपवेशयत्।
अथ प्रोचुर्गिरिश्रेष्ठमृषयस्ते हिमालयम्॥ ४०॥

शृणु राजस्तव हित यच्छिवेनाभिभाषितम्।
तस्यैव वनिता दक्षतनया सा सती पुरा॥ ४१॥

सैव ते तनया जाता पार्वती साम्प्रत शिवा।
ता त्व प्रयच्छ देवाय शिवाय परमात्मने॥ ४२॥

सम्प्राप्तदार स सुखी त्वत्प्रसादाद्भविष्यति।
प्रभाव देवदेवस्य सर्व त्व ज्ञातवानसि॥ ४३॥

तस्मै देया निजसुता किवा कार्यमत परम्।

श्रीमहादेवजी बोले—वे सभी महर्षिगण भगवान् शकरसे ऐसा कहकर परम प्रसन्न हो भगवान् शकरके विवाहके निमित्त पार्वतीको सयोजित करनेके लिये गिरिराजके नगरमे चले गये॥ ३८½॥ आये हुए उन महर्षियोको देखकर गिरिराजने भी उन लोगोकी यथाविधि पूजा कर न्यायपूर्वक उन्हे आसनोपर बैठाया॥ ३९½॥ इसके बाद वे महर्षिगण पर्वतराज हिमालयसे कहने लगे—राजन्! आपकी भलाईके लिये भगवान् शकरने जो कहा है, उसे सुनिये—प्राचीन कालमे दक्षतनया सती उन्हींकी अर्धाङ्गिनी थीं। वे ही आपकी पुत्री इस समय कल्याणकारिणी पार्वतीके रूपमे उत्पन्न हुई हैं। उन्हें आप परमात्मा भगवान् शिवको दे दीजिये। आपकी कृपासे वे पत्नीको प्राप्त कर सुखी होगे। आप देवाधिदेव भगवान् शकरके सम्पूर्ण प्रभावको जानते हैं। इसलिये आप अपनी पुत्री उन्हींको दे दीजिये, इससे बडा कौन कार्य है॥ ४०—४३½॥

नारद पुनराहेदं शैलराजं हिमालयम्॥ ४४॥

स्मित्वा स्मित्वा महाबुद्धिर्भूतभव्यभविष्यवित्।
महाराज मया पूर्वमेतत्सर्वं निवेदितम्॥ ४५॥

अनादिपुरुषेशाय पूर्णाय परमात्मने।
तनयां परमामाद्यां देहि भाग्यस्य गौरवात्॥ ४६॥

ततः प्राह गिरीन्द्रस्तान्हर्षनिर्भरमानसः।
कृतकृत्योऽस्मि पूतोऽस्मि युष्माकं हि समागमात्॥ ४७॥

यच्चन्द्रशेखरं सर्वे देवदेवं वदन्ति वै।
जगतां सृष्टिसंहारकरणे पालने क्षमम्॥ ४८॥

तस्मै देया सुतेत्यत्रानुपपत्तिश्च का मम।
तस्येच्छावशगोऽहं हि तत्तत्सर्वमिदं जगत्॥ ४९॥

यदेच्छा समभूत्तस्य तदैवेच्छा ममाप्यभूत्।
गच्छध्वं शम्भुनिकटं कथयध्वं वचो मम॥ ५०॥

शुभं निश्चित्य समयं मयि वार्तां ददातु सः।
दास्यामि तनयां तस्मै यथाशक्तिविभूषिताम्॥ ५१॥

भूत, भविष्य तथा वर्तमानको जाननेवाले महाबुद्धिमान् नारदजी हँसते हुए पर्वतराज हिमालयसे पुनः इस प्रकार बोले—महाराज! मैंने आपसे पूर्वमें ये सभी बातें बता दी हैं। आप अपने भाग्यका गौरवान्वित करनेके लिये परम आदिशक्ति अपनी पुत्री पार्वतीको अनादि पुरुष पूर्णपरमात्मा शिवको दे दीजिये॥ ४४—४६॥ तब हर्षसे प्रफुल्लित मनवाले गिरिराज हिमालयने उनसे कहा कि आपलोगोंके आनेसे मैं कृतकृत्य और पवित्र हो गया हूँ। सभी लोग जिन चन्द्रशेखरको देवाधिदेव कहते हैं, वे संसारके सृष्टि, पालन और संहार करनेमें सक्षम हैं। उन्हें अपनी पुत्री देनेमें मुझे क्या आपत्ति है? उन्हींकी इच्छाके अधीन यह सम्पूर्ण विश्व है तथा मैं भी उन्हींकी इच्छाके अधीन हूँ। उनकी जैसी इच्छा हुई उसी समय वैसी ही मेरी भी इच्छा हुई। आपलोग भगवान् शम्भुके निकट जायँ और मेरी बात कहें कि वे शुभ मुहूर्त निश्चित करके मुझसे वार्तालाप करें। मैं यथाशक्ति अलङ्कृत करके अपनी पुत्री उन्हें दे दूँगा॥ ४७—५१॥

॥ इति श्रीमहाभागवते महापुराणे श्रीमहादेवनारदसंवादे पार्वतीविवाहोपक्रमो नाम चतुर्विंशतितमोऽध्यायः ॥ २४॥

॥ इस प्रकार महाभागवतमहापुराणके अन्तर्गत श्रीमहादेव-नारद-संवादमें 'पार्वतीविवाहोपक्रम' नामक चौबीसवाँ अध्याय पूर्ण हुआ॥ २४॥

पचीसवाँ अध्याय

मरीचि आदि महर्षियोंद्वारा भगवान् शंकरका विवाह-स्वीकृतिका शुभ समाचार सुनाना, विवाहके लिये वैशाख शुक्लपक्षकी पञ्चमी तिथि निश्चित होना, देवर्षि नारदद्वारा ब्रह्मादि देवताओंको विवाहका निमन्त्रण देना

श्रीमहादेव उवाच

निशम्य गिरिराजस्य वचनं ते महर्षयः।
पुनर्महेशसान्निध्यं प्रययुर्हृष्टचेतसः॥ १॥

तान् समीक्ष्यागताञ्छम्भुर्महात्रस्त इवाब्रवीत्।
किमाह भगवानद्रिर्युष्मान्वदत मा चिरम्॥ २॥

स्वेच्छया स्वसुतां मह्यं दातव्या किं न चेति च।
कथयित्वा मनः शान्तं सुस्थिरं कुरुत द्विजाः॥ ३॥

श्रीमहादेवजी बोले—गिरिराजका वचन सुनकर वे महर्षि प्रसन्नचित्त हो पुनः भगवान् शंकरके निकट चले गये॥ १॥ आये हुए उन महर्षियोंको देखकर घबड़ाये-से वे भगवान् शंकर पूछने लगे कि ऐश्वर्यशाली गिरिराजने आपलोगोंसे क्या कहा, वह मुझसे शीघ्र बताइये, विलम्ब मत कीजिये। ब्राह्मणो! वे अपनी पुत्री मुझे अपनी इच्छासे देंगे अथवा नहीं, इसे बताकर मेरे मनको शान्त और सुस्थिर कीजिये॥ २-३॥

ऋषय ऊचु

दातव्या भक्तिभावेन गिरीन्द्रेण निजात्मजा।
मा चिन्ता कुरु देवेश साम्प्रत सुस्थिरो भव॥ ४ ॥
उक्त तेन गिरीन्द्रेण समय वीक्ष्य शोभनम्।
तस्मै देया यदा वार्ता तदोद्वाहो भविष्यति॥ ५ ॥

श्रीमहादेव उवाच

अथ प्राह पुन शम्भुस्तास्तदा मुनिसत्तमान्।
द्रुत निरीक्ष्य समय शोभन दोषवर्जितम्॥ ६ ॥
गिरीन्द्राय द्रुत ब्रूत सुव्रताय महात्मने।
इति श्रुत्वा वचस्तस्य मरीच्याद्यास्तपोधना ॥ ७ ॥
विवाहसमय तस्य निश्चित्योचुर्महेश्वरम्।
वैशाखे मासि या शुक्लपञ्चमी सा गुरोर्दिने॥ ८ ॥
तस्यामुद्वाहकर्म त्व कुरु सतानवृद्धये।
सर्वदोषविहीन हि दिनमेतत्सुशोभनम्॥ ९ ॥
विज्ञापय गिरीन्द्राय महावर महात्मने।
अथ प्राह महादेवो यूय यात नगाधिपम्॥ १० ॥
कथयध्व निजसुता तेन तस्मिञ्छुभेऽहनि।
दातव्या विधिवन्मह्य तत्राह च सुरोत्तमै ॥ ११ ॥
आगमिष्ये पुर तस्य महोत्सवपुर सरम्।
तच्छ्रुत्वा वचन शम्भो पुनस्तेऽपि महर्षय ॥ १२ ॥
गत्वा हिमाद्रि व्याजह्रुर्महेशेनाभिभाषितम्।
तच्छ्रुत्वा गिरिराजोऽपि भद्रमाह मुदान्वित ॥ १३ ॥
विससर्ज च सम्पूज्य महर्षीस्तान्यथाविधि।
तेऽपि भूयो ययुर्यत्र सस्थितश्चन्द्रशेखर ॥ १४ ॥
प्रोचुश्चापि महादेव गिरिराजेन भाषितम्।
तानुवाच तत शम्भुर्यूय तत्र शुभेऽहनि॥ १५ ॥
आगत्य वै मया सार्धं गमिष्यथ गिरे पुरम्।
नारद प्राह तात त्वमव्याहतगति स्वयम्॥ १६ ॥
एक कुरुष्व मत्कार्यं यत्ते वक्ष्यामि साम्प्रतम्।
ब्रह्मणे विष्णवे तद्वदिन्द्रादिभ्य पृथक् पृथक्॥ १७ ॥
कथयस्व ममोद्वाहवार्ता हर्षविधायिनीम्।
विज्ञापयत मद्वाक्य तेष्विद मुनिपुङ्गव॥ १८ ॥
मदुद्वाहदिने सर्वैर्देवगन्धर्वकिन्नरै ।
युष्माभि समुपागम्य कर्तव्य शोभन मम॥ १९ ॥

ऋषियोंने कहा—देवेश! गिरिराज भक्तिभावसे अपनी कन्या आपको प्रदान करेंगे। इसलिये अब आप चिन्ता न करें, शान्तचित्त रहें। गिरिराजने कहा है कि उत्तम मुहूर्त देखकर जब आपकी ओरसे वार्ता उन्हें भेजी जायगी तब विवाह होगा॥ ४-५॥

श्रीमहादेवजी बोले—पुन भगवान् शंकरने उन श्रेष्ठ मुनियोंसे कहा—शीघ्र दोषरहित शुभ मुहूर्त देखकर सुव्रती महात्मा गिरिराजसे शीघ्र ही कहिये॥ ६½॥ उनकी यह बात सुनकर मरीचि आदि तपोधन ऋषियोंने उनके विवाहका शुभ मुहूर्त निश्चित करके महेश्वरसे कहा—वैशाख महीनेमें शुक्लपक्षकी पञ्चमी तिथिको गुरुवारके दिन संतानवृद्धिके लिये आप विवाह करें। सभी दोषोंसे रहित यह दिन अत्यन्त शुभ है। श्रेष्ठवर! महात्मा गिरिराजसे यह बात बता दीजिये॥ ७—९½॥ इसके बाद महादेवजीने कहा कि आपलोग नगाधिराजके पास जाइये और कहिये कि वे उस शुभ दिनको विधिवत् अपनी पुत्री मुझे प्रदान करें। मैं भी देवताओंके साथ महोत्सवपूर्वक उनके पुरमें आऊँगा॥ १०-११½॥ भगवान् शंकरकी वह बात सुनकर उन महर्षियोंने भी पुन गिरिराजके पास जाकर शंकरजीके द्वारा कही गयी बात उन्हें बतायी॥ १२½॥ गिरिराजने भी उनकी बात सुनकर प्रसन्न होकर 'मङ्गल हो'—ऐसा कहा। तत्पश्चात् यथाविधि उन महर्षियोंका पूजन कर उन्हें विदा कर दिया॥ १३½॥ वे लोग भी पुन वहीं गये जहाँ भगवान् चन्द्रशेखर स्थित थे और गिरिराजने उन लोगोंसे जो कहा था, वह भगवान् शंकरको बता दिया॥ १४½॥ तब भगवान् शंकरने उनसे कहा कि शुभ मुहूर्तमें आपलोग यहाँ आकर मेरे साथ गिरिराजपुरम चलियेगा॥ १५½॥ देवर्षि नारदसे उन्होंने कहा—तात! आप स्वयं अबाध गतिवाले हैं। आप हमारा एक काम कीजिये जिसे मैं इस समय आपसे कहता हूँ॥ १६½॥ ब्रह्मा विष्णु तथा इन्द्रादि सभी देवताओंसे अलग-अलग मेरी हर्षदायिनी विवाहकी बात कह दीजिये। मुनिश्रेष्ठ! मेरी यह बात उन लोगोंसे बता दीजिये कि मेरे विवाहके दिन सभी देव, गन्धर्व किन्नर तथा आपलोग आकर मेरा कल्याण करें॥ १७—१९॥

तत स नारदोऽप्याह यथाज्ञापयसि प्रभो।
तथेव हि विधातव्य मयाज्ञावशवर्तिना॥ २०॥

तत प्रणम्य ते देव मरीच्याद्या महर्षय ।
स्वस्थान गन्तुमुद्युक्ता प्रार्थयामासुरीश्वरम्॥ २१॥

आज्ञा विधेहि गच्छामो निजस्थान तु साम्प्रतम्।
त्वदुद्वाहदिने सर्व आयास्याम सुरै सह॥ २२॥

तत प्राह महादेव साश्रुनेत्रा महामुनीन्।
पत्नीविरहदु खार्तो भृश कामप्रपीडित ॥ २३॥

यावद्धिमाद्रितनया मम प्राणैकवल्लभाम्।
न पत्नीमभिलप्स्यामि तावत्कष्टेन जीवनम्॥ २४॥

धारयिष्ये भृश कामनिर्दग्धोऽपि महर्षय ।
प्रतिज्ञाय ब्रवीम्येतद्युष्माक सम्मुखे ध्रुवम्॥ २५॥

यदा ता समवाप्स्यामि पार्वतीं प्राणवल्लभाम्।
तदा सर्वात्मना देवीं सेविष्ये ता निरन्तरम्॥ २६॥

न विप्रिय करिष्यामि कदाचिदपि मोहित ।
यत्र यास्यति सा देवी गमिष्येऽह च तत्र वे॥ २७॥

न त्यक्ष्यामि कदाचित्ता क्षणार्धमपि सुव्रताम्।
यूय च साम्प्रत यात निजस्थान तपोधना ॥ २८॥

तिष्ठाम्यह काननेऽस्मिन्ध्यायस्ता पर्वतात्मजाम्।

इत्येवमुक्त्वा गिरिशो विससर्ज महामुनीन्॥ २९॥

तेऽपि नत्वा ययु सर्वे स्वस्वस्थान महामत।
नारदस्तु ययौ तूर्णं ब्रह्मणो निकट तदा॥ ३०॥

शिवस्योद्वाहवार्तां च तस्मै सर्वं न्यवेदयत्।
तथैव विष्णवे प्राह गत्वा वैकुण्ठमुत्तमम्॥ ३१॥

श्रुत्वा तु हर्षसम्पूर्णौ बभूवतुरतीव तौ।
तावूचतुर्मुनिश्रेष्ठ गमिष्यावो महेशितु ॥ ३२॥

विवाहदर्शनार्थाय परिवारगणै सह।
त्व तु स्वर्गपुर गत्वा महेन्द्राय वद द्रुतम्॥ ३३॥

स यातु त्रिदशै सर्वै सिद्धचारणकिन्नरै ।
महेशस्य विवाहेऽस्मिन्कर्तुं साहाय्यमुत्तमम्॥ ३४॥

तब उन नारदजीने कहा—प्रभो! जैसी आपकी आज्ञा हो, आपकी आज्ञाके अधीन रहनेवाला मैं वैसा ही करूँगा॥ २०॥ तब वे मरीचि आदि सभी महर्षिगण भगवान् शकरको प्रणाम कर अपने-अपने स्थानपर जानेके लिये उनसे प्रार्थनापूर्वक कहने लगे—॥ २१॥ आप आज्ञा दीजिये, इस समय हमलोग अपने स्थानको जायँ। आपके विवाहके दिन सभी देवताओके साथ हमलोग आयगे॥ २२॥ तदनन्तर पत्नीके विरहजन्य दु खसे शोकसतप्त, अत्यधिक कामपीडित तथा आँखोमे आँसू लिये भगवान् महादेवने उन महामुनियासे कहा—॥ २३॥ जबतक मैं अपनी एकमात्र प्राणवल्लभा गिरिराज-तनयाको पत्नीरूपमे प्राप्त नहीं कर लूँगा, तबतक कष्टपूर्वक जीवन धारण करूँगा। कामसे जलाया जाता हुआ मैं यह बात प्रतिज्ञापूर्वक निश्चय ही आपके सम्मुख कह रहा हूँ। जब उन प्राणवल्लभा पार्वतीको प्राप्त कर लूँगा, तब उन देवीकी सभी प्रकारसे निरन्तर सेवा करता रहूँगा। कभी भी भूलकर जो उनको प्रिय नहीं है वेसा काम नहीं करूँगा। वे देवी जहाँ जायँगी, मैं भी वहीं जाऊँगा। मैं उन व्रतपरायणाको कभी आधे क्षणक लिये भी नहीं छोडूँगा॥ २४—२७½॥ तपोधनो! अब आपलोग अपने-अपने स्थानको जाइये। मैं इसी काननमे उन गिरिराजकुमारीका ध्यान करता हुआ स्थित रहूँगा॥ २८½॥ ऐसा कहकर भगवान् शकरने उन मुनियोको विदा कर दिया। महामते! वे लोग भी उनको प्रणाम कर अपने-अपने स्थानपर चले गये॥ २९½॥ तब देवर्षि नारद शीघ्र ही ब्रह्माजीके पास पहुँच गये और उनसे उन्होने भगवान् शकरके विवाहस सम्बन्धित सम्पूर्ण बात बता दी। श्रेष्ठ वेकुण्ठलोकम जाकर भगवान् विष्णुसे भी उसी प्रकार कहा। यह सुनकर वे दोनो अत्यन्त हर्षित हो गये और मुनिश्रेष्ठ नारदजीसे बोले—हम दोना अपने परिवार तथा गणोके साथ भगवान् शकरका विवाह देखने अवश्य आयेगे॥ ३०—३२½॥ आप शीघ्र ही स्वर्गलोकम जाकर इन्द्रसे कह दीजिये कि वे सभी देवता सिद्ध, चारण और किन्नरोके साथ उत्तम सहायता करनेके लिये भगवान् शकरके इस विवाहमें

तत स नारदो गत्वा महेन्द्राय न्यवेदयत्।
शिवस्योद्वाहसवाद ताभ्या यच्चाभिभाषितम्॥ ३५॥

तच्छ्रुत्वा सुरराजोऽपि हर्षनिर्भरमानस ।
मेने मृत्यु तारकस्य भविष्यति सुनिश्चितम्॥ ३६॥

उद्योग चाकरोद्गन्तु विवाहे स महेशितु ।
नारदोऽपि ययौ स्वीय स्थानमिन्द्रेण पूजित ॥ ३७॥

जायँ। तदनन्तर उन नारदजीने भगवान् शिवके विवाह-सवाद तथा उसके सम्बन्धमे उन दोनोके द्वारा कही गयी बात इन्द्रका बता दी। उसे सुनकर हर्षसे प्रसन्नचित्त देवराज इन्द्रने भी यह मान लिया कि अब निश्चितरूपमे तारककी मृत्यु हो जायगी। तदनन्तर वे भगवान् शकरके विवाहमे जानेके लिये तैयारीमे लग गये तथा नारद भी इन्द्रसे पूजित होकर अपने स्थानको चल गये॥ ३३—३७॥

॥ इति श्रीमहाभागवते महापुराणे श्रीमहादेवनारदसवादे शिवविवाहे ब्रह्मादिदेवतानिमन्त्रण नाम पञ्चविशतितमोऽध्याय ॥ २५॥
॥ इस प्रकार महाभागवतमहापुराणके अन्तर्गत श्रीमहादेव-नारद-सवादमे शिव-विवाहमे 'ब्रह्मादिदेवतानिमन्त्रण' नामक पचीसवाँ अध्याय पूर्ण हुआ॥ २५॥

~~

छब्बीसवाँ अध्याय

हिमालयके घरमे विवाहका उपक्रम प्रारम्भ, भगवान् शकरके यहाँ सभी देवताओके आगमनपर हर्षोल्लास

श्रीमहादेव उवाच

अथाद्रिराजनगरे पार्वत्युद्वाहमङ्गलम्।
प्रावर्तत मुनिश्रेष्ठ जगता हर्षवर्धनम्॥ १॥

भेरीमृदङ्गपणवतूर्यगोमुखनि स्वनै ।
पूरित सर्वतो भूमिनभोमध्य महामते॥ २॥

गन्धर्वा शोभन गान चक्रु परमहर्षिता ।
तथैवाप्सरसा नृत्य प्रावर्तत मनोहरम्॥ ३॥

आयाता देवकन्याश्च तथैव गिरिकन्यका ।
पुरे नगाधिराजस्य पार्वत्युद्वाहमीक्षितुम्॥ ४॥

ता सर्वास्तोषितास्तेन नानालकरणादिभि ।
वस्त्रैश्च विविधैर्गौरीविवाहे मुनिपुङ्गव॥ ५॥

एवमासीद्गिरिपुरे मङ्गल सुमहोत्सवम्।
वायुर्ववौ पुण्यगन्धयुतस्तत्र शनै शनै ॥ ६॥

प्रसन्नमानसा सर्वे तत्रासन् प्राणिनस्तदा।
दिश प्रसन्ना सर्वाश्च सुस्थमासीत्तथा जगत्॥ ७॥

अथेन्द्रस्त्रिदशै सर्वैस्तथा गन्धर्वकिन्नरै ।
गन्तु महेशसान्निध्य प्रस्थानमकरोत्तदा॥ ८॥

श्रीमहादेवजी बोले—मुनिश्रेष्ठ! उसके बाद गिरिराज हिमालयके नगरमे ससारका आनन्दवर्धन करनेवाला पार्वती-विवाहोत्सव प्रारम्भ हो गया॥ १॥ महामते! भेरी, मृदङ्ग, ढोल, तुरही तथा गोमुख (वाद्यविशेष)-की ध्वनिसे भूमि और आकाशका अन्तराल पूर्णरूपसे गुञ्जायमान हो उठा। उस समय गन्धर्वगण अत्यन्त हर्षित होकर गा रहे थे और अप्सराएँ चित्ताकर्षक नृत्य कर रही थीं॥ २-३॥ देवताओ तथा पर्वतोकी कन्याएँ पार्वतीका विवाह देखनेके लिये पर्वताधिपति हिमालयके पुरमे आ गयीं। मुनिश्रेष्ठ! गौरीके विवाहोत्सवमे उन हिमालयने अनेक प्रकारके वस्त्रो तथा अलकारो आदिके द्वारा उन सभी कन्याओको सन्तुष्ट किया॥ ४-५॥ इस प्रकार हिमालयके पुरमे मङ्गल विवाहोत्सवका अत्यन्त सुन्दर स्वरूप विद्यमान था। सुन्दर गन्धसे युक्त वायु धीरे-धीरे प्रवाहित होने लगी। उस अवसरपर सभी प्राणियाके मनमे महती प्रसन्नता छा गयी थी, सभी दिशाएँ प्रकाशसे भर गयीं और सारा ससार स्वस्थ हो गया॥ ६-७॥ उस समय महेश्वरके पास जानेके लिये इन्द्रने भी समस्त देवताओं, गन्धर्वों और किन्नरोंके साथ प्रस्थान किया॥ ८॥

एतस्मिन्नन्तरे श्रीमान् नारदो मुनिसत्तम ।
रति प्राह महादेवपार्वत्युद्वाहमङ्गलम्॥ ९ ॥

तत्र यान्ति सुरा सर्वे गन्धर्वै किन्नरोरगै ।
त्व याहि देवराजस्य सान्निध्य मा चिर कुरु॥ १०॥

विवाहहर्षयुक्तस्य महशस्यान्तिके यदि।
त्वद्भर्तुर्जीवनार्थं ते कथयन्त्यमरा सति॥ ११॥

तदावश्य शिव कामदेह सम्प्रापयिष्यति।
इत्युक्त्वा स मुनि प्रायान्महेशस्यान्तिक द्रुतम्॥ १२॥

रतिश्चापि समुद्युक्ता समभूद्भर्तृजीवने।
आगत नारद वीक्ष्य महेश प्राब्रवीद्वच ॥ १३॥

स्वागत तात चदानीं कर्तव्य च विधीयताम्।
स आह त्रिदशा सर्वे समायान्ति महेश्वर॥ १४॥

सिद्धचारणगन्धवा किन्नराश्च महर्षय ।
ततो रजन्या वृत्ताया शुभे लग्ने सुरै सह॥ १५॥

गन्तव्य गिरिराजस्य पुर शम्भो त्वया प्रभो।
भविष्यति त्वदुद्वाहो महोत्सवपुर सरम्॥ १६॥

एतस्मिन्नन्तरे सर्वैर्देवगन्धर्वकिन्नरै ।
देवराज समायातो महेशस्यान्तिक तदा॥ १७॥

ते प्रणम्य महादेव सर्वलोकस्य कारणम्।
ऊचुर्देवा प्रभो कि त्वमाज्ञापयसि साम्प्रतम्॥ १८॥

स आह मद्विवाहेऽस्मिन्यथायोग्य विधीयताम्।
तत प्रावर्तयच्छम्भोर्विवाहे मङ्गल महत्॥ १९॥

देवराज प्रीतिमना शम्भोस्तत्र तपोवने।
भेर्यादिनि स्वनै सर्वा पूरिताश्च दिशा दश॥ २०॥

अभवन्मुनिशार्दूल गन्धर्वा ललित जगु ।
समभृत्पुष्पवृष्टिश्च ननृतुश्चाप्सरोगणा ॥ २१॥

प्रफुल्लचारुपुष्पौघनतशाखाश्च शाखिन ।
समासन्देवदेवस्य कानने मुनिपुङ्गव॥ २२॥

कोकिला रुचिर शब्द भ्रमराश्च सहस्रश ।
चक्रिरे कानने तस्मिन्वायुर्मलयजो ववौ॥ २३॥

ठीक इसी समय मुनिश्रेष्ठ शोभासम्पन्न नारदजीने रतिसे कहा कि महादेव और पार्वतीका शुभ विवाह सम्पन्न हो रहा है, उसमे गन्धर्वों, किन्नरो और नागोके साथ सभी देवता जा रहे हैं। तुम इस समय देवराज इन्द्रके पास जाओ, विलम्ब मत करो। विवाहकी प्रसन्नतासे युक्त महेशके पास जाकर यदि वे देवता तुम्हारे पतिके जीवनके लिये उनसे कहेगे तो वे शिवजी निश्चितरूपसे कामदेवको पुन शरीरकी प्राप्ति करा देगे॥ ९—११½ ॥ ऐसा कहकर वे नारद मुनि शीघ्रतापूर्वक महेश्वरके पास चले गये और इधर रति भी अपने पतिके जीवनके लिये प्रयत्नशील हो गयी॥ १२½ ॥ अपने यहाँ आये नारदजीको देखकर महेशने यह वचन कहा—तात! आपका स्वागत है इस समय जो भी कार्य करनेयोग्य हो, उसे आप सम्पन्न करे॥ १३½ ॥ तब नारदजीने कहा—महेश्वर! सभी देवता, सिद्ध, चारण, गन्धर्व, किन्नर और महर्षिगण आ रहे हैं। अत शम्भो! प्रभो! आपको देवताओके साथ रात्रि आनेपर शुभ लग्नमे हिमालयके पुरके लिये प्रस्थान करना चाहिये। वहाँ महान् उत्सवके साथ आपका विवाह सम्पन्न होगा॥ १४—१६॥ उसी समय सभी देवताओ, गन्धर्वो और किन्नरोको साथ लिये देवराज इन्द्र महेशके पास आ गये। समग्र जगत्के कारणस्वरूप महादेवको प्रणाम करके उन देवताओने कहा—प्रभो! इस समय हमारे लिये आपका क्या आदेश है?॥ १७-१८॥ इसपर उन्होने कहा—मेरे इस विवाहमे जो भी आपलोगोंके करनेयोग्य हो आपलोग उसे करे। इसके बाद शिवके विवाहमे महान् मङ्गल आरम्भ हो गया॥ १९॥ देवराज इन्द्रका मन प्रसन्नतासे प्रफुल्लित था। शम्भुके उस तपोवनमे भेरी आदि बाजोकी ध्वनिसे सभी दसों दिशाएँ गुञ्जित हो गयीं। मुनिश्रेष्ठ! गन्धर्वलोग मनोहर गान करने लगे, पुष्पोकी वर्षा होने लगी और अप्सराएँ नाचने लगीं। मुनिवर! देवाधिदेव शिवके तपोवनमे वृक्षोकी शाखाएँ खिले हुए सुन्दर पुष्पगुच्छोसे झुक गयीं। उस वनमे हजारो कोयल और भौंरे मनोहर गान करने लगे और मलयानिल बहने लगा॥ २०—२३॥

अथ तत्र समायातो ब्रह्मा लोकपितामहः।
सहैव मानसैः पुत्रैर्वसिष्ठाद्यैर्महर्षिभिः॥ २४॥

तथा नारायणश्चापि समायातः शिवान्तिकम्।
सार्धं लक्ष्म्या सरस्वत्या द्रष्टुमुद्वाहमङ्गलम्॥ २५॥

इत्येवमागतास्तांश्च दृष्ट्वा विश्वेश्वरस्तदा।
प्रहृष्टचेताः समभूत्सुप्रसन्नमुखाम्बुजः॥ २६॥

तत्पश्चात् लोकपितामह ब्रह्मा महर्षि वसिष्ठ आदि अपने मानस पुत्रोंके साथ वहाँ आ गये और भगवान् विष्णु भी माङ्गलिक विवाह देखनेके लिये सरस्वती तथा लक्ष्मीके साथ भगवान् शिवके पास पहुँच गये॥ २४-२५॥ इस प्रकार आये हुए उन देवताओंको देखकर विश्वेश्वर शिवका हृदय प्रफुल्लित हो गया और उनका मुखकमल प्रसन्नतासे खिल उठा॥ २६॥

॥ इति श्रीमहाभागवते महापुराणे श्रीमहादेवनारदसंवादे शिवविवाहोत्सवे देवतासमागमो नाम षड्विंशतितमोऽध्यायः॥ २६॥

॥ इस प्रकार श्रीमहाभागवतमहापुराणके अन्तर्गत श्रीमहादेव-नारद-संवादमें 'शिवविवाहोत्सवमें देवतासमागम' नामक छब्बीसवाँ अध्याय पूर्ण हुआ॥ २६॥

सत्ताईसवाँ अध्याय

ब्रह्मा, विष्णु तथा रतिद्वारा प्रार्थना करनेपर भगवान् शंकरका कामदेवको पुनः जीवित करना, ब्रह्माजीके निवेदनपर भगवान् शंकरका विवाहके लिये सौम्यरूप धारण करना और बड़े उल्लासके साथ शिव-बारातका प्रस्थान

श्रीमहादेव उवाच

समायाता कामपत्नी रतिः सर्वाङ्गसुन्दरी।
पतिशोकसुदुःखार्ता कृशाङ्गी साश्रुलोचना॥ १॥

पुरन्दरमिदं प्राह सम्मुखे संस्थिता सती॥ २॥

रतिरुवाच

पूर्वं तवाज्ञया भर्ता मम प्राणैकवल्लभः।
प्रक्षिप्य शम्भवे बाणं भस्मतां प्राप तत्क्षणात्॥ ३॥

तदा रुदन्तीं दुःखेन मामवोचद्भवानिदम्।
मा शोकं कुरु ते भर्ता पुनर्देहमवाप्स्यति॥ ४॥

परिगृह्णाति दारांस्तु साम्प्रतं शंकरोऽपि च।
तेन बाणेन मुग्धः सन् यूयं पूर्णमनोरथाः॥ ५॥

पतिर्मम गतस्तस्य न चेष्टयसि जीवने॥ ६॥

श्रीमहादेव उवाच

एवमाभाष्य बहुधा रतिः पतिवियोगिनी।
रुरोद देवराजस्य पुरतो ब्रह्मणोऽपि च॥ ७॥

तच्छ्रुत्वा भगवान् ब्रह्मा देवराजस्तु शंकरम्।
सम्प्रार्थ्योवाच वचनं विवाहोत्सुकमानसम्॥ ८॥

श्रीमहादेवजी बोले—तदनन्तर अपने पतिके वियोगके कारण उत्पन्न व्यथासे अत्यन्त व्याकुल तथा कृशकाय सर्वाङ्गसुन्दरी कामदेवपत्नी रति इन्द्रके सम्मुख आकर खड़ी हो गयी और आँखोंमें आँसू भरकर उनसे यह कहने लगी—॥ १-२॥

रति बोली—पूर्वकालमें आपके आदेशसे मेरे एकमात्र प्राणप्रिय पति कामदेव शिवजीपर बाण चलाकर उसी समय भस्म हो गये थे। तब दुःखके कारण मुझ रुदन करती हुईसे आपने यह कहा था—'शोक मत करो, तुम्हारे पतिको पुनः देहकी प्राप्ति हो जायगी।' उस बाणसे मोहित होकर शंकरजी भी इस समय पत्नी प्राप्त कर रहे हैं और इससे आपलोगोंका भी मनोरथ पूर्ण हो गया, किंतु मेरे पति तो मर गये और आप उन्हें जीवित करनेकी चेष्टा नहीं कर रहे हैं॥ ३—६॥

श्रीमहादेवजी बोले—ऐसा कहकर पतिके वियोगसे व्यथित रतिने देवराज इन्द्र तथा ब्रह्माके सामने बहुत प्रकारसे विलाप किया॥ ७॥ उसकी बात सुनकर भगवान् ब्रह्मा तथा देवराज इन्द्र विवाहके लिये उत्सुकचित्तवाले शंकरसे प्रार्थनापूर्वक यह वचन बोले—॥ ८॥

तावृचतु प्रभो देव प्रणतानां कृपाकर।
देवानामुपकाराय कार्यमेकं कुरुष्व वै॥ ९ ॥

यदाऽस्मद्वचनात्कामस्त्वयि बाणं विमोचयन्।
विनिर्ययौ तदोवाच देवानिन्द्रपुरोगमान्॥ १० ॥

यदि क्रुद्धो महादेवो मां नाशयति मत्कृते।
तदा भवद्भिस्त्रिदशैर्यतितव्यं यथोचितम्॥ ११ ॥

तैश्च प्रतिश्रुतं तस्मै एवमेवेति शंकर।
स तद्वत्क्रोधसम्भूतवह्निना ज्वलितस्तदा॥ १२ ॥

भस्मतां प्राप तत्पत्नी रतिस्तस्मादुपागता।
शोकसंततहृदया याचते पतिमात्मनः ॥ १३ ॥

यदि त्वं कृपया कामदेहं प्रापयसि प्रभो।
तदा देवाः सत्यवाक्या भवन्ति त्रिदशेश्वर॥ १४॥

रतिः प्राप्नोति भर्तारं जगन्मोहनकारणम्।

श्रीमहादेव उवाच

इत्याकर्ण्य महादेवः प्रणतानां कृपाकरः ॥ १५ ॥

कामस्य प्रापयामास पुनर्देहं महामुने।
सम्प्राप्य देहं कामस्तु प्रणिपत्य महेश्वरम्॥ १६ ॥

सर्वान् देवांश्चाभिवाद्य रत्याः पार्श्वं जगाम ह।
रतिः पतिं समासाद्य हर्षनिर्भरमानसा॥ १७॥

बभूव मुनिशार्दूल देवाश्च हर्षसंयुताः ।
अथ प्रवृत्ता रजनी शशाङ्कश्च सुनिर्मलः ॥ १८ ॥

प्रवृद्धतेजा विबभौ देवाश्चक्रुर्महोत्सवम्।
एतस्मिन्नन्तरे ब्रह्मा प्राह देवं सदाशिवम्॥ १९ ॥

विभूतिभूषणं पिङ्गजटामौलिं चतुर्भुजम्।

ब्रह्मोवाच

शम्भो तवेदं परमं रूपं देवादिदुर्लभम्॥ २० ॥

योगिनां मानसोत्साहजनकं प्रीतिवर्धनम्।
इदं संहृत्य रूपं वै धेहि सौम्यतमं प्रभो॥ २१ ॥

यथातिहर्षमाप्नोति श्वशुरस्ते नगाधिपः ।
विलोक्य मेनका चापि श्वश्रूस्त्वामतिसुन्दरम्॥ २२ ॥

उन दोनोंने कहा—शरणागतोंपर कृपा करनेवाले प्रभो! देव! अब आप देवताओंके उपकारके लिये एक कार्य कर दीजिये। जब हमलोगोंका वचन मानकर कामदेवने आपके ऊपर बाण छोड़नेके लिये प्रस्थान किया था, तब उसने इन्द्रके नेतृत्वमें आये हुए सभी देवताओंसे कहा था, 'मेरे इस कृत्यसे कुपित होकर यदि महादेव मुझे नष्ट कर देंगे, तब आप देवतागण मेरे जीवनके लिये यथोचित प्रयास कीजियेगा।' शंकर! 'ऐसा ही होगा'—यह कहकर वे देवतागण उनसे वचनबद्ध हो गये थे॥ ९—११½॥ इस प्रकार वह कामदेव आपके क्रोधसे उत्पन्न अग्निमें जलकर राख हो गया। अब शोकसे संतप्तहृदयवाली उसकी पत्नी रति यहाँ आयी हुई है और अपने पतिके लिये याचना कर रही है। प्रभो! त्रिदशेश्वर! यदि आप कृपा करके कामदेवको जीवित कर देते हैं तो इससे (रतिको दिया गया) देवताओंका वचन सत्य हो जाता है और रति भी जगत्‌को मोहित करनेवाले पतिको प्राप्त कर लेगी॥ १२—१४½॥

श्रीमहादेवजी बोले—महामुने! ऐसा सुनकर प्रणतजनोंपर कृपा करनेवाले महादेवने फिरसे कामदेवको शरीरकी प्राप्ति करा दी। तब कामदेवने देह प्राप्त कर उन महेश्वरको प्रणाम किया और सभी देवताओंका अभिवादन करनेके बाद वह रतिके पास चला गया। मुनिश्रेष्ठ! इस प्रकार पति कामदेवको प्राप्त करके रतिका मन हर्षसे भर उठा और देवतागण प्रसन्नतासे युक्त हो गये। मनोहर रात्रिवेला उपस्थित हो गयी और चन्द्रमा अत्यन्त निर्मल हो गया। देवताओंके तेजमें वृद्धि हो गयी और वे महान् उत्सव मनाने लगे॥ १५—१८½ ॥ इसी समय ब्रह्माजी पीले-लाल-मिश्रित वर्णके जटासे युक्त मस्तकवाले तथा आभूषणके रूपमें विभूति धारण करनेवाले चतुर्भुज भगवान् सदाशिवसे कहने लगे— ॥ १९½॥

ब्रह्माजीने कहा—शम्भो! आपका यह श्रेष्ठ रूप देवता आदिके लिये दुर्लभ, योगियोंके मनमें उत्साह पैदा करनेवाला तथा प्रेमको बढ़ानेवाला है। प्रभो! अब आप इस रूपको तिरोहित करके सौम्यतम रूप धारण कीजिये, जिससे कि आपके श्वशुर गिरिराज हिमालय तथा सास मेनका भी आपको अति सुन्दर देखकर प्रसन्नता प्राप्त करें॥ २०—२२॥

सर्वाङ्गसुन्दरी गौरी तुभ्यं देया महाद्रिणा।
यथा तस्य भवेत्प्रीतिस्तथा कुरु महेश्वर॥ २३॥

यथा बिभेति काचिन्न वीक्ष्य त्वां भीमरूपिणम्।
तथा चारुतरं रूपं द्विभुजैकाननं शिवम्॥ २४॥
देव देव विधेहि त्वं विवाहे स्मरसूदन।

श्रीमहादेव उवाच

इत्युक्तो ब्रह्मणा शम्भुस्तत्क्षणान्मुनिपुङ्गव॥ २५॥

बभूव द्विभुजः सौम्यरूपश्चैकाननः क्षणात्।
जटास्वर्णकिरीटत्वं प्राप त्वग्निः सुचित्रताम्॥ २६॥

भस्मासीच्चन्दनं गात्रे शेषः स्वर्णविभूषणम्।
अथ तं त्रिदशेशानं सम्प्राप्यातिशुभे क्षणे॥ २७॥

वृषपृष्ठे समारोप्य देवगन्धर्वकिन्नराः।
गिरीन्द्रस्य पुरं गन्तुं मनश्चक्रुर्महामते॥ २८॥

प्रयाणकाले त्रिदशेश्वरस्य
बभूव वृष्टिः कुसुमावलीनाम्।
स्वर्वासिनां दुन्दुभिनिःस्वनौघै-
र्दिगन्तमासीत्परिपूरितं मुने॥ २९॥

वायुर्ववौ शैत्यसुगन्धयुक्तः
शनैः शनैर्वै चुक्रुशुः पतत्रिणः।
सुशोभितास्ते प्रमथा अपि ध्वनिं
चक्रुः सुघोरं वदनेन हर्षिताः॥ ३०॥

एवं प्रवृत्ते वृषभध्वजस्तदा
सार्धं समस्तैस्त्रिदशैर्मुनीश्वरैः।
प्रायाद्गिरीन्द्रस्य पुरं महामते
सकिन्नरश्चारुशशाङ्कशेखरः॥ ३१॥

महेश्वर! हिमालय आपको अपनी सर्वाङ्गसुन्दरी पुत्री गौरीका अर्पण करनेवाले हैं, अतः जिस भी तरहसे उनकी प्रसन्नता हो, आप वैसा ही कीजिये। कामदेवका नाश करनेवाले देवाधिदेव! आप विवाहमें दो भुजाओं तथा एक मुखसे युक्त उस तरहका अत्यन्त सुन्दर तथा कल्याणकारी रूप धारण कीजिये, जिससे कि आपको भयानक रूपवाला देखकर कोई भी स्त्री भयभीत न हो॥ २३-२४½॥

श्रीमहादेवजी बोले—मुनिश्रेष्ठ! ब्रह्माके ऐसा कहते ही उसी क्षण भगवान् शिव दो भुजाओं तथा एक मुखसे युक्त सौम्यरूपवाले हो गये। क्षणभरमें उनकी जटा सोनेका मुकुट हो गयी, अग्निरूप तीसरा नेत्र अत्यन्त सुन्दर हो गया, शरीरमें लगा हुआ भस्म चन्दन हो गया और शेष स्वर्णका आभूषण हो गये॥ २५-२६½॥ इसके बाद महेश्वरके पास आकर शुभ मुहूर्तमें उन देवेश्वरको बैलकी पीठपर बैठाकर देवताओं, गन्धर्वों और किन्नरोंने गिरिराज हिमालयके पुरको प्रस्थान करनेके लिये मनमें निश्चय किया॥ २७-२८॥ मुने! देवेश्वर शिवके प्रस्थानके समय पुष्प-राशिकी वर्षा होने लगी और स्वर्गमें रहनेवाले देवताओंकी दुन्दुभियोंकी तीव्र ध्वनियोंसे दिशाएँ परिपूर्ण हो गयीं। शीतल तथा सुगन्धित हवा मन्द-मन्द बहने लगी, पक्षी कलरव करने लगे और प्रमथगण भी अत्यन्त हर्षित होकर मुखसे सुन्दर तथा अति तीव्र ध्वनि करने लगे॥ २९-३०॥ महामते! इस प्रकार समस्त वैवाहिक तैयारियाँ पूर्ण हो जानेपर सुन्दर चन्द्रमाको अपने मस्तकपर धारण करनेवाले वृषभध्वज भगवान् शिवने सभी देवताओं, मुनीश्वरों और किन्नरोंके साथ गिरिराज हिमालयके पुरके लिये प्रस्थान किया॥ ३१॥

॥ इति श्रीमहाभागवते महापुराणे श्रीमहादेवनारदसंवादे श्रीशिवस्य हिमालयपुर आगमनं नाम सप्तविंशतितमोऽध्यायः ॥ २७॥

॥ इस प्रकार श्रीमहाभागवतमहापुराणके अन्तर्गत श्रीमहादेव-नारद-संवादमें 'श्रीशिवका हिमालयपुर-आगमन' नामक सत्ताईसवाँ अध्याय पूर्ण हुआ॥ २७॥

अट्ठाईसवाँ अध्याय

हिमालयद्वारा बारातका यथोचित सत्कार करना, शिव-पार्वतीके माङ्गलिक विवाहोत्सवका वर्णन, शिव-पार्वतीके विवाहोत्सवके पाठकी महिमा

श्रीमहादेव उवाच

अथाद्रिराजो ज्ञात्वा तु समायान्तं महेश्वरम्।
आगत्याभ्यर्च्य विधिवत्पुरमावेशयत्स्वयम्॥ १ ॥
ब्रह्माणं च तथा विष्णुं तथेन्द्रादिसुरोत्तमान्।
पूजयित्वा यथान्यायं पुरमावेशयद्गिरिः ॥ २ ॥
मरीच्यादीन्महर्षींश्च पूजयित्वा यथोचितम्।
स्वपुरं प्रापयामास गिरीन्द्रो हृष्टमानसः ॥ ३ ॥
विलोक्य पार्वतीनाथं शान्तं सुरुचिराननम्।
द्विभुजं रत्नभूषाढ्यं दिव्यस्वर्णकिरीटिनम्॥ ४ ॥
शशाङ्काङ्कितमूर्धानं शतसूर्यसमप्रभम्।
मुमोद मेनका तद्वद्गिरीन्द्रोऽपि हिमालयः ॥ ५ ॥
तदान्ये ये समायाता देवगन्धर्वकिन्नराः ।
ते वीक्ष्य पार्वतीनाथं चक्षुरन्यत्र नाक्षिपन्॥ ६ ॥
ऊचुः परस्परं सर्वे यथा गौरी सुरूपिणी।
तथैव रूपसम्पन्नो महादेवो जगत्पतिः ॥ ७ ॥
अथाद्रिनाथः सम्प्राप्ते काले चातिसुलक्षणे।
पार्वतीं देवदेवाय समभ्यर्च्य ददौ स्वयम्॥ ८ ॥
यथोक्तविधिना शम्भुस्तां जग्राह हिमात्मजाम्।
भार्यात्वेन प्रहृष्टात्मा सृष्टिस्थित्यन्तकारिणीम्॥ ९ ॥

तदा गिरीन्द्रनगरं महानासीन्महोत्सवः ।
यथा न भूतः कुत्रापि भविता वा न कुत्रचित्॥ १० ॥
प्रहृष्टमानसाः सर्वे देवा आसन्महामते।

श्रीमहादेवजी बोले—इसके बाद महेश्वरको आया हुआ जानकर गिरिराज हिमालयने वहाँ आकर उनकी विधिवत् पूजा की और उन्हें स्वयं पुरमें प्रवेश कराया। साथ ही हिमालयने ब्रह्मा, विष्णु और इन्द्र आदि श्रेष्ठ देवताओंकी यथोचित पूजा करके उन्हें भी अपने पुरमें प्रवेश कराया। इसी प्रकार प्रसन्नचित्त गिरिराज हिमालय मरीचि आदि महर्षियोंकी भी यथोचित पूजा करके उन्हें अपने पुर ले गये॥ १—३॥ रत्नोंके आभूषणोंसे अलङ्कृत, सोनेके दिव्य मुकुटसे सुशोभित, दो भुजाओं तथा अत्यन्त सुन्दर मुखवाले, चन्द्रमासे सुशोभित सिरवाले और सैकड़ों सूर्योंकी प्रभाके तुल्य प्रतीत होनेवाले शान्तस्वभाव पार्वतीनाथ शिवको देखकर मेनका और उसी तरह गिरिराज हिमालय भी अत्यन्त आनन्दित हुए॥ ४-५॥ उस अवसरपर जो अन्य देव, गन्धर्व तथा किन्नर आये हुए थे, वे एकटक पार्वतीनाथ शिवजीको ही देख रहे थे और अन्यत्र कहीं भी दृष्टि नहीं ले जा रहे थे। सभी लोग आपसमें यह कहते थे कि जैसे गौरी रूपवती हैं, वैसे ही जगत्पति महादेव भी रूपसम्पन्न हैं॥ ६-७॥ इसके बाद सुन्दर लक्षणोंसे युक्त मुहूर्त आनेपर गिरिराज हिमालयने पार्वतीका पूजन करके वैवाहिक विधिसे देवाधिदेव शिवको प्रदान कर दी और प्रसन्नमन शम्भुने जगत्का सृजन, पालन एवं संहार करनेवाली उन हिमालयपुत्री पार्वतीका पत्नीरूपमें पाणिग्रहण किया॥ ८-९॥ उस समय गिरीन्द्र हिमालयके नगरमें ऐसा महान् उत्सव सम्पन्न हुआ जैसा कभी हुआ नहीं था और आगे कहीं होनेवाला भी नहीं है। महामते! उस समय सभी देवताओंके मनमें प्रसन्नता छायी हुई थी॥ १०१/२॥

हरे गृहीतदारे तु देवा पूर्णमनोरथा ॥ ११ ॥
प्रशशसुर्मुहु काम महादेवविमोहनम्।
विलोक्य शकर तत्र पावत्या सहित सुरा ॥ १२ ॥

ऊचु परस्पर सर्वे गन्धर्वाश्च महर्षय ।
अहो बहुतर भाग्य गिरिराजस्य धीमत ॥ १३ ॥

यत स्वय जगन्माता कन्यात्व समुपागता।
या सूते सकल विश्व स्वेच्छया प्रकृति परा ॥ १४ ॥

सा प्राप यद्गृहे जन्म कन्यारूपेण लीलया।
तत्फल नाल्पतपस एतस्य गिरिभूपते ॥ १५ ॥

कि वाच्यमतुल भाग्य मेनाया पूर्वसञ्चितम्।
एतस्यास्त्रिजगन्मातुरपि माताऽभवद्यत ॥ १६ ॥

प्रभाव को महेशस्य लोके वक्तु क्षमो भवेत्।
रूप वा विभव वापि वाचातीत मनोतिगम् ॥ १७ ॥

एवमन्यद्बहुविध प्रोचु सर्वे परस्परम्।
विलोक्य रूपसम्पन्नौ पार्वतीपरमेश्वरौ ॥ १८ ॥

ब्रह्मा विष्णुश्च भगवान् भगवन्त महेश्वरम्।
पार्वत्या सहित प्राह शान्त हर्षसमाकुलम् ॥ १९ ॥

ब्रह्माविष्णू ऊचतु

प्रभो देव सतीय सा पार्वती तव गेहिनी।
यस्या वियोगदु खार्तस्तपस्तसु भवान्पुरा ॥ २० ॥

सय भगवती देवी जगदाद्या सनातनी।

श्रीमहादेव उवाच

ततो हिमालय शम्भु तुष्टाव भक्तिसयुत ॥ २१ ॥

हिमालय उवाच

देवदेव महादेव भक्तवत्सल शकर।
नमस्तुभ्य नमस्तुभ्य नमस्तुभ्य नमो नम ॥ २२ ॥

अद्य मे सफल जन्म जीवित च सुजीवितम्।
पश्यामि यज्जगन्नाथ जगन्मात्रा सम दृशा ॥ २३ ॥

विमर्द्य भक्षयश्चान्यानाससाद रघूत्तमम्॥ २६॥

स सम्प्रेक्ष्य रघुश्रेष्ठ श्याम दूर्वादलप्रभम्।
उद्यतास्त्र महाबाहु रक्षसामन्तकारिणम्॥ २७॥

सानुज समरेऽक्षोभ नीलोत्पलदलेक्षणम्।
ननाद बलवान् घोरो युगान्तजलदो यथा॥ २८॥

वह राक्षस भी पैर तथा हाथके प्रहारसे वानरोका मर्दन करके और अन्य वानरोका भक्षण करते हुए श्रीरामके सामने आ गया। वह बलवान् राक्षस भी दूर्वादलके समान आभावाले, श्यामवर्णवाले, राक्षसोका नाश करनेवाले, महान् भुजावाले, हाथमें अस्त्र लिये हुए तथा नीलकमलदलके समान नेत्रवाले, क्षोभरहित, अनुजसहित रघुश्रेष्ठको युद्धक्षेत्रमे देखकर युगान्तकारी बादलकी तरह गर्जना करने लगा॥ २६—२८॥

राघवोऽपि महानाद ब्रह्माण्डक्षोभकारकम्।
चक्रे मुदा मुनिश्रेष्ठ ततो युद्धमवर्तत॥ २९॥

मुनिश्रेष्ठ! रघुश्रेष्ठ श्रीराम भी प्रसन्न होकर ब्रह्माण्डको क्षुब्ध करनेवाली घोर गर्जना करने लगे, तदनन्तर युद्ध आरम्भ हो गया॥ २९॥

ब्रह्मास्त्रजालै सक्षिप्तै परस्परजिगीषया।
तयोरासीन्महायुद्ध सुरासुरदुरासदम्॥ ३०॥

सैन्यैश्च राक्षसश्रेष्ठैर्वानराणा महात्मनाम्।
आसीत्सुतुमुल युद्ध सग्रामे जयमिच्छताम्॥ ३१॥

एक-दूसरेपर विजय प्राप्त करनेकी इच्छासे छोडे गये ब्रह्मास्त्रजालोसे उन दोनोमे महान् युद्ध हुआ, जो देवताओ तथा राक्षसोके लिये अत्यन्त दुर्गम था। सग्राममे विजयकी इच्छा रखनेवाले महापराक्रमी वानरोका बलशाली राक्षस-सैनिकोके साथ घोर युद्ध हुआ॥ ३०-३१॥

॥ इति श्रीमहाभागवते महापुराणे श्रीमहादेवनारदसवादे श्रीरामकुम्भकर्णयोर्युद्धवर्णन नाम चतुश्चत्वारिशोऽध्याय ॥ ४४॥

॥ इस प्रकार श्रीमहाभागवतमहापुराणके अन्तर्गत श्रीमहादेव-नारद-सवादमे 'श्रीराम-कुम्भकर्णयुद्धवर्णन' नामक चौवालीसवाँ अध्याय पूर्ण हुआ॥ ४४॥

पैतालीसवाँ अध्याय

श्रीरामकी विजयहेतु ब्रह्माजी तथा देवगणोका देवीकी आराधना करना, देवीद्वारा राक्षसोके वधका वरदान देना

श्रीमहादेव उवाच

ब्रह्मापि बिल्ववृक्षे ता देवीं सम्पूज्य भक्तित।
बोधयामास रामस्य जयार्थं जगदम्बिकाम्॥ १॥
स्तोत्रेण देवीसूक्तेन प्रणिपत्य पुन पुन।
वेदोक्तेन सुरश्रेष्ठोऽकालेऽपि च सुरेश्वरीम्॥ २॥

श्रीमहादेवजी बोले—सुरश्रेष्ठ ब्रह्माजी बिल्ववृक्षकी छायामे भगवती जगदम्बिकाका असमयमे भी भक्तिपूर्वक पूजन करके और बार-बार उन्हे साष्टाङ्ग प्रणाम करके वेदोक्त स्तुति तथा देवीसूक्तके द्वारा भगवान् श्रीरामकी विजयके लिये भगवती सुरेश्वरीका प्रबोधन करने लगे—॥ १-२॥

ब्रह्मोवाच

ॐ नमो विमलवदनायै भूर्भुव स्व परमकमलायै केवलपरमानन्दसन्दोहरूपायै लोकत्रयतिमिरापहारक-परमज्योतीरूपायै असदभिलापयुक्तसदूपितदोषापसारण-परमामृतरूपायै मूर्तिमत्कोटिचन्द्रवदनायै दुर्गादेव्यै सर्ववेदोद्भवनारायण्यै जनशरीरे परमात्मरूपायै प्रसीद ते नमो नम॥ ३॥

ब्रह्माजी बोले—ॐ विमल वदनवालीको नमस्कार है। भूर्लोक, भुवर्लोक तथा स्वर्लोकमें व्याप्त परम कमलास्वरूपिणी, एकमात्र परमानन्दराशिस्वरूपा, तीनो लोकोके अन्धकारको दूर करनेवाली, परम ज्योतिस्वरूपा, असत् अभिलापासे युक्त सदूषित

ॐ करालरूपे प्रणवस्वाहास्वरूपे ह्रौंस्वरूपिणि अम्बिके भगवत्यम्ब त्रिगुणप्रसूते नमो नमः ॥ ४॥

सिद्धिकरे स्फ्रे स्फ्रौं स्वाहारूपिणि स्वधारूपे विमल-मुखे चन्द्रमुखे कोलाहलमुखे शर्वे प्रसीद॥ ५॥

जगन्मोदकरीं मृदुदृर्शी त्वां महेशीं क्रीडास्थाने स्वागतां भुवनेशीं शत्रुस्त्वं मित्ररूपा च दुर्गा दुर्गस्य त्वं योगिनामन्तरेऽपि एकाऽनेका सूक्ष्मरूपाविकारा ब्रह्माण्डानां कोटिकोटिप्रसूतम्॥ ६॥

एकोऽहं विष्णुः कः परो वा शिवाख्यो देवाश्चान्ये स्तोतुमीशा भवामः । त्वं स्वाहा त्वं स्वधा त्वं च वौषट् त्वं चोङ्कारस्त्वं च लज्जादिबीजं त्वं च स्त्री त्वं च पुमान् सर्वरूपा त्वां नमामि बोधये नः प्रसीद॥ ७॥

त्वं वै देवर्षिर्देवताकालरूपा त्वं वै मासस्त्वमृतुश्चायने द्वे। कव्यं भुङ्क्षे त्वं यथा स्वधा तद्वत् स्वाहा हव्यभोक्त्री स्वयं दवि॥ ८॥

त्वं वै देवा शुक्लपक्षे प्रपूज्यास्त्वं पित्राद्या कृष्णपक्षे प्रपूज्या । त्वं वै सत्यं निष्कलं च स्वरूपं त्वां वै नत्वा बोधयामि प्रसीद॥ ९॥

चन्द्रार्काग्निविलोचने नीचं नीचमुच्चं नत्वा याति मुक्तिं त्वत्पादध्यानयोगात्। त्वत्पादाब्जं चार्चयित्वा तु मुक्तिं को या न प्राप्नोत्युत्तमां देवि सूक्ष्मम्॥ १०॥

दोषोंको दूर करनेवाली, परम अमृतस्वरूपिणी, मूर्तिमान् करोडो चन्द्रमाके समान मुखवाली, सभी वेदोमें वर्णित उद्भववाली नारायणी, शरीरमात्रमें परमात्मरूपसे अवस्थित दुर्गादेवी! आप प्रसन्न हो, आपको बार-बार नमस्कार है॥ ३॥ ॐ विकरालरूपे! प्रणवस्वाहास्वरूपे! ह्रौं-स्वरूपिणी! अम्बिके! त्रिगुणप्रसूते! अम्ब! भगवती! आपको बार-बार नमस्कार है॥ ४॥ सिद्धिकरी, स्फ्रें-स्फ्रौंस्वरूपिणी, स्वाहारूपिणी, स्वधारूपा, निर्मलमुखी, चन्द्रमुखी, कोलाहलमुखी, शर्वा! आप प्रसन्न हों॥५॥ जगत्को हर्षित करनेवाली, मधुर दृष्टिवाली, क्रीडास्थानमें स्वयं आयी हुई आप महेश्वरी भुवनेशीको मैं प्रणाम करता हूँ। आप शत्रुरूपा और मित्ररूपा भी हैं, आप दुर्गकी दुर्गा हैं, आप योगियोके अन्तःस्थलमें स्थित रहती हुई एकरूपा, अनेकरूपा, सूक्ष्मरूपा, निर्विकारा और करोडा-करोड ब्रह्माण्डोको प्रकट करनेवाली हैं॥ ६॥ एकमात्र मैं, विष्णु अथवा शिव तथा अन्य देवता—हम सभी आपकी स्तुति करनेमे कैसे समर्थ हो सकते हैं? आप स्वाहा, स्वधा, वौषट्, ओङ्कार और लज्जादिबीजरूपा हैं, आप ही स्त्री, पुरुष तथा सर्वरूपवाली हैं। आपको नमस्कार है, आपको हम प्रबोधित कर रहे हैं। आप हमलोगोंपर प्रसन्न होइये॥ ७॥ आप ही देवर्षि, देवता तथा कालरूपा हैं, मास, ऋतु, दो अयन (उत्तरायण एवं दक्षिणायन) भी आप ही हैं। देवी! आप स्वधास्वरूपा होकर कव्यका भोग करती हैं। उसी प्रकार स्वाहास्वरूपा होकर स्वयं हव्यभोक्त्री हैं॥ ८॥ आप ही शुक्लपक्षमें देवताके रूपमे तथा कृष्णपक्षमे पित्रादिके रूपमे प्रपूजित हैं। आप ही सत्यस्वरूपा और अखण्डस्वरूपा हैं। मैं आपको नमस्कार कर आपका प्रबोधन करता हूँ। आप प्रसन्न हो॥ ९॥ चन्द्र, सूर्य तथा अग्नि—इन तीन नेत्रोवाली देवी! आप निम्न-से-निम्न व्यक्तिको उच्च बना देती हैं तथा वह आपको नमस्कार करके तथा आपके चरणकमलका ध्यान करके मुक्तिको प्राप्त कर लेता है। आपके श्रेष्ठ पदकमलका पूजन करके कौन उत्तम मुक्तिको नहीं प्राप्त कर लेता है॥ १०॥

स्थूलमुच्च नीच नीचमुच्च कर्तुं समर्था त्व तु काले शक्तिरूपा भवानि त्वा नत्वाह बोधये न प्रसीद। त्व वै शक्ती राघवे रावणे च रुद्रादौ वापीहास्ति या त्व सा त्व शुद्ध वामकेन प्रवर्ध त्वा नत्वा बोधये न प्रसीद॥ ११॥
ॐ तत्सद् ब्रह्मणे नम ॥

श्रीमहादेव उवाच

अनेन वेदसूक्तेन स्तोत्रेण मुनिसत्तम।
सस्तुता ब्रह्मणा देवी प्रबोध प्राप चण्डिका॥ १२॥

प्रबुद्धाया च देव्या स ब्रह्मा लोकपितामह ।
प्राञ्जलिर्देवतै सार्धं प्रार्थयामास वाञ्छितम्॥ १३॥

ब्रह्मोवाच

देवि त्व बोधिताऽस्माभिरकालेऽपि सुरोत्तमे।
हिताय सर्वभूताना राक्षसाना वधाय च॥ १४॥

जयाय रामचन्द्रस्य सग्रामेऽतिसुदारुणे।
यावद्दशाननो युद्धे सपुत्रगणबान्धव ॥ १५॥

पतिष्यति जगच्छत्रुस्तावत्त्वा जगदम्बिकाम्।
पूजयामो महादेवि राघवस्य जयार्थिन ॥ १६॥

त्व प्रसन्ना यदि शिवे तदा पूजा प्रगृह्य च।
निपातय महाशत्रुकुल देवि दिने दिने॥ १७॥

श्रीदेव्युवाच

पतिष्यत्यद्य सग्रामे कुम्भकर्णो महाबल ।
सहित सैनिकैर्भीमैर्महाबलपराक्रम ॥ १८॥

एवमेना समारभ्य नवमीमसिता शुभाम्।
यावच्छुक्ला तु नवमी तावदेव दिने दिने॥ १९॥

पतिष्यन्ति न सन्देहो राक्षसा रणमूर्धनि।
अमावस्यानिशाया तु मेघनादे हते सति॥ २०॥

रावणोऽपि च सतप्तहृदयो राममेष्यति।

आप उच्चको निम्न तथा निमको उच्च करनेमे समर्थ हैं। भवानी! आप समयपर शक्तिरूपा हैं। आपको नमस्कार करके मैं आपका प्रबोधन करता हूँ। आप हमपर प्रसन्न होइये। श्रीराम, रावण, रुद्रादि तथा इस ससारमे शक्तिरूपसे जो विराजमान हैं वे आप ही हैं, आप जो हैं सो हें अर्थात् अगम्यस्वरूपा हैं। शुद्धाचारी श्रीरामका वाममार्गसे त्वरित अभ्युदय कीजिये। आपको नमस्कार कर मैं आपका प्रबोधन करता हूँ। आप हमपर प्रसन्न होइये॥ ११॥

ॐ तत्सत् ब्रह्मको नमस्कार हे।

श्रीमहादेवजी बोले—मुनिश्रेष्ठ! इस वेदसूक्त तथा स्तोत्रसे ब्रह्माजीने जब देवीकी स्तुति की तब भगवती चण्डिका प्रबुद्ध हो गयीं। देवीके प्रबुद्ध हो जानेपर वे लोकपितामह ब्रह्मा सभी देवताओंके साथ हाथ जोडकर अपने मनोवाञ्छितकी प्राप्तिके लिये प्रार्थना करने लगे— ॥ १२-१३॥

ब्रह्माजी बोले—देवी, सुरोत्तमे! सभी प्राणियोके कल्याण, अत्यन्त भीषण सग्राममे श्रीरामकी विजय तथा राक्षसोके नाशके लिये हमने असमयमे आपको प्रबोधित किया है। महादेवी! जबतक जगत्-शत्रु दशानन अपने पुत्र तथा बान्धवोके साथ युद्धमे नहीं मारा जायगा, तबतक श्रीरामके विजयकी इच्छावाले हमलोग आपकी पूजा करते रहेगे। शिवे! देवी! यदि आप प्रसन्न हैं तो प्रतिदिन हमलोगोकी पूजा ग्रहण कर महाशत्रुसमूहका विनाश करती रहिये॥ १४—१७॥

श्रीदेवीजी बोलीं—महाबलशाली एव पराक्रमी वीर कुम्भकर्ण अपने भयकर सैनिकाके साथ आज ही युद्धमे मारा जायगा। इस कृष्णपक्षकी शुद्ध नवमीसे आरम्भ होकर जबतक शुक्लपक्षकी नवमी आयेगी, तबतक प्रत्येक दिन युद्धक्षेत्रमे राक्षस मारे जायँगे। इसमे किसी प्रकारका सदेह नहीं है। अमावस्यातिथिकी रात्रिमें मेघनादके मारे जानेपर सतप्तहृदय रावण भी [युद्धहेतु] भगवान् श्रीरामके पास आ जायगा॥ १८—२०½ ॥

सन्दोहरूपायै लोकत्रयतिमिरापहारकपरमज्योती-रूपायै असदभिलापयुक्तसदूषितदोषापसारणपरमामृत-रूपायै मूर्तिमत्कोटिचन्द्रवदनायै दुर्गादेव्यै सर्ववेदोद्भव-नारायण्यै जन्यशरीरे परमात्मरूपायै प्रसीद ते नमो नम ॥ २१ ॥

ॐ करालरूपे प्रणवस्वाहास्वरूपे ह्रौंस्वरूपिणि अम्बिके भगवत्यम्ब त्रिगुणप्रसूते नमो नम । सिद्धिकरे स्फ्रें।
अमर्षवशमापन्नो युद्धार्थं समराजिरे ॥ २२ ॥

देवान्तकप्रभृतिभिर्महाबलपराक्रमै ।
ततस्तेषु हतेष्वेव वीरेषु रणमूर्धनि ॥ २३ ॥

देवान्तकादिषु तथा क्रोधसरक्तलोचन ।
स योत्स्यति महावीरो रावणो लोककण्टक ॥ २४ ॥

तयोस्तु दारुण युद्ध रामरावणयोस्तदा।
भविष्यति यथा कैश्चिन्न दृष्ट न श्रुत क्वचित् ॥ २५ ॥

तत्रापि शुक्लसप्तम्यामारभ्य नवमीदिनम्।
यावद्घोरतर युद्ध भविष्यति तयोर्महत् ॥ २६ ॥

तस्यामारभ्य सप्तम्या नवमीं यावदेव हि।
मृण्मय्या प्रतिमाया तु पूज्याह विधिवत्पुरा ॥ २७ ॥

भवद्भि समरे रामचन्द्रस्य जयकाङ्क्षिभि ।
अनर्घैरुपचारैस्तु यथार्हैर्बलिभिस्तथा ॥ २८ ॥

स्तोत्रैर्वेदपुराणाक्तै स्तोतव्या भक्तिभावत ।
सप्तम्या पत्रिकाया तु वेशन मूलयोगत ॥ २९ ॥

कर्तव्य विधिवद्देवास्ततो रामधनु सरम्।
अष्टम्या पूजिताह तु प्रतिमाया सुशोभने ॥ ३० ॥

अष्टमीनवमीसन्धौ वत्स्यामि शिरसो रणे।
रावणस्य सुदुष्टस्य भूयो भूयो दुरात्मन ॥ ३१ ॥

तत सन्धौ क्षणेऽह तु पूजितव्या विधानत ।
विपुलैरुपचारैस्तु मासशोणितकर्दमै ॥ ३२ ॥

तत शत्रु बलि दद्यात्कृत्वा पिष्टमय मम।
नवम्या पूजिताह तु बलिभिर्विविधैरपि ॥ ३३ ॥
अपराह्णे रणे वीर पातयिष्यामि रावणम्।

[ब्रह्माजी पुन बोले—] (आनन्द)-राशिस्वरूपा! तीनों लोकोंके अन्धकारको दूर करनेवाली, परम ज्योतिस्वरूपा, असत् अभिलापासे युक्त सदूषित दोषोंको दूर करनेवाली, परम अमृतस्वरूपिणी, मूर्तिमान् करोड़ों चन्द्रमाके समान मुखवाली, सभी वेदोंमे वर्णित उद्भववाली नारायणी, शरीरमात्रमे परमात्मरूपसे अवस्थित दुर्गादेवी! आप प्रसन्न हों, आपको बार-बार नमस्कार है ॥ २१ ॥ ॐ विकरालरूपे! प्रणव-स्वाहास्वरूपे! ह्रौंस्वरूपिणी! अम्बिके! त्रिगुणप्रसूते! अम्ब! भगवती! आपको बार-बार नमस्कार है। सिद्धिकरी स्फ्रेंस्वरूपिणीको नमस्कार है।

[देवीजीने पुन कहा—] देवान्तकप्रभृति महाबली और पराक्रमी वीर राक्षसोंको साथ लेकर क्रोधके वशीभूत हुआ रावण रणभूमिमे आयेगा। तत्पश्चात् युद्धभूमिमें देवान्तक आदि राक्षसवीरोंके मारे जानेपर वह लोकपीडक, क्रोधसे लाल आँखोंवाला महावीर रावण स्वयं युद्ध करेगा ॥ २२—२४ ॥ तब श्रीराम और रावणका ऐसा कठिन युद्ध होगा, जैसा न किसीने देखा है और न कहीं सुना ही गया है। उसमे भी आश्विन शुक्ल सप्तमीसे आरम्भ होकर नवमीतिथितक उन दोनों योद्धाओंमे महान् भयकर सग्राम होगा ॥ २५-२६ ॥ युद्धमें श्रीरामचन्द्रकी विजयकी आकाङ्क्षावाले आपलोगोंको उस (शुक्ल) सप्तमीसे प्रारम्भ करके नवमीतिथिपर्यन्त सर्वप्रथम मृण्मयी प्रतिमामे विशुद्ध पूजनोपचारोंसे मेरी विधिवत् पूजा करनी चाहिये तथा वेद-पुराणोक्त स्तोत्रोंसे भक्तिपूर्वक मेरा स्तवन करना चाहिये ॥ २७-२८½ ॥ देवगण! आश्विनमासमे शुक्लपक्षमे मूल नक्षत्रसे युक्त सप्तमी तिथिको पत्रिका-प्रवेशन तथा श्रीरामके धनुष-बाणका विधिवत् पूजन करना चाहिये ॥ २९½ ॥ अष्टमीको प्रतिमामें पूजित होनेपर मैं अष्टमी तथा नवमीके उत्तम सधिकालमें दुरात्मा दुष्ट रावणके सिरसे रणभूमिमें आ जाऊँगी, तदनन्तर उस सन्धिके क्षणमे विधिविधानसे विपुल उपचारोंसे बारम्बार मेरी पूजा करनी चाहिये। तत्पश्चात् नवमीतिथिको भी विविध प्रकारके उपचारोंसे पूजित होनेपर मैं अपराह्णमें युद्धक्षेत्रमें उस वीर रावणका सहार करूँगी ॥ ३०—३३½ ॥

दशम्या मा प्रपूज्याथ प्रातरेव सुरोत्तमा ॥ ३४॥

मूर्तिर्विसर्जनीया तु स्रोत सु सुमहोत्सवे ॥ ३५॥

एव पञ्चदशाहेषु कृत्वा च सुमहोत्सवम्।
निवृत्ति प्राप्स्यथ सुरा हते तस्मिन्दुरात्मनि॥ ३६॥

श्रेष्ठ देवगण! दशमीतिथि (विजयादशमी)-मे प्रात ही मेरी पूजाकर महोत्सवपूर्वक नदियोमे मेरी मृण्मयी मूर्ति विसर्जित करनी चाहिये॥ ३४-३५॥ इस प्रकार इन [आश्विन कृष्ण नवमीसे शुक्ल नवमीतक] पद्रह दिनमे मेरी पूजाका महोत्सव करके उस दुरात्मा रावणके मारे जानेपर आपलोगोको शान्ति मिलेगी॥ ३६॥

॥ इति श्रीमहाभागवते महापुराणे श्रीमहादेवनारदसवादे ब्रह्मणा देवीसूक्तस्तुतिवर्णनं नाम पञ्चचत्वारिंशोऽध्याय ॥ ४५॥

॥ इस प्रकार श्रीमहाभागवतमहापुराणके अन्तर्गत श्रीमहादेव-नारद-सवादमे 'ब्रह्माके द्वारा देवीसूक्तस्तुतिवर्णन' नामक पैंतालीसवाँ अध्याय पूर्ण हुआ॥ ४५॥

छियालीसवॉ अध्याय

भगवती जगदम्बिकाद्वारा शारदीय पूजाविधानका निरूपण तथा उसके माहात्म्य एव फलका कथन

श्रीदेव्युवाच

एव महोत्सवो देव्या अकालेऽस्मिन्समागते।
त्रैलोक्यवासिभि कार्यो मत्तुष्ट्यै प्रतिवत्सरम्॥ १॥

नवम्यामार्द्रायुक्ताया बिल्वे मा परिपूज्य च।
सम्बोध्य भक्तित शुक्ला नवमीं यावदेव हि॥ २॥

प्रत्यह पूजयिष्यन्ति ये तु लोकत्रये सुरा।
तेषा प्रसन्ना नित्य तु पूरयिष्ये मनोरथान्॥ ३॥

न शत्रु प्रभवेत्तस्य न वा बन्धुवियोजनम्।
न दुख न च दारिद्र्य मत्प्रसादाद्भविष्यति॥ ४॥

ऐहिक यन्मनोऽभीष्ट यच्च पारत्रिक तथा।
सम्पद लभते सर्वां मत्प्रसादात्सुरोत्तमा ॥ ५॥

पुत्रायुर्धनधान्यादिवृद्धिस्तेषा दिने दिने।
भविष्यत्यचला लक्ष्मीर्मां भक्त्या यजतामपि॥ ६॥

न व्याधयो भविष्यन्ति न च तान् ग्रहपीडका।
पीडयन्ति न तेषा तु नापमृत्युर्भविष्यति॥ ७॥

न भीती राजतो वापि दस्युतो वा भविष्यति।
सिहव्याघ्रादिजन्तुभ्यो न वा भीतिर्भविष्यति॥ ८॥

यास्यन्ति वशता भूयो ह्रासयिष्यन्ति शत्रव।
विजयश्च रणे नित्य भविष्यति न सशय॥ ९॥

श्रीदेवीजी बोलीं—इस प्रकार इस असमयके उपस्थित होनेपर मेरी सतुष्टिके लिये तीनो लोकोके निवासियोको प्रत्येक वर्ष भगवतीका महोत्सव सम्पादित करना चाहिये॥ १॥ देवगणो! तीनो लोकोमे जो लोग आर्द्रानक्षत्रयुक्त नवमीतिथिको बिल्ववृक्षमे मेरी पूजा करके भक्तिपूर्वक मेरा प्रबोधन करते हुए शुक्लपक्षकी नवमीतक प्रतिदिन मेरा पूजन करेगे, उनके ऊपर प्रसन्न होकर मैं उनके सभी मनोरथ पूर्ण करूँगी॥ २-३॥ श्रेष्ठ देवगण! मेरे अनुग्रहसे उसका कोई शत्रु नहीं होता, उसके बन्धु-बान्धवोका उससे वियोग नहीं होता और उसे किसी प्रकारका दु ख तथा दारिद्र्य भी नहीं होता। मेरी कृपासे उसे इस लोक तथा परलोकके मनोवाञ्छित पदार्थ तथा अन्य सभी प्रकारकी सम्पदाओकी प्राप्ति हो जाती है॥ ४-५॥ भक्तिपूर्वक मेरी उपासना करनेवाले मनुष्योके पुत्र, आयु तथा धन-धान्य आदिकी प्रतिदिन वृद्धि होगी तथा उन्हे अचल लक्ष्मीकी प्राप्ति भी होगी, व्याधियाँ नहीं होगी, कष्टकर ग्रह उन्हे पीडित नहीं कर सकते और उनकी अकाल मृत्यु नहीं होगी। राजा, डाकू तथा सिह-बाघ आदि जन्तुओसे वे कभी भयभीत नहीं होगे। मेरी उपासना करनेवालोके शत्रु उनके अधीन हो जायँगे और उनके समक्ष नष्ट हो जायँगे तथा युद्धमे सदा उनकी विजय होगी, इसम सदेह नहीं है॥ ६—९॥

न तेषा दुष्कृत किञ्चित्मस्थास्यति सुरोत्तमा ।
नापदश्च तथा तेषा प्रभवन्ति कदाचन॥ १०॥

सम्प्राप्नोति नर सौख्य मत्प्रसादान्मदर्चक ।
अन्ते प्राप्स्यति मल्लोक सत्य सत्य न सशय ॥ ११॥

अश्वमेधादियज्ञाना कोटीनामपि यत्फलम्।
तत्फल समवाप्नोति कृत्वार्चां वार्षिकीमिमाम्॥ १२॥

मोहाद्वा द्वेषतो वापि यो मामस्मिन्महोत्सवे।
न पूजयति मूढात्मा स भवेद्योगिनीपशु ॥ १३॥

पूजयिष्यन्ति ये मर्त्ये स्वर्गे वापि रसातले।
तेषा पर हि तुष्टाह वाञ्छितानि दिन दिने॥ १४॥

सविधास्यामि सर्वाणि सत्यमेव सुरोत्तमा ।
सात्त्विक भावमाश्रित्य येऽर्चयिष्यन्ति मा जना ॥ १५॥

न तैर्बलि प्रदातव्यो न देय सामिषान्नकम्।
कर्तव्या मे महापूजा मम प्रीतिमभीप्सुभि ॥ १६॥

निरामिषैस्तु नैवेद्यै स्तोत्रैर्वेदाङ्गसम्भवै ।
विपुलैर्जपयज्ञैश्च विप्राणा भोजनैस्तथा॥ १७॥

सुसमाहितचित्तैस्तु हिंसादिपरिवर्जितै ।
राजस भावमापन्नैर्मम सम्प्रीतये तु वै॥ १८॥

कर्तव्येय महापूजा नानाबलिभिरादरात्।
छागमेषादिमहिषै सामिषान्नैस्तथैव च॥ १९॥

स्तोत्रैस्तु जपयज्ञार्थैर्विप्राणामपि भोजनै ।
दुष्टशत्रुविनाशादिधनधान्यादिवर्धनम् ॥ २०॥

सग्रामे विजय पुत्रदाराद्यैहिकमुत्तमम्।
परत्र च पर सौख्य सम्प्राप्य च पर पदम्॥ २१॥

तामसी तु ममार्चा या नैतयोस्तुल्यता तु सा।
अत सा तु न कर्तव्या शान्तैश्च ज्ञानशालिभि ॥ २२॥

श्रेष्ठ देवगण। उनके पापकर्म नहीं रह जाते और विपदाएँ भी उनके समक्ष कभी उत्पन्न नहीं होतीं। मेरी उपासना करनेवाला मनुष्य मेरी कृपासे सुख प्राप्त करता है और अन्तमे मेरे लोकको प्राप्त होता है, यह सर्वथा सत्य है और इसमे कोई सशय नहीं है। करोडो अश्वमेध आदि यज्ञोका जो फल होता है, वह फल मनुष्यको मेरी इस वार्षिक पूजाके करनेसे प्राप्त हो जाता है। मोह अथवा द्वेषके कारण जो मूढात्मा इस महोत्सवमें मेरी पूजा नहीं करता है, वह मेरी योगिनियोका भक्ष्य बनता है। श्रेष्ठ देवगण! जो लोग मृत्युलोक, स्वर्गलोक अथवा पाताललोकमे मेरा पूजन करेगे, उनके ऊपर परम प्रसन्न होकर मैं प्रतिदिन उनके सभी मनोरथ पूर्ण करूँगी, यह पूर्णरूपसे सत्य है॥ १०—१४½ ॥

जो लोग सात्त्विकभावसे युक्त होकर मेरा पूजन-अर्चन करेगे, उन्हें न तो बलि अर्पण करना चाहिये और न तो मांसयुक्त अन्न प्रदान करना चाहिये। मेरी प्रसन्नताकी अभिलाषा रखनेवाले लोगोंको समाहितचित्त होकर हिंसा आदिसे विरत रहते हुए मांसरहित नैवेद्य, वेदाङ्गादिसे उद्धृत स्तुतियां, विविध जपों, यज्ञो तथा ब्राह्मण-भोजन आदिके द्वारा मेरी महापूजा करनी चाहिये॥ १५—१७½ ॥ राजसभावसे युक्त लोगोंको मेरी प्रसन्नताके लिये आदरपूर्वक बहुविधि उपचारोंके अर्पण करने, स्तोत्रोंके पाठ जप-यज्ञ आदिके अनुष्ठान करने तथा ब्राह्मणोंको भोजन कराने—आदिके द्वारा मेरी यह महापूजा सम्पन्न करनी चाहिये। यह पूजन दुष्ट शत्रुओका विनाश करनेवाला तथा धन-धान्य आदिको बढानेवाला है। मेरी पूजा करनेवाला सग्राममें विजय और पुत्र तथा स्त्रीसम्बन्धी उत्तम ऐहिक सुख एव श्रेष्ठ पारलौकिक सुख प्राप्त करके अन्तमे परम पदका अधिकारी हो जाता है॥ १८—२१ ॥ मेरी जो तामसी पूजा है, वह इन दोनों पूजाओं (सात्त्विकी, राजसी)-के समान नहीं है। अत शान्त तथा ज्ञानसम्पन्न लोगोको वह पूजा नहीं करनी चाहिये॥ २२॥

यजध्व रामचन्द्रस्य सग्रामे जयहेतवे।
रिपोर्निधनमिच्छन्तो महिपैश्छागमेषकै ॥ २३ ॥

पूजयध्व प्रतिदिन शुक्ला सा नवमी सुरा ।
महानवम्या छागादिबलिभिर्विपुलैरहम् ॥ २४ ॥

युष्माभि पूजितव्या वै शत्रुविध्वसकारिणी।
ततस्तुष्टा महावीर रावण लोककण्टकम् ॥ २५ ॥

अजेय शत्रुभि सख्ये पातयिष्यामि निश्चितम्।
नवम्या बलिदानेन प्रीतिर्मे महती भवेत् ॥ २६ ॥

अतो देयो बलिस्तत्र मम प्रीतिमभीप्सुभि ।
भक्त्या वाप्यथ वाभक्त्या जानता वाप्यजानता ॥ २७ ॥

कर्तव्या वार्षिकी पूजाऽवश्य लोकत्रये मम।
बलिश्चापि प्रदातव्य प्रत्यह सुरसत्तमा ॥ २८ ॥

असमर्थैरपि सदा नवम्या देय एव हि।
यथाष्टम्या बलिर्देवा महायज्ञफलप्रद ॥ २९ ॥

महाष्टम्या मम प्रीत्यै उपवास सुरोत्तमा ।
कर्तव्य पुत्रकामैस्तु लोकैस्त्रैलोक्यवासिभि ॥ ३० ॥

अवश्य भविता पुत्रस्तेषा सर्वगुणान्वित ।
पुत्रवद्भिर्न कर्तव्य उपवासस्तु तद्दिने ॥ ३१ ॥

अष्टम्यामुपवासात्तु नवम्या बलिदानत ।
फल महत्तर ज्ञेयमश्वमेधादियागत ॥ ३२ ॥

श्रीमहादेव उवाच

एव निशम्य वचन जगदम्बिकाया
ब्रह्मादय सुरगणा जगदीश्वरीं ताम्।
शत्रोर्जयाय बलिभिर्विविधैर्विधानाद्-
भक्त्यार्चयन्ननुदिन नवमीदिनान्तम् ॥ ३३ ॥

[हे] देवगण! आपलोग सग्राममे श्रीरामकी विजयके लिये तथा उस शत्रुके [illegible]की इच्छासे [illegible] नवमीतक प्रतिदिन मेरी पूजा करे। महानवमीको भी मुझ शत्रुनाशिनीका आपलोगोको पूजन करना चाहिये।

उस पूजासे प्रसन्न हुई मैं जगत्के कण्टकस्वरूप अपराजेय महाबली रावणको सभी शत्रुओसहित सग्रामम अवश्य ही मार डालूँगी। नवमीतिथिके पूजनसे मुझे अपार प्रसन्नता होती है। तीनो लोकोमे ज्ञानी अथवा अज्ञानी सभीको भक्तिपूर्वक या भक्तिरहित भी मेरी वार्षिकी पूजा अवश्य करनी चाहिये। देवगण! जिस प्रकारसे अष्टमीतिथिके पूजनसे महान् यज्ञोंका फल प्राप्त होता है, उसी प्रकार मेरी सतुष्टिके लिये तीनो लोकोम रहनेवाले लोगोको महाष्टमीके दिन पुत्रकी कामनासे उपवास करना चाहिये। ऐसा करनेसे उन्हे सर्वगुणसम्पन्न पुत्रकी प्राप्ति अवश्य होगी। उस दिन पुत्रवान् लोगोको उपवास नहीं करना चाहिये। अष्टमीतिथिको उपवास और नवमीतिथिको पूजन करनेसे प्राप्त होनेवाले फलको अश्वमेध आदि यज्ञोके फलसे भी बडा समझना चाहिये ॥ २३—३२ ॥

श्रीमहादेवजी बोले—जगदम्बिकाका यह वचन सुनकर ब्रह्मा आदि देवगण विधि-विधानसे बलि प्रदान करके शत्रुओसे विजयके लिये नवमीपर्यन्त प्रतिदिन उन जगदीश्वरीकी उपासनामे भक्तिपूर्वक तत्पर रहे ॥ ३३ ॥

॥ इति श्रीमहाभागवते महापुराणे श्रीमहादेवनारदसवादे शारदीयपूजाविधानकथन नाम षट्चत्वारिंशोऽध्याय ॥ ४६ ॥

॥ इस प्रकार श्रीमहाभागवतमहापुराणके अन्तर्गत श्रीमहादेव-नारद-सवादमे 'शारदीय पूजाविधानकथन' नामक छियालीसवाँ अध्याय पूर्ण हुआ ॥ ४६ ॥

सैतालीसवाँ अध्याय

श्रीरामद्वारा भगवती जगदम्बिकाका पूजन, कुम्भकर्ण, अतिकाय तथा मेघनादका वध, श्रीरामका बिल्ववृक्षमे देवेश्वरीका पूजन करना, भगवतीका श्रीरामको अमोघ अस्त्र प्रदान करना, रावणवध तथा श्रीरामकी जय-जयकार

श्रीमहादेव उवाच

इन्द्राद्यास्त्रिदशा स्वर्गे मर्त्ये च परमेश्वर ।
पूजयित्वा महादेवीं सर्वलोकमहेश्वरीम्॥ १ ॥

सग्रामे पातयामास विशिखै रावणानुजम्।
हताश्च वानरैर्घोरा राक्षसा लक्षकोटय ॥ २ ॥

राक्षसैश्च हता सख्ये वानरा बहुकोटय ।
प्रावर्तयन्नदीं घोरा शोणितौघतरङ्गिणीम्॥ ३ ॥

मुण्डमाला च विपुला बभासे तत्र नारद।
श्रुत्वा तु रावणो युद्धे निहत भ्रातर बहु॥ ४ ॥

रुरोद शोकसततहृदयोऽथ मुमोह च।
ततोऽतिकायो बलवास्तमाश्वास्य महारणे॥ ५ ॥

चकार यात्रा कृष्णाया दशम्या भीमविक्रम ।
रामस्तु समरे हत्वा कुम्भकर्ण महाबलम्॥ ६ ॥

प्रययौ भगवान् ब्रह्मा देवीं यत्रार्चयन्मुने।
प्रणम्य च महात्मान ब्रह्माण जगत पतिम्॥ ७ ॥

कथयामास सग्रामे निहत रावणानुजम्।
ब्रह्मापि कथयामास देव्या यत्कथित पुरा॥ ८ ॥

पूजाविधान शत्रूणा निधन च दिने दिने।
तच्छ्रुत्वा वानरैर्नानाविधि पूजोपहारकम्॥ ९ ॥

आनाय्य भगवान् रामो दशम्या प्रातरेव हि।
पूजा प्रवर्तयन्भक्त्या यलिभिर्विपुलैरपि॥ १०॥

प्रणिपत्य महादेवीं पुनर्युद्धाय निर्ययौ।

श्रीमहादेवजी बोले—इन्द्र आदि सभी देवताओंने स्वर्गमें तथा परमेश्वर श्रीरामने मृत्युलोकमें सभी लोकोंकी महेश्वरी भगवती जगदम्बाकी पूजा की। श्रीरामने युद्धस्थलमे बाणोसे मारकर रावणके अनुज कुम्भकर्णको धराशायी कर दिया। युद्धमें [इन्द्रादि देवावतार] वानरोने लाखो-करोडो भयानक राक्षसोका वध किया और राक्षसोने भी अनेक करोड वानरोका सहार किया। नारद! इससे रक्तप्रवाहसे युक्त तरगोवाली घोर नदी बहने लगी तथा असख्य मुण्डमालाएँ वहाँ बिखर गयीं॥ १—३½ ॥

सग्राममे अपने भाईके वधका समाचार सुनकर शोकसे सतप्त हृदयवाले रावणने अत्यधिक विलाप किया और वह मूर्च्छित हो गया। तदनन्तर प्रचण्ड पराक्रमवाले तथा बलवान् अतिकायने उस रावणको सान्त्वना प्रदान कर कृष्णदशमीको युद्धभूमिके लिये प्रस्थान किया। मुने! भगवान् श्रीराम युद्धमे कुम्भकर्णका वध करनेके उपरान्त वहाँ पहुँच गये, जहाँ ब्रह्मा देवीकी आराधना कर रहे थे॥ ४—६½ ॥

जगत्के स्वामी महात्मा ब्रह्माजीको प्रणाम करके श्रीरामचन्द्रजीने युद्धमे रावणके छोटे भाई कुम्भकर्णके वधके विषयमे उनसे कहा और देवीके द्वारा पूर्वमें जो पूजा-विधान तथा दिन-प्रतिदिन शत्रुओंके निधन-सम्बन्धी बात कही गयी थी, उसे ब्रह्माजीने भी उनसे कहा॥ ७-८½ ॥

उसे सुनकर भगवान् श्रीरामने वानरोंसे अनेक प्रकारकी पूजा-सामग्री मँगाकर दशमीतिथिको प्रात काल भक्तिपूर्वक भगवतीकी पूजा की और फिर महादेवीको प्रणाम करके वे युद्धके लिये पुन निकल पडे॥ ९-१०½ ॥

अतिकायस्तु दुर्धर्ष कम्पयन्धरणीतलम्॥ ११॥
चालयन् सकला पृथ्वीं रथनेमिस्वनेन च।
समायातोऽपि विपुलै सैनिकै परिवारित ॥ १२॥

तस्मिन् समागते घोर राक्षसाना दुरात्मनाम्।
प्रावर्तत महायुद्ध वानरैर्भयदायकम्॥ १३॥

गदाभि परिघैर्वृक्षै पाषाणैर्वानरर्षभा ।
राक्षसान् पातयामासु शतशोऽथ सहस्रश ॥ १४॥

शस्त्रास्त्रैर्विविधैस्तद्वद्वानरानपि राक्षसा ।
सग्रामे पातयामासुर्महाबलपराक्रमा ॥ १५॥

ततो धनु समादाय भ्रातरौ रामलक्ष्मणौ।
पातयामासतु सख्ये राक्षसान्भीमविक्रमान्॥ १६॥

स चापि राक्षसश्रेष्ठो निनदन् समराजिरे।
वानरान्पातयामास शतशोऽथ सहस्रश ॥ १७॥

तत समभवद्युद्धमतुल लोमहर्षणम्।
रामलक्ष्मणयोस्तेन राक्षसेन दुरात्मना॥ १८॥

प्रहस्तप्रमुखाश्चान्ये ये च वीरा महाबला ।
तै सार्धं वानरेन्द्रेण युद्ध चासीत्सुदारुणम्॥ १९॥

यथा प्रवृत्ति तेषा तु युद्ध घोरतर महत्।
दिवारात्र मुनिश्रेष्ठ पश्यता भयदायकम्॥ २०॥

यथा नालोकित कैश्चिद्देवैर्वा यक्षकिन्नरे ।
कदाचिदन्तरिक्षे च कदाचिद्धरणीतले॥ २१॥

महास्त्रशस्त्रविक्षेपैर्गदासिपरिघोत्तमै ।
त्रिशूलैर्पट्टिशैर्वापि बभूव तुमुल महत्॥ २२॥

दिनेऽपि समभूद्रात्रिर्निशीथेऽप्यभवद्दिनम्।
अनभ्रेऽप्यभवद्वृष्टिर्वायुश्च तुमुलो ववौ॥ २३॥

वज्रावपात शतशो बभूव समराङ्गणे।
एव समभवद्युद्ध दिनत्रयमनुत्तमम्॥ २४॥

इधर दुर्धर्ष अतिकाय पृथ्वीतलको प्रकम्पित करता हुआ और अपने रथकी नेमिकी ध्वनिसे सम्पूर्ण पृथ्वीको चलायमान-सा करता हुआ बहुत अधिक सैनिकोको साथ लेकर युद्धक्षेत्रमे आ गया॥ ११-१२॥ उसके आ जानेपर दुष्टात्मा राक्षसो और वानरोके मध्य अत्यन्त भीषण तथा भय उत्पन्न करनेवाला युद्ध छिड गया। उस युद्धमे बलवान् वानरोने गदाओ, परिघो, वृक्षो और पाषाणोसे प्रहार करके सैकडो-हजारो राक्षसोको मार गिराया और उसी प्रकार महान् बल तथा पराक्रमवाले राक्षसोंने युद्धमे अनेक प्रकारके अस्त्रो और शस्त्रोसे प्रहार कर वानरोको भी धराशायी कर दिया॥ १३—१५॥

तब राम और लक्ष्मण—दोनो भाइयोने धनुष लेकर युद्धस्थलमे स्थित प्रचण्ड पराक्रमवाले राक्षसोका सहार किया॥ १६॥

इसपर उस महान् राक्षस अतिकायने भी युद्धक्षेत्रमे घोर गर्जना करते हुए सैकडो-हजारा वानरोको मार गिराया। तदनन्तर उस दुरात्मा राक्षसके साथ श्रीराम और लक्ष्मणका अत्यन्त रोमाञ्चकारी युद्ध होने लगा। जो प्रहस्त आदि प्रधान योद्धा तथा अन्य दूसरे महाबली वीर थे, उनके साथ वानरेन्द्र (सुग्रीव)-का अत्यन्त भीषण युद्ध होने लगा॥ १७—१९॥

मुनिश्रेष्ठ! उन राक्षसोकी प्रवृत्तिके अनुकूल वह अत्यन्त भीषण युद्ध दिन-रात चलता रहा। देखनेवालोके लिये वह युद्ध बडा ही भयदायक था। किसी भी देवता, यक्ष अथवा किन्नरने इस प्रकारका युद्ध अन्तरिक्षमे या पृथ्वीतलपर कभी कहीं नहीं देखा था। महान् अस्त्रो, फेककर मार करनेवाले शस्त्रो तथा श्रेष्ठ कोटिके गदा, तलवार, परिघ, त्रिशूल, पट्टिश आदिके द्वारा वह महान् युद्ध हो रहा था। दिनमे ही रात हो जाती थी और आधी रातकी वेलामे भी दिन उपस्थित हो जाता था। आकाशमे बादल न रहनेपर भी वृष्टि होने लगती और भयकर ध्वनिके साथ हवा बहने लगती थी। युद्धस्थलमे सैकडो बार वज्रपात हुआ। इस प्रकार तीन दिनातक घोर युद्ध चलता रहा॥ २०—२४॥

ततो रात्रौ त्रयोदश्या चतुर्थेऽहनि लक्ष्मण ।
जघान त महावीरमतिकाय महेषुभि ॥ २५ ॥

अन्ये च राक्षसश्रेष्ठा राघवेण महात्मना ।
निहता समरे केचिद्वानरैरपि चापरे ॥ २६ ॥

हनुमदङ्गदाद्यैश्च निहता बहवो रणे ।
दुद्रुवुश्च भयात्केचिद्रामो हृष्टमना बभौ ॥ २७ ॥

वानरा स्युर्महाहर्षाश्चक्रुर्जयजयध्वनिम् ।
बभूव नभस पुष्पवृष्टिश्च महती तत ॥ २८ ॥

रामोऽपि भ्रातर दोर्भ्यामालिङ्ग्य परमादृत ।
मूर्ध्न्यवघ्राय हृष्टात्मा ब्रह्मणोऽन्तिकमन्वगात् ॥ २९ ॥

प्रात सम्पूजयामास देवीं विल्वे सुरेश्वरीम् ।
तत प्रणम्य भूयोऽगाद्युद्धाय रणमूर्धनि ॥ ३० ॥

रावणोऽथ समाकर्ण्य निहत त महाबलम् ।
रक्षायै विनियोज्यैव पुरस्य तनय मुने ॥ ३१ ॥

मेघनाद महावीर स्वय युद्धाय निर्ययौ ।
तदाऽऽसीत्सुमहद्युद्ध भयद ह्यतुल मुने ॥ ३२ ॥

रक्षसा वानराणा च यमराष्ट्रविवर्धनम् ।
रामेण लक्ष्मणेनापि युद्ध तस्याभवन्महत् ॥ ३३ ॥

तत्र वीक्ष्य समीपे तु विभीषणममर्षत ॥ ३४ ॥

मयदत्ता महाशक्ति जग्राह स निशाचर ।
जाज्वल्यमाना ता शक्ति विभीषणवधोद्यताम् ॥ ३५ ॥

लक्ष्मणस्त्रातुकामस्त सम्मुखे तस्य सस्थित ।
सा शक्तिस्तेन नि क्षिप्ता प्रविभेद रसातलम् ॥ ३६ ॥

लक्ष्मणो मूर्च्छितश्चापि पपात धरणीतले ।
त समादातुकाम स लक्ष्मण राक्षसेश्वर ॥ ३७ ॥

तदनन्तर चौथे दिन त्रयोदशीतिथिकी रातमें श्रीलक्ष्मणने उस महापराक्रमी अतिकायको अपने तीव्र बाणोसे मार डाला। महात्मा राघवेन्द्रने समरमे अन्य बडे-बडे राक्षसोका सहार कर दिया। कुछ राक्षस वानरोंके द्वारा मार डाले गये और अन्य बहुत सारे राक्षसोंको उस युद्धक्षेत्रमे हनुमान्, अङ्गद आदिने मार डाला। कुछ राक्षस भयभीत होकर भाग खडे हुए। इससे श्रीराम प्रसन्नचित्त हो गये और वानरगण अत्यन्त हर्षित होकर जय-जयकी ध्वनि करने लगे। उस समय आकाशसे फूलोकी भारी वर्षा होने लगी ॥ २५—२८ ॥

श्रीरामने भी अत्यन्त आदरपूर्वक दोनो भुजाओंसे भाई लक्ष्मणका आलिङ्गन करके उनके सिरको सूँघा। पुन वे प्रसन्नमनसे ब्रह्माजीके पास गये। उन्होंने प्रात काल बिल्ववृक्षमें सुरेश्वरी भगवतीकी पूजा की, इसके बाद उन्हें पुन प्रणाम कर वे युद्धके लिये रणक्षेत्रमे सम्मुख आ डटे ॥ २९-३० ॥

मुने। उस महाबली (अतिकाय)-के वधका समाचार सुनकर रावण अपने पुरकी रक्षाके लिये महान् पराक्रमवाले अपने पुत्र मेघनादको नियुक्त करके स्वय युद्धके लिये निकल पडा। मुने। तदनन्तर वानरों और राक्षसोंमे अत्यन्त महान् युद्ध छिड गया, जो भयदायक, अतुलनीय तथा यमलोकका विस्तार करनेवाला था ॥ ३१-३२½ ॥

श्रीराम और लक्ष्मणके साथ भी उस (रावण)-का महान् युद्ध होने लगा। वहाँपर उनके पासमें विभीषणको देखकर उस राक्षसने क्रोधित होकर मयदानवके द्वारा प्रदत्त, विभीषणके वधके लिये उद्यत उस प्रज्वलित महाशक्तिको उठा लिया। उनकी रक्षा करनेके लिये लक्ष्मण उनके सामने खडे हो गये ॥ ३३—३५½ ॥

उसके द्वारा छोडी गयी वह शक्ति [लक्ष्मणपर आघात करके] रसातलमें चली गयी और लक्ष्मण भी मूर्च्छित होकर पृथ्वीतलपर गिर पडे। इसके बाद उस राक्षसराज रावणने उन लक्ष्मणको उठाकर ले

पस्पर्श बाहुभि क्षिप्र क्रुद्धस्त पवनात्मज ।
मुष्टिना ताडयामास सुदृढ विपुलोरसि॥ ३८॥

स तेन ताडितो वीर पपात रुधिर वमन्।
मूर्च्छितो घूर्णनयनो निश्चेता स्वरथोपरि॥ ३९॥

तत सज्ञामनुप्राप्य धनुरुद्यम्य वेगत ।
मारुति हन्तुकामोऽसावभ्यधावत रावण ॥ ४०॥

जानेकी इच्छासे अपनी भुजाओसे ज्यो-ही उन्हे स्पर्श किया, पवनपुत्र हनुमान्ने क्रोधित होकर तत्काल उसकी विशाल छातीपर बडी तेजीसे मुष्टिकाप्रहार किया। हनुमान्जीके प्रहारसे आहत होकर वह वीर रक्त वमन करता हुआ विघूर्णित नेत्रवाला एव मूर्च्छित और निश्चेष्ट होकर अपने रथपर गिर पडा। इसके बाद चेतना आ जानेपर वह धनुष लेकर हनुमान्जीको मारनेकी इच्छासे बडे वेगसे उनकी ओर दौडा॥ ३६—४०॥

तत सवीक्ष्य दुर्धर्ष मारुतेरन्तकोपमम्।
श्रीरामो धनुरुद्यम्य रावण चेदमब्रवीत्॥ ४१॥

अद्य राक्षसराज त्वा निशितै सायकोत्तमै ।
पातयिष्यामि दुष्टात्मन्यदि नोत्सृजसे रणम्॥ ४२॥

इत्युक्त्वा स महाबाहुर्बाण धनुषि सन्दधे।
ततो भयाद्रण त्यक्त्वा रावण पुरमाययौ॥ ४३॥

तत्पश्चात् हनुमान्जीको मारनेके लिये तत्पर उस यमराजतुल्य दुर्धर्ष रावणको देखकर श्रीरामने धनुष लेकर उससे यह कहा—राक्षसराज! दुष्टात्मन्! यदि तुम युद्धसे भाग नहीं जाते तो मैं तुम्हे अपने तीव्र तथा श्रेष्ठ बाणोसे आज मारकर धराशायी कर दूँगा। ऐसा कहकर विशाल भुजाओवाले उन श्रीरामने बाणको धनुषपर चढाया, उससे वह रावण भयके मारे रण छोडकर अपने नगरमे आ गया॥ ४१—४३॥

तमाश्वास्य रणे प्रायादिन्द्रजिद्भीमविक्रम ।
तेनाभवन्महद्युद्ध लक्ष्मणस्य महात्मन ॥ ४४॥

सुघोर भयद सर्वलोकसम्मोहकारकम्।
ततो रात्रावमोघास्त्रैर्लक्ष्मणस्त दुरासदम्॥ ४५॥

पातयामास सग्रामे त्वमाया मुनिपुङ्गव।

तदनन्तर उस रावणको सान्त्वना प्रदान कर प्रचण्ड पराक्रमवाले इन्द्रजित् मेघनादने युद्धक्षेत्रके लिये प्रस्थान किया। उसके साथ महाप्राण लक्ष्मणका अत्यन्त घोर युद्ध हुआ। वह युद्ध बडा भयदायक तथा सभी लोगाको विमोहित कर देनेवाला था। मुनिश्रेष्ठ! इसके बाद लक्ष्मणने अमावास्याकी रात्रिमे अपने अमोघ अस्त्रोसे उस दुर्धर्ष इन्द्रजित्को सग्राममे मारकर गिरा दिया॥ ४४-४५½॥

ततो विलप्य बहुधा देवान्तकमुखैर्वृत ॥ ४६॥

स्वय पुन समायात सग्रामे राक्षसेश्वर ।
प्रतिपत्तिथिमारभ्य यावच्च नवमीतिथिम्॥ ४७॥

बभूव तुमुल युद्ध रामरावणयोर्महत्।
अतुल्य वचनातीत सर्वलोकभयङ्करम्॥ ४८॥

तत्र षष्ठीतिथिर्यावत्तावत्सैन्य दिने दिने।
विनष्ट राक्षसेन्द्रस्य विपुल सख्ययोज्झितम्॥ ४९॥

तदनन्तर बहुत प्रकारसे विलाप करके वह राक्षसराज रावण देवान्तक आदि प्रधान योद्धाओको साथमे लेकर सग्राममे पुन स्वय उपस्थित हुआ। प्रतिपदातिथिसे प्रारम्भ करके नवमीतिथिपर्यन्त श्रीराम तथा रावणके मध्य अतुलनीय, वर्णनसे परे और सभी प्राणियोके लिये भयदायक अत्यन्त भीषण युद्ध हुआ। जबतक षष्ठीतिथि आयी तबतक प्रतिदिन उस युद्धमे राक्षसेन्द्र रावणके बहुत-से असख्य सैनिक नष्ट हो चुके थे॥ ४६—४९॥

तस्या षष्ठ्या विनिर्माय मृण्मयीं प्रतिमा शुभाम्।
साय कृत्वाधिवास तु ब्रह्मा लोकपितामह ॥५०॥

पत्रीं प्रवेष्टा सप्तम्या देवीं ता समपूजयत्।
पत्रीप्रवेशमात्रेण सर्वसहारकारिणी॥५१॥

रावणस्य वधार्थाय श्रीरामधनुराविशत्।
महाष्टम्या ततो देवीं प्रातरेव जगत्पिता॥५२॥

भक्त्या सम्पूजयामास विपुलैरुपहारकै ।
तत प्रसन्ना तस्मिन् स दिनसधौ महेश्वरी॥५३॥

प्रविष्टा रामचन्द्रेषु रावणस्य शिरासि च।
प्रचिच्छेद मुनिश्रेष्ठ शतधा स रणाजिरे॥५४॥

सोऽपि भीतो भगवतीं सस्मार दशकन्धर ।
यदा तत्याज बाणान्स राघवो निधनेच्छया॥५५॥

तस्माद्भूयो बभूवुश्च देहमात्राच्छिरासि च।
न जहौ समरे प्राणान् छेदितोऽपि महेषुभि ॥५६॥

चकार तुमुल युद्ध पूर्वाह्णे नवमीदिने।
अतीवभयद सर्वदेवाना दिवि पश्यताम्॥५७॥

महानवम्या तस्या तु ब्रह्मा लोकपितामह ।
देवीं सम्पूजयामास नानाबलिभिरादरात्॥५८॥

सुरम्यैर्धूपदीपाद्यैर्नैवेद्यैर्विविधैरपि ।
ततो देवी भगवती या विद्या मुक्तिदा स्वयम्॥५९॥

सेवाविद्यास्वरूपेण रावण समुपागमत्।
ततो न देवीं सस्मार न वा भक्तिश्च तत्र वै॥६०॥

तस्यासीन्मुनिशार्दूल मोहितस्य च मायया।
अमर्षवशमापन्नो युयुधे राघवेण वै॥६१॥

ब्रह्मास्त्रजालसघै स दर्शयन् शक्तिमात्मन ।
तथैव राघवश्चापि ब्रह्मास्त्रनिवहैर्मुने॥६२॥

ताडयामास दुर्धर्षं रक्षसामधिप रणे।
एव प्रहरतो क्रोधात्परस्परजयैषिणो ॥६३॥

व्यतीतमभवन्मध्यन्दिन श्रीरामरक्षसो ।

उस षष्ठी तिथिको जगदम्बाकी शुभ मृण्मयी मूर्ति बनाकर सायकाल उनका [प्राणप्रतिष्ठाका अङ्गभूत] अधिवास-कर्म करके लोकपितामह ब्रह्माने सप्तमी तिथिको पत्रीप्रविष्ट देवीका पूजन किया। पत्रीप्रवेशमात्रसे ही सर्वसहारकारिणी जगदम्बा रावणके वधके लिये श्रीरामके धनुषमे प्रवेश कर गयीं। तत्पश्चात् जगत्पिता श्रीब्रह्माजीने महाष्टमी तिथिको प्रात विपुल पूजनोपचारोंसे भक्तिपूर्वक भगवतीकी विधिवत् पूजा की॥५०—५२½॥

उस पूजनसे प्रसन्न होकर भगवती महेश्वरीने मध्याह्नकालमे श्रीरामचन्द्रजीके बाणमे प्रवेश किया। तब मुनिश्रेष्ठ। उन श्रीरामने युद्धक्षेत्रमे रावणके सिरोंको सैकडो भागोमे काट डाला॥५३-५४॥ इसके बाद पुन जब उन श्रीरामने उसका प्राणान्त कर देनेकी इच्छासे बाण छोडे, तब रावणने भी भयभीत होकर भगवतीका स्मरण किया। उससे उसके सिररहित धडसे पुन सिर निकल पडे और श्रीरामके महान् बाणोसे बेधे जानेपर भी उसने सग्राममें प्राण नहीं छोडा। उस रावणने नवमी तिथिको पूर्वाह्णमें आकाशमे खडे हुए देवताओके देखते हुए अत्यन्त भीषण तथा भयदायक युद्ध किया॥५५—५७॥ उस महानवमी तिथिको लोकपितामह ब्रह्माने अनेक प्रकारके सुरम्य धूप-दीप और विविध प्रकारके नैवेद्य अर्पण करके आदरपूर्वक विधि-विधानसे भगवतीका पूजन किया। तदनन्तर जो साक्षात् मुक्तिदायिनी भगवती विद्यास्वरूपा हैं, वे ही स्वय अविद्यास्वरूपसे रावणके पास गयीं। मुनिश्रेष्ठ! उस समय उसने देवीका स्मरणतक नहीं किया और मायासे विमोहित उस रावणके हृदयमे देवीके प्रति भक्ति भी नहीं रही॥५८—६०½॥

क्रोधके वशीभूत होकर वह रावण अपनी शक्तिका प्रदर्शन करता हुआ ब्रह्मास्त्रके जालसमूहोसे राघवेन्द्रके साथ युद्ध करता रहा। मुने। उसी प्रकार श्रीरामचन्द्र भी सग्राममे राक्षसोके राजा दुर्जेय रावणपर ब्रह्मास्त्र-समुदायोसे प्रहार करते रहे। इस प्रकार एक-दूसरेको जीतनेकी इच्छावाले श्रीराम तथा रावणको क्रोधपूर्वक

ततोऽपराह्ने रामस्तु सध्याय परमेश्वरीम्॥ ६४॥
प्रणम्य प्रार्थयामास वधार्थं तस्य रक्षस ।
ब्रह्मापि प्रणिपत्येना देवीं भक्त्या पुन पुन ॥ ६५॥
प्रार्थयामास नाशाय रावणस्य दुरात्मन ।
ततो देवी स्वय प्रादादमोघ शस्त्रमुत्तमम्॥ ६६॥
वधार्थं राक्षसेन्द्रस्य ज्वलत्कालाग्नितेजसम्।
ब्रह्मा तदस्त्रमानीय प्रीत्या परमया युत ॥ ६७॥
श्रीरामाय ददौ शीघ्र रावणस्य विघातिने।
सर्वशक्तिमय चारुवेग कालान्तकोपमम्॥ ६८॥
ज्वलन्त तेजसा वीक्ष्य मुमुदे रघुनन्दन ।
तत सस्मृत्य ता देवीं तदस्त्र राघवो मुने॥ ६९॥
सन्धायाकर्णकोदण्ड तूर्णं चिक्षेप त प्रति।
ततस्तदस्त्र निर्भिद्य हृदय दुष्टचेतस ॥ ७०॥
प्राणान् जग्राह वेगेन विवेश च धरातलम्।
तत पपात सग्रामे रथाद्धेमपरिष्कृतात्॥ ७१॥

पश्यता सर्वदेवाना रावणो देवकण्टक ।
चालयन्वसुधा सर्वां क्षोभयन् सरिता पतिम्॥ ७२॥
त्रासयन् सर्वभूतानि राक्षसाश्च विषादयन्।
वानरा हर्षसम्पन्नाश्चक्रुर्जयजयध्वनिम्॥ ७३॥
त्रैलोक्यवासिनश्चान्ये हते तस्मिन् दुरात्मनि।
बभूव पुष्पवृष्टिश्च रामोपरि सुगन्धिदा॥ ७४॥
रामाज्ञया तु देवेन्द्रो ववर्षाप्यमृत यदा।
तदा सञ्जीविता भूयो वानरा ये हता रणे॥ ७५॥

परस्पर प्रहार करते हुए दिनका मध्यभाग व्यतीत हो गया॥ ६१—६३½॥

तदनन्तर अपराह्नमें श्रीरामचन्द्रजीने भगवतीका ध्यान करके उन्हे प्रणाम किया और उस राक्षसके वधके लिये उनसे प्रार्थना की। ब्रह्माजीने भी बार-बार भक्तिपूर्वक देवीको साष्टाङ्ग प्रणाम करके दुरात्मा रावणके वधके लिये उन भगवतीसे प्रार्थना की॥ ६४-६५½॥

तब भगवतीने राक्षसेन्द्र रावणके वधके लिये प्रज्वलित कालाग्निके सदृश तेजवाला श्रेष्ठ तथा अमोघ अस्त्र स्वय प्रदान किया। ब्रह्माजीने उस अस्त्रको शीघ्र लाकर रावणका विनाश करनेवाले श्रीरामको परम प्रसन्नतासे युक्त होकर दे दिया। सर्वशक्तिसम्पन्न, तीव्रगामी, यमराजतुल्य और तेजसे प्रज्वलित उस अस्त्रको देखकर रघुनन्दन श्रीराम अत्यन्त हर्षित हुए॥ ६६—६८½॥

मुने! तदनन्तर उन भगवतीका स्मरण करके श्रीरामने उस रावणको लक्ष्यकर अस्त्रका सन्धान किया और धनुषकी प्रत्यञ्चा कानतक खींचकर उस अस्त्रको छोडा। तदनन्तर उस अस्त्रने दुष्टचेता रावणकी छातीको बेधकर उसके प्राण हर लिये और वह वेगपूर्वक पृथ्वीतलमे प्रविष्ट हो गया। इसके बाद देवताओंके लिये कण्टकस्वरूप वह रावण सग्राममें सभी देवताओंके देखते-देखते स्वर्णनिर्मित रथसे गिर पडा। उसके गिरते ही पूरी पृथ्वी हिलने लगी, समुद्रमे विक्षोभ उत्पन्न होने लगा, सभी प्राणी भयभीत हो उठे और राक्षसगण विषादग्रस्त हो गये॥ ६९—७२½॥

उस दुरात्मा रावणके मारे जानेपर सभी वानरगण तथा तीनों लोकोंमें निवास करनेवाले अन्य सभी लोग हर्षित हो उठे और जय-जयकार करने लगे, साथ ही श्रीरामके ऊपर सुगन्ध देनेवाले पुष्पोकी वर्षा होने लगी। उस समय श्रीरामकी आज्ञासे जब देवराज इन्द्रने अमृतकी वर्षा की, तब जो वानरगण युद्धमे मारे गये थे, वे पुन जीवित हो गये॥ ७३—७५॥

विभीषणस्तु बहुधा भ्रातृशोकेन दुःखितः ।
रुरोद सान्त्वयामास तं रामो भगवान् स्वयम्॥ ७६॥

रावणस्य च संस्कारं कृतवान् स विभीषणः ।
ततः सीतां समानीय लक्ष्मणेन समन्वितः ॥ ७७॥

श्रीरामो हर्षमापन्नो वानरैश्च समन्वितः ।
प्रायात्सम्पूजिता यत्र ब्रह्मणा जगदीश्वरी॥ ७८॥

भाईके शोकसे दुःखित विभीषणने बहुत प्रकारसे विलाप किया। इसपर भगवान् श्रीरामने स्वयं उसे सान्त्वना दी। इसके बाद उस विभीषणने रावणका अन्तिम संस्कार किया। तत्पश्चात् सीताको वहाँसे बुलवाकर परम हर्षको प्राप्त श्रीरामचन्द्रजी लक्ष्मण तथा वानरोंके साथ लेकर जहाँ ब्रह्माजी जगदीश्वरीकी आराधना कर रहे थे, वहाँ गये॥ ७६—७८॥

॥ इति श्रीमहाभागवते महापुराणे श्रीरामरावणयोः संग्रामे रावणवधो नाम सप्तचत्वारिंशोऽध्यायः ॥ ४७॥

॥ इस प्रकार श्रीमहाभागवतमहापुराणके अन्तर्गत श्रीराम-रावण-संग्राममें 'रावणवध' नामक सैंतालीसवाँ अध्याय पूर्ण हुआ॥ ४७॥

अड़तालीसवाँ अध्याय

श्रीराम और देवगणोंद्वारा देवीका स्तवन, ब्रह्माजीद्वारा भगवतीका पूजन, देवीके शारदीय पूजा-अनुष्ठानकी अनिवार्यता

श्रीमहादेव उवाच

श्रीरामस्तु ततो देवीं भक्त्या परमया युतः ।
प्रणम्य दण्डवद्भूमौ तुष्टाव प्रीतमानसः ॥ १॥

अन्ये च त्रिदशश्रेष्ठास्तत्रागत्य महामुने।
तुष्टुवुश्च महादेवीं सृष्टिस्थित्यन्तकारिणीम्॥ २॥

तैः संस्तुता महादेवी पूजिता भक्तिभावतः ।
विपुलैर्बलिभिः प्रीता बभूव जगदम्बिका॥ ३॥

श्रीमहादेवजी बोले—तदनन्तर श्रीरामचन्द्रजी दण्डवत् प्रणाम करके परम भक्तिसे युक्त होकर प्रसन्नमनसे भगवतीकी स्तुति करने लगे। महामुने! अन्य श्रेष्ठ देवगण भी वहाँ आकर सृजन, पालन तथा संहार करनेवाली महादेवीका स्तवन करने लगे। उन सभीके द्वारा भक्तिभावसे स्तुति, पूजन करनेपर जगज्जननी महादेवी अत्यन्त प्रसन्न हो गयीं॥ १—३॥

प्रहर्षश्च महानासीन्मुने त्रैलोक्यवासिनाम्।
तत्र देव्या महोत्साहे स्वर्गे मर्त्ये रसातले॥ ४॥

ननृतुर्वानराः सर्वे जगुर्गीतं मनोहरम्।
श्रीरामो मुमुदे देव्याः प्रसादात्पूर्णमानसः ॥ ५॥

मुने! उस समय देवीके अति प्रसन्न होनेसे स्वर्गलोक, मर्त्यलोक तथा रसातल—इन तीनों लोकोंके निवासियोंको महान् हर्ष हुआ। सभी वानर नृत्य करने तथा मनोहर गीत गाने लगे। भगवतीकी प्रसन्नतासे आप्तकाम श्रीरामजी आनन्दमग्न हो गये॥ ४-५॥

एवं महामहोत्साहे गते तु नवमीतिथौ।
श्रीरामस्य तथान्येषां देवानामपि नारद॥ ६॥

दशम्यां पूजयित्वा तु प्रातरेव पितामहः ।
व्यसृजज्जलधौ मूर्तिं ततः स्वगृहमाययौ॥ ७॥

नारद! इस प्रकार नवमी-तिथिको श्रीरामचन्द्रजी तथा अन्य देवताओंके इस महान् हर्षपूर्ण महोत्सवके बीतनेपर पितामह ब्रह्माजीने दशमीतिथिको प्रातःकाल भगवतीकी पूजा करके उनकी मूर्ति समुद्रमें विसर्जित कर दी और उसके बाद वे अपने लोकको लौट आये॥ ६-७॥

लङ्केश्वरं ततश्चक्रे रामचन्द्रो विभीषणम्।
ततः श्रीमान् रघुश्रेष्ठः सीतया लक्ष्मणेन च॥ ८॥

पुष्पकं रथमारुह्य वानरेश्वरसंयुतः ।
सहितो वानरैः सर्वै राक्षसेशसमन्वितः ॥ ९॥

इसके बाद श्रीरामचन्द्रजीने विभीषणको लङ्काका राजा बनाया। तत्पश्चात् रघुश्रेष्ठ श्रीमान् रामचन्द्रजी सीता, लक्ष्मण, वानरेन्द्र सुग्रीव, समस्त वानरगण तथा

वेष्टितैस्त्रिदशैश्चापि भल्लूकै कोटिकोटिश ।
पुर प्रवेशने यात्रा चक्रे नत्वा महेश्वरीम्॥ १०॥

इत्येव मुनिशार्दूल भगवान्पुरुषोऽव्यय ।
स्वयमाराधयामास शरत्काले विधानत ॥ ११॥

अन्येषा का कथा वत्स देवाना यक्षरक्षसाम्।
नराणा सिद्धगन्धर्वपन्नगाना महामते॥ १२॥

नास्ति देव्या समो लोके समाराध्यतमो मुने।
यस्ता मोहान्न सेवेत स पापात्मा न सशय ॥ १३॥

न तस्य विद्यते स्थान कुत्रापि मुनिसत्तम।
यस्तत्सपर्यालोप वै करोति च स पापकृत्॥ १४॥

तस्माच्छाक्तोऽथ वा शैव सौरो वा वैष्णवोऽथवा।
अवश्य पूजयेद्देवीं शारदीये महोत्सवे॥ १५॥

बलिभिर्मत्स्यमासाद्यैश्छागकासरमेषकै ।
प्रीतये जगदीश्वर्यास्तथान्यैरुपचारकै ॥ १६॥

वित्तशाठ्य न कर्तव्य कर्तव्य सर्वथादृतै ।
अवश्य यजन देव्या शारदीये महोत्सवे॥ १७॥

गृह्णाति चण्डिका यस्माद् दुष्टान् वै पशुरूपकान्।
तस्मात्पशुबलिर्देयो देवीभक्तिपरायणै ॥ १८॥

अन्यैरपि महायज्ञे देव्या प्रीतिमभीप्सुभि ।
देव्यर्चनरता ये च प्रतिसवत्सर मुने॥ १९॥

तदाज्ञावशगा सर्वे देवा इन्द्रपुरोगमा ।
किमन्यद्बहुनोक्तेन सत्यमेव महामुने॥ २०॥

नास्ति लोकत्रये पुण्य देव्या अर्चनसम्भवात्।
य इद शृणुयाद्भक्त्या रामायणमनुत्तमम्॥ २१॥

देव्या विस्तृतमाहात्म्य महापातकनाशनम्।
स देव्या पदवीं याति ब्रह्मादीना सुदुर्लभाम्॥ २२॥

राक्षसेश्वर विभीषणके साथ पुष्पकविमानपर आरूढ हुए।

उस विमानमे देवगणो तथा करोडो-करोडो भालुआसे घिरे हुए उन श्रीरामने भगवती महेश्वरीको प्रणाम करके अपने पुर (अयोध्या)-को जानेहेतु यात्रा आरम्भ की॥ ८—१०॥ मुनिवर! इस प्रकार जब अविनाशी पुरुष भगवान् श्रीरामने शरत्कालमे विधानपूर्वक स्वय भगवतीकी आराधना की थी तो फिर महामते! वत्स! अन्य देवताओं, यक्षो, राक्षसो, मनुष्यो, सिद्धो, गन्धर्वों तथा नागोके बारेमे क्या कहना? ॥ ११-१२॥ मुने! भगवतीके समान परमाराध्य इस लोकम कोई नहीं हे। जो प्राणी अविवेकके कारण उनकी उपासना नहीं करता, वह नि सदेह पापात्मा है। मुनिश्रेष्ठ! जो उनकी पूजाका लोप करता हे वह पापी है और उसके लिये कहीं भी स्थान नहीं है। अत चाहे कोई शाक्त हो, शैव हो, सूर्योपासक हो अथवा वैष्णव हो, उसे शारदीय महोत्सवमे जगदीश्वरीकी प्रसन्नताके लिये अनेकविध पूजनोपचारोसे भगवतीकी पूजा अवश्य करनी चाहिये। शारदीय महोत्सवमे सभी लोगोको सावधान होकर आदरपूर्वक देवीकी पूजा सर्वतोभावसे अवश्य ही करनी चाहिये। इसमे वित्तशाठ्य (धनकी कृपणता) नहीं करना चाहिये। मुने! जो लोग प्रत्येक वर्ष देवीका अर्चन-पूजन करते हें, इन्द्र आदि सभी प्रधान देवता उनकी आज्ञाके वशीभूत हो जाते हैं। महामुने! अधिक कहनेसे क्या लाभ? मैंने जो भी कहा है, वह सत्य ही है। भगवतीकी आराधनासे मिलनेवाले पुण्यसे बढकर तीनो लोकोम कोई भी पुण्य नहीं है। जो मनुष्य भक्तिपूर्वक इस उत्कृष्ट रामायण तथा महापातकोंका नाश करनेवाले भगवतीके विस्तृत माहात्म्यका श्रवण करता है, वह ब्रह्मा आदिके लिये भी अत्यन्त दुर्लभ देवीलोक प्राप्त कर लेता है॥ १३—२२॥

इत्युक्त ते मुनिश्रेष्ठ यथा स भगवान् हरि ।
सम्भूय मानुष देह समाश्रित्य धरातले॥ २३॥

शत्रोर्निधनमन्विच्छन्नकालेऽपि विधानत ।
देवीं सम्पूजयामास भूय कि श्रोतुमिच्छसि॥ २४॥

मुनिश्रेष्ठ! जिस प्रकारसे उन भगवान् श्रीहरिने मानवदेह धारण कर इस पृथ्वीलोकम जन्म लिया और शत्रुके निधनकी इच्छा करते हुए असमयम भी विधानपूर्वक भगवतीका पूजन किया—वह सबकुछ मैंने आपसे कह दिया। अब आप आगे क्या सुनना चाहते हैं?॥ २३-२४॥

॥ इति श्रीमहाभागवते महापुराणे देव्या शारदीयपूजानुष्ठाने श्रीमद्रामायणवर्णनं नाम अष्टचत्वारिंशोऽध्याय ॥ ४८॥

॥ इस प्रकार श्रीमहाभागवतमहापुराणके अन्तर्गत देवीके शारदीय पूजानुष्ठानम 'श्रीमद्रामायणवर्णन' नामक अडतालीसवाँ अध्याय पूर्ण हुआ॥ ४८॥

उनचासवाँ अध्याय

भगवान् शिवका भगवतीसे पुरुषरूपमे अवतार लेनेकी प्रार्थना करना तथा स्वय राधा और आठ पटरानियोके रूपमे अवतरित होनेका आश्वासन देना, भगवतीका स्वय कृष्णरूपसे तथा भगवान् विष्णुका अर्जुनरूपसे अवतार लेने और महाभारतयुद्धमे दुष्ट राजाओका वध करनेकी बात बताना

श्रीनारद उवाच

वदन्त्यनेकतत्त्वज्ञा काली विद्या परात्परा।
या सैव कृष्णरूपेण क्षितावववातरत्स्वयम्॥ १॥

वसुदेवगृहे देव्या देवक्या निजलीलया।
कसादिदुष्टभूभारनिवृत्त्यै जगदीश्वर ॥ २॥

अभवच्छ्रोतुमिच्छामि कस्माद्देवी महेश्वरी।
पुरूपेणावतीर्णाभूत्क्षितौ तन्मे वद प्रभो॥ ३॥

श्रीनारदजी बोले—अनेक तत्त्वज्ञानी लोग कहते हैं कि जो परात्पर विद्यास्वरूपिणी काली हैं, उन्होंने ही स्वय पृथ्वीपर श्रीकृष्णरूपमे अवतार ग्रहण किया। कस आदि दुष्टोका सहार करके पृथ्वीका भार दूर करनेके लिये उन्होने ही अपनी लीलासे वसुदेवके घरमे देवी देवकीके गर्भसे जगदीश्वरके रूपमें जन्म लिया। प्रभो! भगवती महेश्वरी पृथ्वीलोकमे पुरुषरूपमें ही क्यो अवतीर्ण हुईं, वह प्रसग मैं सुनना चाहता हूँ, आप मुझे बताइये॥ १—३॥

श्रीमहादेव उवाच

शृणु गुह्यतम वत्स सत्य ते कथयामि तत्।
अवतीर्णाभवत्पृथ्व्या देवक्या वसुदेवत ॥ ४॥

शम्भोरिच्छानुसारेण मायापुरुषरूपधृक्।
दुष्टभूभारसहृत्यै द्वापरान्ते महीतले॥ ५॥

श्रीमहादेवजी बोले—वत्स! सुनिये, अब मैं आपसे परम गोपनीय तथा सत्यप्रसगका वर्णन कर रहा हूँ। उन भगवतीने दुष्टोसे पृथ्वीका भार समाप्त करनेके लिये द्वापरके अन्तमे शम्भुकी इच्छाके अनुसार मायापुरुषका रूप धारण कर वसुदेवसे देवकीके गर्भसे पृथ्वीलोकमें अवतार लिया था॥ ४-५॥

श्रीनारद उवाच

यथेच्छा समपूच्छम्भोर्यथा चावातरत्क्षितौ।
काली श्रीकृष्णरूपेण वसुदेवगृहे स्वयम्॥ ६॥

श्रीनारदजी बोले—महेशान! जिस प्रकारसे शम्भुकी इच्छा हुई और जिस प्रकारसे स्वय उन

देवक्या परमेशान तदेतद्विस्तरेण मे।
त्व मे शस जगन्नाथ सर्वज्ञोऽसि दयापर ॥ ७ ॥

श्रीमहादेव उवाच

वत्स वक्ष्याम्यशेषेण तवाह मुनिसत्तम।
यथेच्छाभून्महेशस्य यथा जाता च सा क्षितौ॥ ८ ॥
काली श्रीकृष्णरूपेण द्वापरान्ते महीतले।
शृणु सावहितो भूत्वा भक्तिमानसि नारद॥ ९ ॥
एकदा मन्दिरे रम्ये कैलासे च सुनिर्जने।
पार्वत्या विहरञ्छम्भु स्थित परमकौतुकी॥ १० ॥
तत्र शम्भुर्निरीक्ष्यैव पार्वत्या रूपमुत्तमम्।
चेतसा चिन्तयामास नारीजन्मातिशोभनम्॥ ११ ॥
तत प्राह महादेवो देवीं सर्वाङ्गसुन्दरीम्।
प्रीणयन् प्रियवाक्येन विमृजन् पाणिना मुखम्॥ १२ ॥

श्रीशिव उवाच

कृपया परमेशानि सर्व एव मनोरथा ।
परिपूर्णीकृता किंचिदवशिष्ट न विद्यते॥ १३ ॥
अन्यत्किमपि शर्वाणि विद्यते वाञ्छित मम।
तत्सम्पूर्णं कुरु शिवे यदि ते मय्यनुग्रह ॥ १४ ॥

श्रीदेव्युवाच

किमन्यद्विद्यते शम्भो वाञ्छित तद्वद प्रभो।
करिष्ये तच्च सम्पूर्णं भवत प्रियकाम्यया॥ १५ ॥

श्रीशिव उवाच

यदि मे त्व प्रसन्नासि तदा पुस्त्वमवाप्नुहि।
कुत्रचित्पृथिवीपृष्ठे यास्येऽह स्त्रीस्वरूपताम्॥ १६ ॥

भगवती कालीने वसुदेवके घरमे देवकीके गर्भसे श्रीकृष्णरूपसे पृथ्वीपर अवतार लिया, यह सब आप मुझे विस्तारपूर्वक बताइये। जगन्नाथ! आप दयालु तथा सर्वज्ञ हैं॥ ६-७॥

श्रीमहादेवजी बोले—वत्स! मुनिश्रेष्ठ! जिस तरहसे महेश्वरकी इच्छा हुई और जिस तरहसे उन भगवती कालीने द्वापरके अन्तमे पृथ्वीलोकमे जन्म ग्रहण किया, नारद! आप परम भक्तिमान् हैं। अत वह सब प्रसग मैं आपको सम्पूर्णरूपसे बतला रहा हूँ, आप सावधान होकर सुनिये॥ ८-९॥

एक समयकी बात है, परम कौतुकी भगवान् शिव कैलासशिखरपर सुरम्य मन्दिरमे एकान्तमे पार्वतीके साथ विहार कर रहे थे। वहाँपर पार्वतीजीके सुन्दर रूपको देखकर भगवान् शम्भु मन-ही-मन सोचने लगे कि नारी-जन्म तो अत्यन्त शोभन है। उसी समय अपने हाथसे पार्वतीके मुखकमलका स्पर्श करते हुए तथा उन सर्वाङ्गसुन्दरी भगवतीको अपने मधुर वचनोसे प्रसन्नता प्रदान करते हुए शिवजी उनसे कहने लगे—॥ १०—१२॥

श्रीशिवजी बोले—परमेशानि! आपकी कृपासे मेरे सभी मनोरथ परिपूर्ण हो चुके हैं और कुछ भी अवशिष्ट नहीं रह गया है। तथापि शर्वाणि! मेरी एक दूसरी इच्छा हुई है। शिवे! यदि मुझपर आपका अनुग्रह हो तो उसे पूर्ण कर दीजिये॥ १३-१४॥

श्रीदेवीजी बोलीं—शम्भो! आपकी दूसरी कौन-सी अभिलाषा है, उसे बताइये। प्रभो! आपकी प्रसन्नताके लिये मैं उसे अवश्य पूर्ण करूँगी॥ १५॥

श्रीशिवजी बोले—यदि आप मुझपर प्रसन्न हैं तो पृथ्वीतलपर कहीं भी पुरुषरूपसे अवतीर्ण होइये और मैं स्त्रीरूपसे अवतीर्ण होऊँगा।

यथाहं ते प्रियो भर्ता त्वं वै प्राणसमाङ्गना।
एतदेव मनोऽभीष्टं विद्यते प्रार्थ्यमुत्तमम्॥ १७॥

कुरुष्व परिपूर्णं मे भक्ताभीष्टफलप्रदे।

श्रीदेव्युवाच

भविष्येऽहं त्वत्प्रियार्थं निश्चितं धरणीतले॥ १८॥

पुरूपेण महादेव वसुदेवगृहे प्रभो।
कृष्णोऽहं मत्प्रियार्थं स्त्री भव त्वं हि त्रिलोचन॥ १९॥

श्रीशिव उवाच

पुरूपेण जगद्धात्रि प्राप्तायां कृष्णतां त्वयि।
वृषभानोः सुता राधास्वरूपाहं स्वयं शिवे॥ २०॥

तव प्राणसमा भूत्वा विहरिष्ये त्वया सह।
मूर्तयोऽष्टौ तथा मर्त्ये भविष्यन्त्युत योषितः॥ २१॥

रुक्मिणीसत्यभामाद्या महिष्यश्चारुलोचनाः।

श्रीदेव्युवाच

तव मूर्तिभिरेताभिर्विहरिष्ये यथोचितम्॥ २२॥

यथा नापि कृतं कैश्चिन्न श्रुतं वापि कुत्रचित्।
अपूर्वं तदुपाख्यानं लोकानां पापनाशनम्॥ २३॥

भविष्यति महादेव महापुण्यकरं तथा।
विजया च जया चैव प्रियसख्यौ मम प्रभो॥ २४॥

श्रीदामवसुदामाख्यौ पुरुषौ सम्भविष्यतः।
विष्णुना समयः पूर्वमासीन्मम महेश्वर॥ २५॥

स मेऽग्रजः प्रियो भ्राता भविष्यति हलायुधः।
मम प्रीतिकरो नित्यं रामाख्यः सुमहाबलः॥ २६॥

देवकार्यं करिष्यामि सम्भविष्यामि च क्षितौ।
संस्थाप्य महतीं कीर्तिं पुनरेष्यामि भूतलात्॥ २७॥

इस समय जिस प्रकार मैं आपका प्रिय पति हूँ तथा आप मेरी प्राणप्रिया पत्नी हैं, उसी प्रकारका दाम्पत्य-प्रेम उस समय भी हो। भक्तोंको अभीष्ट फल प्रदान करनेवाली [देवि!] यही मेरे मनकी अभिलाषा है, मेरी इस उत्तम याचनाको आप परिपूर्ण कर दीजिये॥ १६-१७½॥

श्रीदेवीजी बोलीं—महादेव! प्रभो! आपकी प्रसन्नताके लिये मैं पृथ्वीतलपर वसुदेवके घरमें पुरुषरूपमें श्रीकृष्ण होकर अवश्य ही जन्म लूँगी और त्रिलोचन! मेरी प्रसन्नताके लिये आप भी स्त्रीरूपमें जन्म लीजिये॥ १८-१९॥

श्रीशिवजी बोले—जगत्‌का पालन करनेवाली शिवे! आपके पुरुषरूपसे श्रीकृष्णके रूपमें प्राप्त होनेपर स्वयं मैं आपकी प्राणसदृश वृषभानुपुत्री राधारूपमें होकर आपके साथ विहार करूँगा। साथ ही मेरी आठ मूर्तियाँ भी सुन्दर नेत्रोंवाली रुक्मिणी, सत्यभामा आदि पटरानियोंके रूपमें मृत्युलोकमें अवतरित होंगी॥ २०-२१½॥

श्रीदेवीजी बोलीं—आपकी इन मूर्तियोंके साथ मैं ऐसा यथोचित विहार करूँगी, जैसा न तो किसीने किया है और न तो कहीं सुना ही गया है। महादेव! वह अद्भुत उपाख्यान प्राणियोंके पापोंका नाश करनेवाला तथा महान् पुण्य प्रदान करनेवाला होगा। प्रभो! विजया और जया नामक मेरी दोनों सखियाँ उस समय श्रीदाम और वसुदाम नामसे पुरुषरूपमें प्रतिष्ठित होंगी। महेश्वर! पूर्वकालमें विष्णुजीके साथ मेरी प्रतिज्ञा हुई है, उसके अनुसार वे उस समय (जब मैं श्रीकृष्ण होऊँगी) मेरे बड़े भाई होंगे। सर्वदा मेरा प्रिय करनेवाले, महान् बलशाली तथा आयुधके रूपमें हल धारण करनेवाले वे 'बलराम' नामसे प्रसिद्ध होंगे। इस प्रकार मैं पृथ्वीपर प्रादुर्भूत होऊँगी और देवताओंके कार्य सम्पन्न करूँगी तथा अन्तमें महान् कीर्ति स्थापित करके भूतलसे वापस चली जाऊँगी॥ २२—२७॥

श्रीमहादेव उवाच

एव प्रतिश्रुत देव्या शम्भवे प्रेमभावत ।
तस्माद्बभूव सा कृष्ण श्यामो नवघनद्युति ॥ २८ ॥

एतदेव मुनिश्रेष्ठ कारण मूलमीरितम्।
कृष्णावतारे शर्वाण्या अन्यच्चापि निशामय॥ २९ ॥

निहता समरे दैत्या पूर्वं देव्या च विष्णुना।
द्वापरान्ते महीपाला बभूवुर्मुनिसत्तम॥ ३० ॥

कसस्तत्रातिदुर्धर्षस्तथा दुर्योधनादय ।
अनेकदेशसम्भूतास्तथान्ये क्षत्रियर्षभा ॥ ३१ ॥

तेषा भारासहा पृथ्वी गोरूपा ब्रह्मणोऽन्तिकम्।
प्रययौ त्रिदशै सर्वै समतात्परिवारिता॥ ३२ ॥

ता दृष्ट्वा धरणीं ब्रह्मा गोरूपामतिदु खिताम्।
उवाच मात कस्मात्त्व मदन्तिकमुपागता॥ ३३ ॥

धरण्युवाच

निहता समरे ये ये पूर्वं दानवपुङ्गवा ।
त एव साम्प्रत ब्रह्मन् राजानो दुष्टचेतस ॥ ३४ ॥

तान्वोढुमसमर्थाह तवान्तिकमुपागता।
उपाय कल्प्यता तेषा निधने कमलासन॥ ३५ ॥

श्रीमहादेव उवाच

इत्याकर्ण्य वचो ब्रह्मा धरण्या मुनिपुङ्गव।
आश्वास्य ता स्वय प्रागात्कैलास त्रिदशैर्वृत ॥ ३६ ॥

तत्र वीक्ष्य जगद्धात्रीं प्रणिपत्य पुन पुन ।
कृताञ्जलिपुटो ब्रह्मा वचन चेदमब्रवीत्॥ ३७ ॥

ब्रह्मोवाच

मातस्त्वया हता ये ये दैत्यदानवराक्षसा ।
विष्णुनापि च ते सर्वे साम्प्रत क्षत्रियर्षभा ॥ ३८ ॥

तैर्व्याप्ता सकला पृथ्वी राजभिर्दुष्टचेष्टितै ।
न तान् विसहते पृथ्वी मृत्युस्तेषा विचिन्त्यताम्॥ ३९ ॥

त्व मातर्विग्रह कृत्वा छलेन धरणीभुज ।
निपातय च तेषा तु मृत्युरूपा त्वमम्बिके॥ ४० ॥

श्रीमहादेवजी बोले—इस प्रकार प्रेमभावनासे युक्त होकर भगवतीने शम्भुसे प्रतिज्ञा की थी। उसी कारण वे नवीन मेघकी आभासे युक्त श्याम-वर्णवाले श्रीकृष्णके रूपमे अवतीर्ण हुईं। मुनिश्रेष्ठ! शर्वाणीके श्रीकृष्णावतार धारण करनेका यही मुख्य कारण कहा गया है। अब आप अन्य प्रसग भी सुनिये॥ २८-२९ ॥

मुनिश्रेष्ठ! पूर्वकालमे भगवती और विष्णुजीने युद्धमे जिन राक्षसोका सहार किया था, द्वापरके अन्तमे वे ही बहुत-से राजाओके रूपमे उत्पन्न हुए। उनमे कस तथा दुर्योधन आदि बडे ही दुर्दान्त थे। उसी प्रकार दूसरे और भी महान् क्षत्रिय नरेश अनेक देशोमे उत्पन्न हुए। उनके भारको सहन न कर सकनेके कारण गायका रूप धारण कर पृथ्वी समस्त देवताओके साथ ब्रह्माजीके पास गयीं। दु खसे सतप्त उन गोरूपधारिणी पृथ्वीको देखकर ब्रह्माजीने कहा—माता! आप मेरे पास किसलिये आयी, हैं ?॥ ३०—३३ ॥

पृथ्वी बोलीं—ब्रह्मन्! पूर्वकालमे जो-जो महान् राक्षस युद्धमे मारे गये थे, वे ही इस समय दुष्टचित्तवाले राजा बने हुए हैं। उनका भार वहन करनेमे असमर्थ होकर मैं आपके पास आयी हूँ। अत कमलासन! उनकी मृत्युका कोई उपाय कीजिये॥ ३४-३५ ॥

श्रीमहादेवजी बोले—मुनिश्रेष्ठ! पृथ्वीका यह वचन सुनकर ब्रह्माजी उन्हें आश्वासन प्रदान कर देवताओंके साथ कैलासपर्वतपर पहुँचे। वहाँपर जगत्का पालन करनेवाली भगवतीको देखकर ब्रह्माजीने दोनो हाथ जोडकर उन्हे बार-बार प्रणाम किया ओर यह वचन कहा—॥ ३६-३७ ॥

ब्रह्माजी बोले—माता! आपने ओर विष्णुजीने जिन-जिन दैत्यो, दानवो ओर राक्षसाका सहार किया था, वे सब इस समय बडे-बडे क्षत्रिय राजा हो गये हैं। उन दुराचारी राजाओसे पृथ्वी व्याप्त है और उनका भार सहन नहीं कर पा रही है, अत आप उनकी मृत्युका उपाय सोचिये। माता! आप मायाविग्रह धारणकर छलके द्वारा उन राजाओका वध कीजिये, क्योकि अम्बिके! आप उनकी मृत्युस्वरूपिणी हैं॥ ३८—४० ॥

श्रीदेव्युवाच

नाह योत्स्यामि सग्रामे स्त्रीरूपा क्षत्रियर्षभै ।
यतस्ते स्त्रीस्वरूपेण मां भक्त्या समुपाश्रिता ॥ ४१ ॥
किंतु मे भद्रकाली या मूर्तिर्नवघनद्युति ।
वसुदेवगृहे ब्रह्मन् पुरूपेण भविष्यति ॥ ४२ ॥
देवक्या द्विभुज सौम्यो वनमाला विराजित ।
श्रीवत्सलाञ्छनधर सुचारुमुखपङ्कज ॥ ४३ ॥
आत्मसगोपनार्थाय विष्णुलक्षणलक्षित ।
सर्वाङ्गसुन्दर श्याम शङ्खचक्रविराजित ॥ ४४ ॥
भविष्यति महामायो दुष्टक्षत्रियमर्दन ।
पातयिष्यति कसादीन् विविधान् क्षत्रियर्षभान् ॥ ४५ ॥
विष्णुश्चापि निजांशेन पाण्डवो भीमविक्रम ।
अर्जुनेति समाख्यातो भविष्यति महाबल ॥ ४६ ॥
तस्य भ्राता स्वय धर्मो ज्येष्ठो नाम्ना युधिष्ठिर ।
उत्पन्नश्चापरस्तद्वद्भीमसेनो महाबल ॥ ४७ ॥
पवनोऽपि निजांशेन महाबलपराक्रम ।
उत्पत्स्यतस्तथा माद्रिपुत्रौ भीमपराक्रमौ ॥ ४८ ॥
अश्विनौ सहजौ वीरौ भ्रातरावतिदुर्जयौ ।
ते धर्मनिरता सर्वे पाण्डवा सत्यविक्रमा ॥ ४९ ॥
मदंशसम्भवा कृष्णामवमस्यति दुर्मति ।
दुर्योधनाह्वय क्रूर सर्वेषा कण्टकोपम ॥ ५० ॥
अन्यच्चापि स पापात्मा पाण्डवाना महात्मनाम् ।
सक्लेशजनक कर्म करिष्यति दुरासद ॥ ५१ ॥
अज्ञातवनवासादि दु खद सर्वदेहिनाम् ।
ततोऽह पाण्डुपुत्राणा कृत्वा साहाय्यमुत्तमम् ॥ ५२ ॥
यत सा कुत्र इत्येव नैव ज्ञास्ये कदाचन॥ ३४॥

इन्द्र बोले—मुझे लगता है कि इस पापसे मेरी मुक्ति नहीं हो सकेगी, क्योंकि मुझे कभी यही ज्ञात नहीं हो पायेगा कि वे जगदम्बा कहाँ विराजती हैं॥ ३४॥

गौतम उवाच

महोग्रतपसा कालीं योगिनस्तत्त्वदर्शिन ।
पश्यन्ति बहुकालेन युगान्तोदीक्षितेन च॥ ३५ ॥
तथाचरति यस्तस्य समायाति पुर सरम्।
महाकाली जगद्धात्री योगगम्या सनातनी॥ ३६ ॥
सुराणामधिपस्त्व तु सर्वदा राष्ट्रपालक ।
त्यक्त्वा राज्य कथ योग्यस्तप कर्तुं भविष्यसि॥ ३७॥
तस्मादन्य ह्युपाय ते महाकालीप्रदर्शने।
न पश्यामि विना तस्या आलये गमनादृते॥ ३८ ॥
तस्मात्त्वमनुसन्धाय पुरीं तस्या पुरन्दर।
तत्र गत्वा महाकालीं पश्य ब्रह्मादिदुर्लभाम्॥ ३९ ॥
उपायमनुसन्धाने वक्ष्यामि सुरनायक।
गत्वादौ ब्रूहि लोकाना पितामहमनामयम्॥ ४० ॥
सोऽपि चेच्चैव जानाति स्वय भूत्वा तु यत्नवान्।
अनुसन्धास्यते नून महाकाल्या पुर तत ॥ ४१ ॥
स चेद्यद्यनुसन्धाता तदावश्य महामते।
भविष्यत्यनुसन्धान सत्यमेतद्ब्रवीमि ते॥ ४२ ॥

गौतम बोले—तत्त्वदर्शी योगीजन दीर्घकालतक युगान्तदर्शिणी उग्र तपस्यासे महाकालीके दर्शन करते हैं। जो ऐसा कर पाता है उसके समक्ष योगगम्या, सनातनी, जगन्माता महाकाली प्रकट हो जाती हैं, किंतु तुम तो देवताओके राजा हो और राष्ट्रका पालन करनेवाले हो, राज्यपालनके दायित्वको छोडकर तुम ऐसा तप कैसे कर सकोगे ? इसलिये उनके भुवनमे जानेके अतिरिक्त उनके दर्शनका दूसरा उपाय तुम्हारे लिये मुझे नहीं दिखायी देता। अत पुरन्दर! तुम उनकी पुरीका पता लगाकर और वहाँ जाकर ब्रह्मादिके लिये दुर्लभ भगवती महाकालीका दर्शन करो॥ ३५—३९ ॥ सुरनायक! उनकी पुरीको खोजनेका उपाय तुम्हे बताता हूँ, तुम्हे सबसे पहले निर्विकार लोकपितामह ब्रह्माजीके पास जाकर पूछना चाहिये। वे यदि स्वय यत्नपूर्वक खोज करेगे तो महाकालीकी पुरीका पता अवश्य लग जायगा। अत महामते! ब्रह्मा जिसकी खोज करे, उसका पता अवश्य ही हो जाता है—यह मैं सत्य कह रहा हूँ॥ ४०—४२ ॥

इन्द्र उवाच

न तवाज्ञा वृथा देव भविष्यति कदाचन।
यास्येऽहं ब्रह्मसान्निध्यं तत्रोपायं भविष्यति॥ ४३॥

श्रीमहादेव उवाच

इत्युक्त्वा देवराजस्तं त्रिधा कृत्वा प्रदक्षिणम्।
प्रणम्य दण्डवद्भूमौ ब्रह्मलोकं तदा ययौ॥ ४४॥

पुष्पकं रथमारुह्य मन्त्रिभिः सह नारद।
उवाच स यथावृत्तं गौतमेनाभिभाषितम्॥ ४५॥

तच्छ्रुत्वा भगवान्ब्रह्मा देवराजमुवाच ह।
न ज्ञायते मया तस्याः पुरं कुत्र सुराधिप॥ ४६॥

कृपया देवकार्यार्थं स्वयमाविर्बभौ यदा।
तदा दृष्टा महाकाली ब्रह्मरूपा सनातनी॥ ४७॥

पुनः सान्तर्हिता भूत्वा सर्वदेवस्य पश्यतः।
इत्येवमेव जानामि न पुरं ज्ञायते मया॥ ४८॥

इन्द्र उवाच

ब्रह्मस्त्वं चेन्न जानासि पुरं तस्यास्तदा कथम्।
ज्ञातव्यं वा मया पारं प्राप्स्यते पापसञ्चयात्॥ ४९॥

ब्रह्मोवाच

त्वयि राजनि देवानां यदि स्थास्यति पातकम्।
तदा बहुविधोत्पातं भविष्यति सुरालये॥ ५०॥

तस्माच्च पापशान्त्यर्थं यत्नवानस्मि वै ध्रुवम्।
सर्वथैवानुसंधास्ये पुरं तस्याः सुगोपितम्॥ ५१॥

यदि तामनुपश्यामि तव कार्यानुरोधतः।
भविष्यामि तदा मुक्तः किमु कार्यमतः परम्॥ ५२॥

श्रीमहादेव उवाच

एवमाश्वास्य देवानामधिपं स पितामहः।
वैकुण्ठं प्रययौ दिव्यं रथमारुह्य नारद॥ ५३॥

इन्द्रोऽपि रथमारुह्य पुष्पकं तस्य पृष्ठतः।
प्रययौ विष्णुना गुप्तं पुरं वैकुण्ठमुत्तमम्॥ ५४॥

ततो ब्रह्मा समाश्वास्य देवराजमुवाच ह।
शृणु वत्स वचो मे त्वं बहिस्तिष्ठ सुरेश्वर॥ ५५॥

इन्द्र बोले—देव! आपकी आज्ञा कभी व्यर्थ नहीं होगी, मैं ब्रह्माजीके पास जाऊँगा, जिससे कोई उपाय अवश्य होगा॥ ४३॥

श्रीमहादेवजी बोले—नारदजी! ऐसा कहकर देवराजने मुनिकी तीन परिक्रमाएँ कीं और उन्हें दण्डवत् प्रणाम कर अपने मन्त्रियोंसहित पुष्पक विमानपर बैठकर उन्होंने ब्रह्मलोकके लिये प्रस्थान किया तथा महर्षि गौतमने जैसा बताया था, वह सारा वृत्तान्त उन्हें कह सुनाया॥ ४४-४५॥ ऐसा सुनकर भगवान् ब्रह्माने देवराज इन्द्रसे कहा कि सुराधिप! उन महाकालीकी नगरी कहाँ है, यह मैं नहीं जानता। देवताओंके कार्यको सिद्ध करनेके लिये कृपापूर्वक जब वे स्वयं प्रकट हुई थीं, उसी समय मैंने उन सनातनी ब्रह्मरूपा महाकालीके दर्शन किये थे। तत्पश्चात् सभी देवताओंके देखते-देखते वे अन्तर्धान हो गयी थीं। मैं इतना ही जानता हूँ, उनकी नगरीका मुझे ज्ञान नहीं॥ ४६—४८॥

इन्द्र बोले—ब्रह्मन्! जब आप ही उनकी नगरीको नहीं जानते, तब मैं कैसे जान पाऊँगा और इस ब्रह्महत्यारूपी सञ्चित पापसे मुझे कैसे मुक्ति मिल सकेगी?॥ ४९॥

ब्रह्माजी बोले—देवताओंके राजा यदि आपमें यह पातक टिका रहेगा तो स्वर्गमें बहुत-से उत्पात होने लगेंगे। इसलिये इस पापका निवारण करनेके लिये मैं निश्चितरूपसे प्रयत्नशील हूँ। जगदम्बाकी अत्यन्त गोपनीय नगरीको मैं सब प्रकारसे खोजूँगा। यदि आपके कार्यसम्पादनमें भगवतीके दर्शन मुझे हो गये तो मैं मुक्त हो जाऊँगा। इससे बढ़कर करणीय कार्य अन्य कुछ नहीं है॥ ५०—५२॥

श्रीमहादेवजी बोले—नारदजी! इस प्रकार देवराज इन्द्रको आश्वासन देकर पितामह ब्रह्माजी दिव्य रथपर आरूढ होकर वैकुण्ठधामको चले गये॥ ५३॥ इन्द्र भी अपने पुष्पक विमानपर पीछे-पीछे चलते हुए भगवान् विष्णुके द्वारा रक्षित उत्तम लोक वैकुण्ठधाम गये॥ ५४॥ तब ब्रह्माजीने देवराज इन्द्रको आश्वस्त करते हुए कहा कि वत्स! सुरेश्वर! मेरी बात सुनो और तुम बाहर ही

अहमन्त पुर यामि ततस्त्वमनुयास्यसि।
आज्ञप्तो देवदेवेन ब्रह्मणा विष्णुरूपिणा॥५६॥

तच्छ्रुत्वा ब्रह्मवचन देवराजस्तथाकरोत्।
ब्रह्मा ययौ जगन्नाथो यत्रास्ते भगवान्हरि ॥५७॥

लक्ष्मीसरस्वतीयुक्तो हृदि कौस्तुभमण्डित ।
नवीनजलदश्याम शङ्खचक्रगदाधर ॥५८॥

त दृष्ट्वा भगवान्विष्णु पप्रच्छ स्वागत विभु ।
ब्रह्मा प्राह जगन्नाथ स्वागत त्वत्प्रसादत ॥५९॥

देवदेव पुरद्वारि दर्शनार्थं समागत ।
प्रतीक्षते तवानुज्ञामत्रायातु जनार्दन॥६०॥

तच्छ्रुत्वा गरुड प्राह भगवान्विष्णुरव्यय ।
प्रवेशय सुराणा तमधिप पुरमध्यके॥६१॥

तच्छ्रुत्वा गरुडस्तूर्णं गत्वा तद्द्वारमुत्तमम्।
प्रवेशयामास मुने तदन्त पुरमुत्तमम्॥६२॥

इन्द्रस्तु दण्डवद्भूमौ प्रणिपत्य जगत्पतिम्।
कृताञ्जलिपुट प्राह धन्योऽह तव दर्शनात्॥६३॥

त्वत्पादपङ्कजजनि सुरवृन्दवन्द्या
गङ्गा पुनाति सकलानि जगन्ति धन्या।
तत्त्वा दृशा यदिह सर्वसुरैकवन्द्य
पश्यामि भाग्यमतुल मम पूर्वजातम्॥६४॥

इत्येव परमेश्वर सुरपतिर्विष्णु स्तुवन्भक्तितो
ब्रह्माज्ञा प्रतिलभ्य गौतममुनेर्वाक्य समावेदयत्।
श्रुत्वा श्रीकमलापति सुरपतेर्वाक्य ततो विस्मित
प्रासीन्मौनमुख पितामहपुरस्त्रैलोक्यसम्पालक ॥६५॥

ठहरो। मैं भगवान् विष्णुके धामके अदर प्रवेश कर रहा हूँ तब परब्रह्म भगवान् विष्णुकी आज्ञा प्राप्त होनेपर तुम भी भीतर आ जाना॥५५-५६॥ ब्रह्माजीके ऐसे वचन सुनकर देवराज इन्द्रने वैसा ही किया। ब्रह्माजी वहाँ पहुँचे, जहाँ जगन्नाथ भगवान् विष्णु विराजमान थे। उनके हृदयपर कौस्तुभमणि शोभा पा रही थी, नवीन मेघके समान उनका श्यामवर्ण था। उन्होंने शङ्ख, चक्र और गदा धारण कर रखे थे तथा लक्ष्मी एव सरस्वती उनके साथ विराजमान थीं॥५७-५८॥

ब्रह्माजीको आया देखकर भगवान् विष्णुने शुभागमनविषयक प्रश्न पूछे। बह्माजीने भगवान्से कहा कि आपकी कृपासे सानन्द आगमन हुआ है। जनार्दन! देवराज इन्द्र भी आपके दर्शनार्थ आये हैं और वैकुण्ठलोकके द्वारपर यहाँ प्रवेशहेतु आपकी आज्ञाकी प्रतीक्षा कर रहे हैं॥५९-६०॥ यह सुनकर अच्युत भगवान् विष्णुने गरुडको आज्ञा दी कि देवराज इन्द्रको वैकुण्ठके अदर ले आओ॥६१॥ मुने! यह सुनकर गरुड शीघ्रतापूर्वक द्वारपर गये और उन्हाने इन्द्रको श्रेष्ठ धामके अदर प्रवेश कराया॥६२॥ इन्द्रने भूमिपर दण्डवत् प्रणाम करके हाथ जोडकर जगत्पति भगवान् विष्णुसे कहा कि आपके दर्शनसे मैं धन्य हुआ॥६३॥

जब आपके चरणकमलसे निकली हुई देवपूजित सोभाग्यशालिनी भगवती गङ्गा सभी लोकाको पवित्र करती हैं तो फिर सभी देवताओके वन्दनीय आपका इन आँखोसे मैं साक्षात् दर्शन कर रहा हूँ, यह मेरे पूर्वकृत शुभ कर्मोसे उत्पन्न अतुलनीय अहोभाग्य है॥६४॥ इस प्रकार परमेश्वर भगवान् विष्णुकी भक्तिपूर्वक स्तुति करके ब्रह्माजीकी आज्ञा पाकर इन्द्रने गौतममुनिकी कही बाते निवेदित कीं। इन्द्रकी बात सुनकर विस्मित हुए त्रिलोकीके पालनकर्ता कमलापति भगवान् श्रीविष्णु ब्रह्माजीके समक्ष मौन रह गये॥६५॥

॥ इति श्रीमहाभागवते महापुराणे गौतमवाक्याद्ब्रह्ममयीस्थानानुसन्धानार्थं देवराजस्य चतुर्मुखविष्णुलोकगमनं नामैकषष्टितमोऽध्याय ॥६१॥

॥ इस प्रकार श्रीमहाभागवतमहापुराणके अन्तर्गत 'गौतमके कथनानुसार ब्रह्ममयीस्थानानुसन्धानार्थ देवराजका चतुर्मुखविष्णुलोकगमन' नामक इकसठवाँ अध्याय पूर्ण हुआ॥६१॥

बासठवॉ अध्याय

भगवान् विष्णुका इन्द्रसे महाकालीके लोकके विषयमे अनभिज्ञता व्यक्त करना, ब्रह्मा, विष्णु ओर इन्द्रका शिवलोक जाना तथा भगवान् शिवके साथ भगवती महाकालीके लोकमे जाना

श्रीमहादेव उवाच

एव भूत्वा कियत्काल मौनी कमललोचन ।
उवाच देवराज त मृदुवाक्येन नारद॥ १ ॥

श्रीभगवानुवाच

न मया ज्ञायते देवी कुत्रास्ते सा महेश्वरी।
महाकाली ब्रह्मरूपा विश्वरूपा सनातनी॥ २ ॥
यत्र तिष्ठति सा देवी जानीते तन्महेश्वर ।
तत्र गच्छ महेशान यथावृत्त निवेदय॥ ३ ॥
अहमप्यागमिष्येऽद्य द्रष्टु देव्या पुर महत्।
द्रक्ष्यामि चक्षुषा देवीं किमु कार्यमत परम्॥ ४ ॥

श्रीमहादेव उवाच

इत्युक्त्वा त जगन्नाथो गरुड सहसोत्थित ।
प्रययौ शिवसान्निध्य ब्रह्मणा सहित प्रभु ॥ ५ ॥
इन्द्रश्च रथमारुह्य तयो पश्चाद्ययौ मुने॥ ६ ॥
दृष्ट्वा तास्तु समायातान्नन्दी बुद्धिमता वर ।
महेशसन्निधि गत्वा कथयामास तत्क्षणात्॥ ७ ॥
देवदेव जगन्नाथ विष्णुर्नारायण स्वयम्।
आगतो ब्रह्मणा सार्धं देवराजेन च प्रभो॥ ८ ॥
तमाह शम्भु शीघ्र तान्प्रवेशय महामते।
तच्छ्रुत्वा सोऽपि गत्वा तान्पुर प्रावेशयन्मुने॥ ९ ॥
ते शम्भो सन्निधि गत्वा प्रणिपत्यातिभक्तित ।
पार्वतीसहित त च प्रणेमुर्मुनिपुङ्गव॥ १० ॥
ततस्तानाह विश्वेश कथमत्र समागता ।
द्रुत वदत युष्माक कि कार्य समुपस्थितम्॥ ११ ॥

श्रीविष्णुरुवाच

इन्द्रोऽय ब्रह्महत्याया प्रायश्चित्त महामति ।
पप्रच्छ मुनिशार्दूल गौतम शास्त्रवित्तमम्॥ १२ ॥
स च प्राह महाकालीं पश्य तस्या पुर व्रजन्।
पुर तु कुत्र तन्नैव जानामि सुरनायक॥ १३ ॥

श्रीमहादेवजी बोले—नारदजी! कुछ देर मौन रहकर कमललोचन भगवान् विष्णुने मीठी वाणीमे देवराज इन्द्रसे कहा— ॥ १ ॥

श्रीभगवान् बोले—मुझे यह ज्ञात नहीं है कि वे ब्रह्मरूपा सर्वस्वरूपा सनातनी महेश्वरी महाकाली कहाँ विराजती हैं। वे देवी जहाँ रहती हैं, उसे महेश्वर भगवान् शिव जानते हैं। इसलिये उन्हीं महेश्वरके पास जाओ और उनसे पूरी बात निवेदित करो। मैं भी देवीके दिव्य लोकको देखने आऊँगा। इन नेत्रोसे देवीके दर्शन होगे, इससे बढकर और क्या कार्य होगा? ॥ २—४ ॥

श्रीमहादेवजी बोले—ऐसा कहकर भगवान् विष्णु सहसा ही गरुडपर आरूढ होकर ब्रह्माजीके साथ भगवान् शिवके पास गये। मुने! इन्द्र भी अपने विमानपर चढकर उन दोनोके पीछे चले। बुद्धिमानोमे श्रेष्ठ नन्दीने उन सबको आया देखकर तत्क्षण भगवान् शिवके निकट जाकर निवेदन किया॥ ५—७॥ महादेव! विश्वनाथ! प्रभो! पितामह ब्रह्मा और देवराज इन्द्रके साथ भगवान् नारायण स्वय उपस्थित हुए हैं॥ ८॥ महामते! मुने! भगवान् शिवने नन्दीसे कहा कि उन्हें शीघ्र ले आओ। ऐसा सुनकर वे नन्दी भी वहाँ जाकर उन सबको शिवलोकमे ले आये॥ ९॥ मुनिश्रेष्ठ! भगवान् शिवकी सन्निधिमे जाकर उन्होन अत्यन्त भक्तिपूर्वक पार्वतीसहित भगवान् शकरको साष्टाङ्ग प्रणाम किया। तब विश्वनाथ भगवान् शकरने उनसे पूछा कि आपलोग किस कारणसे यहाँ आये हैं, आपलोगोका कौन-सा कार्य आ पडा है, इसे शीघ्र बताइये॥ १०-११ ॥

श्रीविष्णु बोले—इन बुद्धिमान् इन्द्रने शास्त्रवेत्ताओंमें श्रेष्ठ मुनिवर गौतमसे ब्रह्महत्याका प्रायश्चित्त पूछा था। उन्होने बताया कि सुरश्रेष्ठ! भगवती महाकालीके लोकमें जाकर उनके दर्शन करो, किंतु उनका लोक कहाँ है,

तच्छ्रुत्वा वचनं तस्य ब्रह्मणोऽन्तिकमागतः।
पप्रच्छ तं पुरं देव्याः कुत्र तन्मे वद प्रभो॥ १४॥
स प्राह नैव जानामि कुत्र देव्याः पुरं महत्।
ततो ब्रह्मा समायातः सुरेन्द्रेण ममान्तिकम्॥ १५॥
पप्रच्छ मां तथेन्द्रोऽपि ब्रह्मणा प्रेरितः प्रभो।
तच्छ्रुत्वा विस्मयाविष्टः सह ताभ्यामिहागतः॥ १६॥
त्वमवश्यं हि जानासि महाकाल्याः पुरं विभो।
स त्वमस्मान्महादेव्याः पुरं नीत्वा प्रदर्शय॥ १७॥
अयमिन्द्रो महाबाहुस्त्रिलोकेशो महेश्वर।
महापातकयुक्तश्चेत्कथं तिष्ठेज्जगत्त्रयम्॥ १८॥

श्रीशिव उवाच

योगेन लक्षवर्षस्य तत्स्थानं ज्ञातवानहम्।
यूयमागच्छत तथा यास्येऽहं मधुसूदन।
दर्शयिष्यामि तां देवीं नीत्वा तस्याः पुरं द्रुतम्॥ १९॥

श्रीमहादेव उवाच

इत्युक्त्वा नन्दिनं प्राह वृषं सज्जीकुरु द्रुतम्।
यास्यामोऽद्य महाकाल्याः पुरं रत्नपरिष्कृतम्॥ २०॥
तच्छ्रुत्वा सोऽपि सहसा तथा चक्रे महामुने॥ २१॥
ततः समारुह्य वृषं महेश्वरो
विष्णुश्च तार्क्ष्यं जितवायुवेगकम्।
ब्रह्मा विमानं मणिभिः परिष्कृतं
प्रायान्महेन्द्रोऽपि च पुष्पकं तथा॥ २२॥
पथि व्रजन्तो गगने सुरोत्तमा
ऊचुः समागम्य परस्परं मुने।
परात्परा सैव महामहेश्वरी
श्रीकालिकायाः नहि विद्यते परा॥ २३॥
सृजत्यलं सैव जगन्महेश्वरी
सम्पाति सर्वासु विपत्सु सा तथा।
अन्ते तथा संहरते च विश्वं
निमित्तमात्रं तु वयं त्रयस्त्विति॥ २४॥
एवं वदन्तो बहुधा सुरोत्तमा
व्यतीत्य पन्थानमुपागमन्मुने।
श्रीकालिकाया नगरं महामुने
स्वर्णादिभिश्चित्रितमद्भुतोत्तमम्॥ २५॥

यह मैं नहीं जानता। उनकी यह बात सुनकर इन्द्र ब्रह्माजीके पास आये और उन्होंने उनसे पूछा—प्रभो! जगदम्बिकाका दिव्य लोक कहाँ है, यह मुझे बताइये। उन्होंने भी कहा कि देवीका दिव्य लोक कहाँ है, यह मैं नहीं जानता। तब ब्रह्मा इन्द्रको लेकर मेरे पास आये॥ १२—१५॥ प्रभो! ब्रह्माजीकी प्रेरणासे इन्द्रने मुझसे भी यही बात पूछी। यह सुनकर विस्मित हुआ मैं उन दोनोंके साथ यहाँ आया हूँ। विभो! आप अवश्य ही महाकालीके दिव्य लोकको जानते हैं, इसलिये आप कृपापूर्वक हम सबको महादेवीके पुर ले जाकर देवीके दर्शन कराइये॥ १६-१७॥ महेश्वर! यह महाबाहु त्रिलोकेश इन्द्र यदि ब्रह्महत्याके महापातकसे युक्त रहेगा तो त्रिलोकी कैसे रहेगी?॥ १८॥

श्रीशिवजी बोले—मधुसूदन! एक लाख वर्षोंतक तपस्या करके मैंने उस स्थानका ज्ञान प्राप्त किया है। आप सभी मेरे साथ आये, मैं वहाँ ले चलूँगा। शीघ्र ही उनके लोकमें पहुँचकर उन भगवतीके दर्शन कराऊँगा॥ १९॥

श्रीमहादेवजी बोले—ऐसा कहकर भगवान् शिवने नन्दीको शीघ्र वृषवाहन तैयार करनेकी आज्ञा दी और कहा कि हम सभी आज ही महाकालीके रत्नमण्डित लोकको जायँगे॥ २०॥ महामुने! यह सुनकर नन्दीने शीघ्र ही उस आज्ञाका पालन किया। तब महेश्वर शिव वृषवाहनपर आरूढ होकर, भगवान् विष्णु वायुसे भी द्रुतगामी गरुडपर, पितामह ब्रह्मा मणिजटित विमानपर तथा इन्द्र भी अपने पुष्पक विमानपर आरूढ होकर चले॥ २१-२२॥ मुने! आकाशमार्गसे जाते हुए श्रेष्ठ देवोंने एकत्र होकर परस्पर वार्तालापमें ऐसा कहा कि वे ही महामहेश्वरी पराशक्ति हैं और श्रीमहाकालीसे श्रेष्ठ कुछ भी नहीं॥ २३॥ वे ही महेश्वरी इस जगत्‌का सृजन करती हैं, सारी विपत्तियोंसे इसकी रक्षा करती हैं और अन्तमें इसका संहार भी करती हैं। हम तीनों तो निमित्तमात्र हैं॥ २४॥ मुने! इस प्रकार देवीके अनेकशः गुणगान करते हुए वे श्रेष्ठ देवगण मार्गको पारकर श्रीमहाकालीके श्रेष्ठ लोकमें आये, जो स्वर्णादिसे मण्डित होकर अद्भुत शोभाको प्राप्त हो रहा था॥ २५॥

विलोक्य सर्वत्र पुरन्दरस्तथा
ब्रह्मा च विष्णुश्च बभूव विस्मित ।
अन्योन्यमूचु समुपेत्य मत्पुर
धिगस्तु मन्ये च विनिर्मित मुधा ॥ २६ ॥
एव विलोक्य नगर जगदम्बिकाया
ब्रह्मेन्द्रविष्णुगिरिशा परितो भ्रमन्त ।
तस्थुश्चिर सकलविस्मृतवाञ्छितार्था
कोऽपि स्मरेन्नहि किमर्थमिहागता स्म ॥ २७ ॥

वहाँ पहुँचकर तथा चारो ओरकी शोभा देखकर इन्द्र, ब्रह्मा और विष्णु अत्यन्त चकित हुए और आपसमे कहने लगे कि हमारे लोकोको धिक्कार है, लगता हे कि इनकी रचना व्यर्थ ही हुई हे ॥ २६ ॥ ब्रह्मा, विष्णु, महेश और इन्द्र चारो ओर भ्रमण करते हुए भगवती जगदम्बिकाके उस नगरकी शोभा देखकर देरतक स्थित रहे और अपने सभी अभीष्ट उद्देश्योको भूलकर किसीको भी यह स्मरण नहीं रहा कि वे वहाँ क्यो उपस्थित हुए हैं ॥ २७ ॥

॥ इति श्रीमहाभागवते महापुराणे ब्रह्मादीना देवराजेन सह भगवतीस्थानगमने द्विषष्टितमोऽध्याय ॥ ६२ ॥

॥ इस प्रकार श्रीमहाभागवतमहापुराणके अन्तर्गत 'ब्रह्मादिका इन्द्रके साथ भगवतीस्थानगमन' नामक बासठवाँ अध्याय पूर्ण हुआ ॥ ६२ ॥

तिरसठवाँ अध्याय

ब्रह्मा, विष्णु और शिवका महाकालीके दर्शन करना, ब्रह्मा और विष्णुद्वारा भगवती महाकालीकी स्तुति, भगवतीका इन्द्रको दर्शन देना तथा इन्द्रका ब्रह्महत्याजनित पापसे मुक्त होना

श्रीमहादेव उवाच

कदाचित्तत्र योगिन्य पुष्पाहार्य समागता ।
ता उचुस्तान्महात्मान किमर्थं समुपागता ॥ १ ॥

तच्छ्रुत्वा वचन तासा स्मृत्वागमनकारणम् ।
प्रोचुर्देवीं महाकालीं स्वय द्रष्टु समागता ॥ २ ॥

योगिन्य ऊचु

यदि देवीं महाकालीं द्रष्टुमेव समागता ।
तदात्र सुचिर स्थित्वा किं निरीक्षथ सादरा ॥ ३ ॥

अहो देव्या महामाया ययेद मोह्यते जगत् ।
तयैव मोहिता यूय विस्मृता प्रकृत ध्रुवम् ॥ ४ ॥

श्रीमहादेव उवाच

इत्युक्त्वा ता ययुस्तेऽपि सर्वे ऊचु परस्परम् ।
चिरमागत्य च वय किं कुर्मो ह्यत्र सस्थिता ॥ ५ ॥

विष्णु प्राह महादेव किमेव मोह्यते त्वया ।
बहुकाल समायाता द्रष्टु कालीं महेश्वर ॥ ६ ॥

अद्यापि दृष्टा नो देवी महाकाली महेश्वरी ॥ ७ ॥

श्रीमहादेवजी बोले—कुछ समय बाद पुष्प चुननेवाली योगिनियाँ वहाँ आयीं। उन्होने उन महापुरुषोसे पूछा कि आप किस कारण यहाँ आये हें ? ॥ १ ॥ उनकी बात सुनकर उन्हें अपने आनेका कारण याद आया और उन्होंने कहा कि हम साक्षात् महाकालीके दर्शन करने आये हैं ॥ २ ॥

योगिनियाँ बोलीं—यदि आपलोग देवी महाकालीके दर्शनहेतु ही आये हें तो यहाँ खडे रहकर इतनी देरसे आदरपूर्वक क्या देख रहे हें ? ॥ ३ ॥ देवीकी महामाया आश्चर्यजनक हे, जिसने इस ससारको मोहित कर रखा है, उसीने आपलोगोको भी मोहित किया है। आप अपने वर्तमान लक्ष्यको भूल गये है ॥ ४ ॥

श्रीमहादेवजी बोले—इतना कहकर वे सभी चली गयीं और सभी देवता परस्पर कहने लगे कि इतनी देरसे यहाँ आकर हमलोग खडे-खडे क्या कर रहे हें ! ॥ ५ ॥ भगवान् विष्णुने सदाशिवसे कहा कि आपके द्वारा हमलोग इतनी देरसे क्यो मोहित किये जा रहे हैं ? महेश्वर ! हमलोग तो भगवती महाकालीके दर्शनार्थ आये हुए हैं, किंतु उन महेश्वरी देवी महाकालीके अबतक भी दर्शन नहीं हुए ॥ ६-७ ॥

श्रीशिव उवाच

अद्यैव गत्वा पश्यामो देवीं भुवनमातरम्।
प्रविशाम पुरीं देव्या शुद्धा रत्नविनिर्मिताम्॥ ८ ॥
इत्युक्तास्ते सुरश्रेष्ठा ध्यायन्तो हृदि कालिकाम्।
गन्तुमन्त पुर देव्या प्रययुर्मुनिपुङ्गव॥ ९ ॥
तत स गोपुर गत्वा महादेव सुरोत्तमान्।
उवाच ब्रह्मविष्ण्वादीन्हर्षोत्फुल्लविलोचन ॥ १० ॥
दोधूयमान पवनेन चोच्छ्रितो
विद्युत्प्रभो हेमविचित्रिताशुक ।
सिहध्वजोऽय जगदम्बिकापुर -
प्रासादशीर्षे परिदृश्यते महान्॥ ११ ॥
सर्वे परित्यज्य विमानयानक
स्थित्वा क्षितौ साम्प्रतमेव भक्तित ।
प्रणम्यता सा जगदेकवन्दिता
पुरप्रवेशाखिलविघ्नशान्तये ॥ १२ ॥
एव समाकर्ण्य शिवेन भाषित
क्षितौ तदा ते ह्यवतीर्य भक्तित ।
दृष्ट्वा ध्वज नेमुरुपद्रवान्पुर -
प्रवेशविघ्नान्ददृशु समन्तत ॥ १३ ॥
तत शम्भु पुरस्कृत्य ब्रह्मविष्णुपुरन्दरा ।
विविशुर्नगरीं देव्या रक्षिता भैरवीगणै ॥ १४ ॥
दृष्ट्वा तु नगरीं दिव्या वैकुण्ठेशोऽपि चेतसा।
निनिन्द च पुर दिव्यमात्मनो विस्मयान्वित ॥ १५ ॥
ततोऽन्त पुरवाह्ये तु ददृशुर्गणनायकम्।
चतुर्भुज महाबाहु स्थूलकाय गजाननम्॥ १६ ॥
तमाह भगवान् रुद्र प्रीत्या परमया युत ।
वत्स गत्वा महाकालीं द्रुत मे वचन वद॥ १७ ॥
ब्रह्मा विष्णु सुरेन्द्रश्च त्वा द्रष्टु भक्तिभावत ।
आयाता शम्भुमासाद्य पुरद्वारि महेश्वरि॥ १८ ॥
तै सार्धं पुरबाह्य च रुद्रश्चाप्यवतिष्ठते।
आज्ञां विधेहि तै सार्धमायातु वृषभध्वजम्॥ १९ ॥
इति श्रुत्वा वच शम्भोस्त्वरितं गणनायक ।
जगामान्त पुर देव्या कथितु शिवभाषितम्॥ २० ॥

श्रीशिवजी बोले—हमलोग आज ही चलकर जगन्माता परमेश्वरीके दर्शन करगे और जगदम्बाके रत्नजटित पवित्र लोकमे प्रवेश करेगे॥ ८॥ मुनिश्रेष्ठ! भगवान् शिवके इस प्रकार कहनेपर वे श्रेष्ठ देवगण अपने हृदयमे भगवती महाकालीका ध्यान करते हुए उनके दिव्यधामके अदर प्रवेश करनेहेतु चल पडे॥ ९॥ तब नगरद्वारपर पहुँचकर हर्षसे प्रफुल्लित नेत्रोंवाले भगवान् शिवने ब्रह्मा, विष्णु आदि उन श्रेष्ठ देवासे कहा— ॥ १० ॥ यह विद्युत्प्रभाके समान प्रभायुक्त, स्वर्णखचित वस्त्रसे बना हुआ, अत्यन्त उच्च, विशाल तथा श्रेष्ठ सिहध्वज भगवती जगदम्बिकाके प्रासादशिखरपर पवनके द्वारा लहराता हुआ दिखायी दे रहा है॥ ११ ॥ आप सब अपने विमानो और वाहनोंसे पृथ्वीपर उतरकर भक्तिपूर्वक उन जगत्पूज्या भगवतीको प्रणाम करे, जिससे इस नगरमे प्रवेश करनेमें कोई विघ्न न हो॥ १२॥

भगवान् शिवकी यह बात सुनकर उन सभीने अपने वाहनोसे धरातलपर उतरकर तथा ध्वजकी ओर देखकर भक्तिपूर्वक प्रणाम किया। उन्होने उस नगरीमें प्रवेशको वर्जित करनेवाले विघ्नोको भी चारो ओर देखा॥ १३ ॥ तब भगवान् शिवको आगे करके ब्रह्मा, विष्णु और इन्द्रने भैरवीगणोसे रक्षित जगदम्बाकी उस दिव्य नगरीमे प्रवेश किया॥ १४॥ उस दिव्य नगरीको देखकर वैकुण्ठपति भगवान् विष्णुने भी अपने मनमें विस्मित होते हुए अपने दिव्य लोककी निन्दा की॥ १५ ॥ तब अन्त पुरके द्वारपर उन्हाने महाबाहु स्थूलकाय, चतुर्भुज गणनायक गजाननको देखा। भगवान् रुद्रने उन गणनायकसे परम प्रीतिपूर्वक कहा कि वत्स! तुम शीघ्र जाकर महाकालीको [इस प्रकार] मेरा सदेश दो— ॥ १६-१७॥ 'महेश्वरी! ब्रह्मा विष्णु और इन्द्र शिवके साथ भक्तिपूर्वक आपके दर्शनकी इच्छासे नगरद्वारपर आये हैं। उनके साथ रुद्र भी पुरके बाहर खडे हैं। आप उन देवताओके साथ वृषभध्वज रुद्रको अदर आनेकी आज्ञा प्रदान करे'॥ १८-१९॥ शिवके ये वचन सुनकर गणनायक शीघ्रतापूर्वक महादेवीके अन्त पुरमे शिवजीके सदेशको बताने चले गये॥ २०॥

स प्रणम्य महादेवीं प्राञ्जलि शिवभाषितम्।
न्यवेदयद् यथावच्च महादेव्यै महामते॥ २१॥

तदाकर्ण्य जगन्माता तूर्णं त गणनायकम्।
उवाच वत्स गच्छ त्व क्षिप्र तान् देववृन्दकान्॥ २२॥

ब्रह्माण्डा बहव सन्ति ब्रह्माद्या अपि तत्रगा ।
कस्माद् ब्रह्माण्डादायाता श्रुत्वा सर्वं निवेदय॥ २३॥

श्रुत्वा स वाक्य गत्वा चापृच्छद्वै देवतागणान्।
ते ऊचुर्विस्मयाविष्टा न जानेऽन्यान् सुरेश्वरान्॥ २४॥

पुनर्गत्वाऽब्रवीत्सोऽपि तैरुक्त जगदम्बिकाम्।
उवाचानय विश्वेश विष्णु चाथ प्रजापतिम्॥ २५॥

तत स समुपागत्य शिवविष्णुप्रजापतीन्।
अन्त पुर महादेव्या प्रापयामास नारद॥ २६॥

इन्द्र स्थित पुरे बाह्ये दु खितो दीनमानस ।
अदृष्ट्वा ता परामाद्या साक्षात्प्रकृतिरूपिणीम्॥ २७॥

महेशप्रमुखास्ते तु मन्दिरद्वारमुत्तमम्।
सम्प्राप्य ददृशुर्देवीं रत्नसिंहासनोपरि॥ २८॥

प्रावासना मुक्तकेशीं भीमनेत्रत्रयोज्ज्वलाम्।
चतुर्भुजा महाघोरा कोटिसूर्यसमप्रभाम्॥ २९॥

रत्नोत्तमसमूहेन ज्वलत्कुण्डलमण्डिताम्।
अनर्घ्यानेकरत्नौघभूषिता जलदद्युतिम्॥ ३०॥

दिगम्बरीं भीमदंष्ट्रा विश्ववन्द्यैरपि स्तुताम्॥ ३१॥

सर्वान्त स्थामुत्तमस्थां मुण्डमालाविराजिनाम्।
वीजिता रत्नदण्डेन चामरेण सखीगणै॥ ३२॥

दुर्नीक्षां ते तदातीव कालानलसमप्रभाम्।
ददृशुर्वै महादेव्या महाकाल [illegible]॥ ३३॥

महामते! उन्होंने महादेवीको हाथ जोडकर प्रणाम करके भगवान् शिवका सदेश उनसे यथावत् निवेदित कर दिया॥ २१॥ यह सुनकर जगन्माताने गणनायकसे तुरत कहा—वत्स! तुम शीघ्र उन देवताओके पास जाओ और पता करके मुझे बताओ कि ये देवगण किस ब्रह्माण्डसे आये हैं, क्योंकि ब्रह्माण्ड तो अनेक हैं और वहाँ रहनेवाले ब्रह्मादि भी अनेक हैं॥ २२-२३॥ यह सुनकर गणनायकने देवगणोंके पास जाकर उनसे पूछा। इसपर वे देवगण अत्यन्त चकित होकर बोले कि हम तो किन्हीं अन्य देवेश्वरोको नहीं जानते॥ २४॥ तब गणनायकने पुन जाकर उनकी बात भगवती जगदम्बिकासे कही, उन्होंने गणनायकको ब्रह्मा, विष्णु और शिवको लानेकी आज्ञा दी॥ २५॥ नारद! तब वे गणनायक लौटकर ब्रह्मा, विष्णु और शिवको भगवतीके अन्त पुरमें ले गये॥ २६॥ इन्द्र साक्षात् प्रकृतिरूपा आद्या भगवतीके दर्शनसे वञ्चित होकर दु खी मनसे उस नगरीके बाहर ही खडे रहे॥ २७॥

महेश आदि प्रमुख देवगणोंने अन्त पुरके श्रेष्ठ द्वारपर आकर रत्नसिंहासनपर विराजमान महादेवीके दर्शन किये॥ २८॥ वे श्रेष्ठ आसनपर विराजमान थीं, उनके केशपाश खुले हुए थे, उनकी तीन भयानक तेजस्विनी आँखें थीं और वे चार भुजाओंसे सुशोभित हो रही थीं। कोटि सूर्योंके समान उनकी प्रभा थी और वे अत्यन्त भयानक थीं। उन्होंने श्रेष्ठ रत्नसमूहसे देदीप्यमान कुण्डल धारण कर रखे थे। वे अनेक बहुमूल्य रत्नोंके आभूषणोंसे सुशोभित थीं और मेघके समान कान्तिवाली थीं। विकराल दाँतोंसे युक्त वे दिगम्बर [illegible] थीं तथा विश्ववन्द्य देवता उनकी स्तुति कर रहे थे। [illegible] तथा उत्तमलोकमें [illegible] सुशोभित उन [illegible] चँवर [illegible] ॥ ३१-३२॥ [illegible] उन [illegible] और जो [illegible] थीं, उन महादेवीको [illegible] देखा॥ ३३॥

ददृशुर्भीमनेत्रास्य जटामुकुटमण्डितम्।
कपालखट्वाङ्गकर मदघूर्णितलोचनम्॥ ३४॥

शशाङ्काङ्कितमूर्धान भिन्नाञ्जननिभ प्रभुम्।
अनादिपुरुष पूर्णं जगदन्तकर परम्॥ ३५॥

कोटिसूर्यप्रतीकाश नागेन्द्रकृतभूषणम्।
द्वीपिचर्माम्बरधर चिताभस्मविभूषितम्॥ ३६॥

अथ ते दण्डवद्भूमो निपत्य जगदीश्वरीम्।
प्रणेमु परमेशान महाकाल च नारद॥ ३७॥

सस्तूय विविधै स्तोत्रैर्वेदवेदाङ्गसम्भवै ।
एतस्मिन्नन्तरे शम्भुर्महाकालेन तेन वै॥ ३८॥

एकत्वमनुसम्प्राप सहसा मुनिसत्तम।
ततो ब्रह्मा च विष्णुश्च न दृष्ट्वा त सदाशिवम्॥ ३९॥

चिन्तयामासतुस्तौ तु क्व गतोऽसौ महेश्वर ।
इन्द्रस्य दर्शन देव्या भविष्यति न वा किमु॥ ४०॥

इति चिन्तयतोर्वत्स तयो सा जगदीश्वरी।
महाकालेन सहिता त्वदृश्या समभूत्क्षणात्॥ ४१॥

तत्रैव सस्थिता काली महाकालश्च शकर ।
न तौ तन्मायया मुग्धौ ददृशाते महामुने॥ ४२॥

ततो ब्रह्मा च विष्णुश्च देव्या दर्शनकातरौ।
कृताञ्जलिपुटौ कालीं भक्त्या तुष्टुवतुर्मुने॥ ४३॥

ब्रह्मविष्णू ऊचतु

नमामि त्वा विश्वकर्त्रीं परेशीं
नित्यामाद्या सत्यविज्ञानरूपाम्।
वाचातीता निर्गुणा चातिसूक्ष्मा
ज्ञानातीता शुद्धविज्ञानगम्याम्॥ ४४॥

पूर्णां शुद्धा विश्वरूपा सुरूपा
देवीं वन्द्या विश्ववन्द्यामपि त्वाम्।
सर्वान्त स्थामुत्तमस्थानसस्था-
मीडे कालीं विश्वसम्पालयित्रीम्॥ ४५॥

मायातीता मायिनीं वापि माया
भीमा श्यामा भीमनेत्रा सुरेशीम्।
विद्या सिद्धा सर्वभूताशयस्था-
मीडे कालीं विश्वसहारकर्त्रीम्॥ ४६॥

उनके नेत्र और मुख भय उत्पन्न करनेवाले थे। वे जटामुकुटसे सुशोभित थे तथा उन्होने हाथमे कपाल और खट्वाङ्ग धारण कर रखा था एव उनकी आँख मदसे घूम रही थीं। उनके मस्तकपर अर्धचन्द्र सुशोभित था, उनकी आभा कज्जलके समान कृष्णवर्णकी थी। ऐसे अनादि पुरुष, लोकसहारक, कोटि सूर्यके समान आभासे युक्त, सर्पका आभूषण धारण किये, व्याघ्रचर्मको धारण करनेवाले और चिताभस्मसे विभूषित परमेश्वरका उन्होने दर्शन किया॥ ३४—३६॥

नारदजी। तब उन त्रिदेवोने वेदवर्णित विविध स्तोत्रोसे स्तुति करके भूमिपर दण्डवत् गिरकर जगदीश्वरी महादेवी ओर परमेश्वर महाकालको प्रणाम किया॥ ३७½॥ मुनिवर। इसी बीच शिवजी सहसा उन महाकालके साथ एकाकार हो गये। तब ब्रह्मा और विष्णुने सदाशिवको न देखकर यह विचार किया कि महेश्वर शिव कहाँ चले गये? उन्हे यह भी चिन्ता हुई कि इन्द्रको देवीके दर्शन होगे अथवा नहीं॥ ३८—४०॥ वत्स। वे दोना इस प्रकार चिन्ता कर ही रहे थे कि वे जगदीश्वरी महादेवी महाकालके साथ उसी क्षण अदृश्य हो गयीं॥ ४१॥ महामुने। यद्यपि महाकाली और महाकाल शकर वहीं उपस्थित थे, किंतु देवीकी मायासे प्रभावित ब्रह्मा और विष्णु उनको नहीं देख रहे थे॥ ४२॥ मुने। तब ब्रह्मा और विष्णु देवीके दर्शनके लिये व्याकुल होकर हाथ जोडकर भक्तिपूर्वक महाकालीकी स्तुति करने लगे—॥ ४३॥

ब्रह्मा और विष्णु बोले—सर्वसृष्टिकारिणी, परमेश्वरी, सत्यविज्ञानरूपा, नित्या, आद्याशक्ति। आपको हम प्रणाम करते हैं। आप वाणीसे परे हैं, निर्गुण और अति सूक्ष्म हैं, ज्ञानसे परे ओर शुद्ध विज्ञानसे प्राप्य हैं॥ ४४॥ आप पूर्णा, शुद्धा, विश्वरूपा, सुरूपा, वन्दनीया तथा विश्ववन्द्या हैं। आप सबके अन्त करणमे वास करती हैं एव सारे ससारका पालन करती हैं। दिव्य स्थाननिवासिनी आप भगवती महाकालीको हमारा प्रणाम है॥ ४५॥ महामायास्वरूपा आप मायामयी तथा मायासे अतीत हैं, आप भीषण, श्यामवर्णवाली, भयकर नेत्रोवाली परमेश्वरी हैं। आप सिद्धियोंसे सम्पन्न विद्यास्वरूपा, समस्त प्राणियोंके हृदयप्रदेशमें निवास करनेवाली तथा सृष्टिका सहार करनेवाली हैं, आप महाकालीको हमारा नमस्कार है॥ ४६॥

नो ते रूप वेत्ति शील न धाम
नो वा ध्यान नापि मन्त्र महेशि।
सत्तारूपे त्वा प्रपद्ये शरण्ये
विश्वाराध्ये सर्वलोकैकहेतुम्॥ ४७॥
द्यौस्ते शीर्ष नाभिदेशो नभश्च
चक्षूषि ते चन्द्रसूर्यानलास्ते।
उन्मेषास्ते सुप्रबोधो दिवा च
रात्रिर्मातश्चक्षुषोस्ते निमेषम्॥ ४८॥
वाक्य देवा भूमिरेषा नितम्ब
पादौ गुल्फ जानुजङ्घस्त्वधस्ते।
प्रीतिर्धर्मोऽधर्मकार्यं हि कोप
सृष्टिर्बोध सहृतिस्ते तु निद्रा॥ ४९॥
अग्निर्जिह्वा ब्राह्मणास्ते मुखाब्ज
सध्ये द्वे ते भ्रूयुग विश्वमूर्ति।
श्वासो वायुर्बाहवो लोकपाला
क्रीडा सृष्टि सस्थिति सहृतिस्ते॥ ५०॥
एवभूता देवि विश्वात्मिका त्वा
कालीं वन्दे ब्रह्मविद्यास्वरूपाम्।
मात पूर्णे ब्रह्मविज्ञानगम्ये
दुर्गेऽपारे साररूपे प्रसीद॥ ५१॥

श्रीमहादेव उवाच

एव ताभ्या स्तुता काली प्रसन्ना मुनिसत्तम।
महाकालेन सहिता भूय सदर्शन ददौ॥ ५२॥
भूयश्च शकरस्तस्मान्महाकालशरीरत।
नि ससार महाबाहू रजताद्रिसमप्रभ॥ ५३॥
स प्राह परमेशानीमिन्द्रोऽपि समुपागत।
त्वा द्रष्टु भक्तिभावेन पुरबाह्ये स्थितस्तु स॥ ५४॥
आज्ञापय तमानीय त्वत्समीप महेश्वरि।
दर्शयामि परामेता मूर्ति ते दिव्यलक्षणाम्॥ ५५॥
इति शम्भो समाकर्ण्य वचन जगदम्बिका।
उवाच त महादेव महाकाली महामते॥ ५६॥

देव्युवाच

यद्यानेतु महादेव देवराज ममालये।
समिच्छसि तदैतत्त्व कुरु कार्यं सुरोत्तम॥ ५७॥

महेश्वरी! हम आपके रूप, शील, दिव्य धाम, ध्यान अथवा मन्त्रको नहीं जानते। शरण्ये! विश्वाराध्ये! हम सारी सृष्टिकी कारणभूता और सत्तास्वरूपा आपकी शरणमे हैं॥ ४७॥ माता! द्युलोक आपका सिर है, नभोमण्डल आपका नाभिप्रदेश हे। चन्द्र, सूर्य और अग्नि आपके त्रिनेत्र हैं, आपका जगना ही सृष्टिके लिये दिन और जागरणका हेतु है एव आपका आँखे मूँद लेना ही सृष्टिके लिये रात्रि है॥ ४८॥ देवता आपकी वाणी हैं, यह पृथ्वी आपका नितम्बप्रदेश तथा पाताल आदि नीचेके भाग आपके जङ्घा, जानु, गुल्फ ओर चरण हैं। धर्म आपकी प्रसन्नता ओर अधर्म कार्य आपके कोपके लिये है। आपका जागरण ही इस ससारकी सृष्टि है और आपकी निद्रा ही इसका प्रलय है॥ ४९॥ अग्नि आपकी जिह्वा है, ब्राह्मण आपके मुखकमल हैं। दोनो सध्याएँ आपकी दोना भ्रुकुटियॉं हैं, आप विश्वरूपा हैं, वायु आपका श्वास है, लोकपाल आपके बाहु हैं और इस ससारकी सृष्टि, स्थिति तथा सहार आपकी लीला है॥ ५०॥ पूर्णे! ऐसी सर्वस्वरूपा आप महाकालीको हमारा प्रणाम है। आप ब्रह्मविद्यास्वरूपा हैं। ब्रह्मविज्ञानसे ही आपकी प्राप्ति सम्भव हे। सर्वसाररूपा, अनन्तस्वरूपिणी माता दुर्गे! आप हमपर प्रसन्न हो॥ ५१॥

श्रीमहादेवजी बोले—मुनिश्रेष्ठ! इस प्रकार उन दोनोके स्तुति करनेपर भगवती महाकाली प्रसन्न हुईं और उन्होने महाकालके साथ उन्हे पुन दर्शन दिया॥ ५२॥ महाबाहु भगवान् शकर भी महाकालके उस शरीरसे पुन बाहर निकलकर रजतपर्वतके समान आभासे युक्त हो सुशोभित होने लगे। उन्हाने जगदम्बासे कहा कि इन्द्र भी भक्तिभावसे आपके दर्शनहेतु आये हैं और नगरके बाहर प्रतीक्षामें खडे हैं। महेश्वरी! आप आज्ञा दे तो आपके पास लाकर आपके इस दिव्य लक्षणोसे सम्पन्न श्रेष्ठ विग्रहके उन्हे दर्शन करा दे॥ ५३—५५॥ महामते! भगवान् शकरके ये वचन सुनकर जगदम्बिका महाकालीने महादेवसे कहा—॥ ५६॥

देवी बोलीं—महादेव! यदि आप देवराज इन्द्रको मेरे दिव्य लोकमे लाना चाहते हैं तो सुरश्रेष्ठ! आप ऐसा करे॥ ५७॥

तस्य भूत महत्पाप दधीचेरस्थिसग्रहात्।
तन्नष्ट प्रायशो देव मत्पुराद्बहिरागमात्॥ ५८॥

अपर विद्यत किञ्चित्तस्योपशमनाय तु।
अन्तर्गेहरज किञ्चिद्देहि तस्मै महामते॥ ५९॥

ततो निर्धूतपाप स समायातु ममान्तिके।
सम्प्राप्स्यति च मे दृष्टि दुर्लभामपि वासव ॥ ६०॥

देव! दधीचिकी हड्डियाँ ग्रहण करनेका उसका जो [ब्रह्महत्यारूपी] महापाप था, वह तो मेरे धामके बाहर आनेसे ही प्राय नष्ट हो गया है। महामते! जो कुछ बचा है उसके शमनके लिये मेरे इस अन्तर्गृहके थोडे-से रजकण उन्हे दे द। तदनन्तर पापरहित हुआ इन्द्र जब मेरे समीप आयेगा तब मेरे दुर्लभ दर्शन उसे प्राप्त हो सकेगे॥ ५८—६०॥

श्रीमहादेव उवाच

इति काल्या समादिष्ट सोऽपि गत्वा महेश्वर ।
अन्तर्गेहरजस्तस्मै दत्त्वा पुरमवेशयत्॥ ६१॥

तत इन्द्र प्रविश्यान्तर्गेह देव्या महामुने।
प्रणम्य पादे पादे ता निपत्य धरणीतले॥ ६२॥

सम्प्राप मन्दिरद्वार शिवेन सह नारद।
दृष्ट्वा त्रैलोक्यजननीं दुर्लभा त्रिदशेश्वरै ॥ ६३॥

सहस्राक्षोऽपतद्भूमौ प्रणमद्दण्डवत्तदा।
उत्थाय वेदवेदाङ्गकथितै स्तोत्रकैरपि॥ ६४॥

तुष्टाव ता जगद्वन्द्या महाकालीं सुरोत्तम ।
तत पुनर्मुनिश्रेष्ठ प्रणिपत्य महेश्वरीम्।
स्व स्व स्थानमुपाजग्मुर्ब्रह्माद्यास्त्रिदशेश्वरा ॥ ६५॥

इत्युक्त ते मुनिश्रेष्ठ यत्पृष्ट भवता मम।
पुण्य सुमहदाख्यान महाकालीप्रदर्शनम्॥ ६६॥

य इद शृणुयाद्भक्त्या पठेद्वा प्रयतो नर ।
तस्य ना विद्यते पापमपि ब्रह्मवधादिजम्॥ ६७॥

भवत्यपि महापुण्य अश्वमेधशतोद्भवम्।
आरोग्य विपुल वित्त पुत्रपौत्रादिसम्पद ॥ ६८॥

अष्टम्या वा चतुर्दश्या नवम्या वा दिनक्षये।
य पठेत्प्रयतो भूत्वा स देव्या पदमाप्नुयात्॥ ६९॥

अमावस्यानिशीथे वा पौर्णमास्या पठेच्च य ।
गवामयुतदानस्य सम्यक् फलमवाप्नुयात्॥ ७०॥

विनश्यन्त्यापद सद्य सम्पदाशु प्रवर्तत।
न भय विद्यते नापि शत्रुतस्तस्य नारद॥ ७१॥
सग्रामे विजयो नित्य भवेद्देव्या प्रसादत ॥ ७२॥

श्रीमहादेवजी बोले—महाकालीसे इस प्रकार आदेश पाकर महेश्वर शिवने वहाँ जाकर महादवीके अन्त पुरकी रज इन्द्रको दकर उसे दिव्यलोकमे प्रवश कराया॥ ६१॥ महामुने! इन्द्रने महादेवीके अन्त पुरमें प्रवश करके पद-पदपर पृथ्वीतलपर गिरकर जगदम्बिकाके चरणामे प्रणाम किया॥ ६२॥ नारदजी! इन्द्र भगवान् सदाशिवके साथ भगवतीक भवनके द्वारपर आये और उन्हाने देवदुर्लभ त्रैलोक्यजननीको देखकर भूमिपर दण्डकी भाँति गिरकर उन्हे प्रणाम किया, तत्पश्चात् सुरश्रेष्ठ इन्द्रने उठकर वेद-शास्त्रामे वर्णित स्तोत्रोसे उन जगद्वन्द्या महाकालीका स्तवन किया। तत्पश्चात् मुनिश्रेष्ठ! महेश्वराको पुन प्रणाम करके ब्रह्मादि श्रेष्ठ देवगण अपने-अपने लोकको चले गये॥ ६३—६५॥

मुनिश्रेष्ठ! आपने मुझसे जो पूछा था वह महाकालीके दिव्य दर्शनका अत्यन्त पुण्यमय आख्यान मैंने आपसे बताया॥ ६६॥ जो मनुष्य भक्तिके साथ प्रयत्नपूर्वक इस आख्यानका पाठ अथवा श्रवण करता है उसके ब्रह्महत्याजनित पाप नहीं रहते हैं। उसे सौ अश्वमेधयज्ञोंसे होनेवाले महापुण्यकी प्राप्ति होती है तथा स्वास्थ्य, अपार सम्पत्ति और पुत्र-पौत्रादिका सुख प्राप्त होता है॥ ६७-६८॥ जो मनुष्य अष्टमी, चतुर्दशी अथवा नवमीकी रात्रिको ध्यानपूर्वक इसका पाठ करता है, वह देवीके श्रेष्ठ लोकको प्राप्त करता हे। अमावास्याकी अर्द्धरात्रिमे तथा पूर्णिमाको जो इसका पाठ करता है, उसे दस हजार गायाके दानका पूर्ण फल प्राप्त होता है। नारदजी! उसके सकट तुरत नष्ट हो जाते हैं और शीघ्र ही उसकी उन्नतिका मार्ग प्रशस्त होता है। उसे शत्रुआसे किसी प्रकारका भय नहीं रहता और जगदम्बाकी कृपासे सग्राममे उसकी सदा ही विजय होती है॥ ६९—७२॥

पितृश्राद्धदिने यस्तु पठेदेतत्समाहित ।
सतुष्टा पितरस्तस्य भुञ्जते कव्यमुत्तमम् ॥ ७३ ॥

पितरोंके श्राद्धदिवसपर जो एकाग्रचित्त होकर इसका पाठ करता है, उसके पितृगण सतुष्ट होकर श्रेष्ठ कव्यका भोग करते हैं ॥ ७३ ॥ महामुने! यदि अन्यायसे उपार्जित धनसे भी श्राद्ध किया जाता हे अथवा इस प्रकारकी अन्य कोई त्रुटि हो जाती है तो भी पितरोके लिये वह श्राद्ध परम प्रीतिदायक हो जाता है ॥ ७४ ॥

अन्यायोपात्तवित्तादिकृत वापि महामुने।
पितृणा परमप्रीतिदायक तद्भवेदिति ॥ ७४ ॥

॥ इति श्रीमहाभागवते महापुराणे श्रीभगवतीद्वारगमनादेवराजब्रह्महत्याहरणोपाख्याने त्रिषष्टितमोऽध्याय ॥ ६३ ॥

॥ इस प्रकार श्रीमहाभागवतमहापुराणके अन्तर्गत 'श्रीभगवतीद्वारगमनसे देवराजब्रह्महत्याहरणोपाख्यान' नामक तिरसठवाँ अध्याय पूर्ण हुआ ॥ ६३ ॥

चौसठवाँ अध्याय

भगवान् शकरके गायनसे विष्णुका द्रवीभूत होना, ब्रह्माजीद्वारा उस द्रवरूप गङ्गाको अपने कमण्डलुमे धारण करना, भगवती गङ्गाका द्रवमयी हो पृथ्वीपर आना

श्रीनारद उवाच

कथित महदाख्यान कृपया परमेश्वर।
धन्य पुण्यतम दिव्य महापातकनाशनम् ॥ १ ॥

यत्पृष्ट भगवत्यास्ते तत्त्वमव्यक्तमद्भुतम्।
जन्मकर्मादिक चापि नित्याया अपि लीलया ॥ २ ॥

तत्राशेनावतीर्णाया प्रकृत्या हिमवद्गृहे।
गङ्गाया श्रोतुमिच्छामि भूयश्चरितमुत्तमम् ॥ ३ ॥

यथा द्रवमयी भूता मूर्तिरेकाघहारिणी।
यथा पुनाति सा देवी त्रैलोक्य सचराचरम् ॥ ४ ॥

यथा चावातरत्पृथ्व्या लोकाना त्राणहेतवे।
एतदन्यच्च माहात्म्य विस्तरेण वद प्रभो ॥ ५ ॥

श्रीनारदजी बोले—परमेश्वर! आपने कृपापूर्वक महापापनाशक, पुण्यप्रद, धन्य करनेवाला और दिव्य आख्यान मुझे सुनाया। मैंने जैसा पूछा था—आपने भगवतीके उस अद्भुत तथा रहस्यमय तत्त्वको और उन नित्या महामायाके जन्मकर्मादिककी लीलाकथाएँ भी सुनायीं। अब आगे उन भगवती परा प्रकृतिके अशसे हिमवान्‌के घरमे उत्पन्न भगवती गङ्गाके दिव्य चरित्रको सुननेकी मेरी इच्छा है ॥ १—३ ॥ प्रभो! जिस प्रकार जगदम्बाकी वह एकमात्र पापहारिणी द्रवमयी मूर्ति उत्पन्न हुई और जिस प्रकार वे इस चराचर त्रिलोकको पवित्र करती रहती हैं और जिस प्रकार ससारके उद्धारहेतु उन्होने पृथ्वीपर अवतार लिया—यह सब तथा अन्य भी उनका माहात्म्य मुझे विस्तारसे बताइये ॥ ४-५ ॥

श्रीमहादेव उवाच

शृणु वत्स प्रवक्ष्यामि पुण्यात्पुण्यतम परम्।
यच्छ्रुत्वा मुच्यते पापी जन्मससारबन्धनात् ॥ ६ ॥

पूर्वं विष्णु समाकर्ण्य गङ्गोद्वाहमहोत्सवम्।
दिदृक्षु शकर हृष्ट गङ्गया सहित प्रभुम्।
वैकुण्ठमानयामास स्वपुरीं प्रीतमानस ॥ ७ ॥

ब्रह्माद्याश्चापि वै देवास्तत्र याता महामुने।
द्रष्टु त परमेशान विष्णु च जगत प्रभुम् ॥ ८ ॥

श्रीमहादेवजी बोले—वत्स! सुनो, मैं तुम्हे पुण्योमे भी परम श्रेष्ठ पुण्यस्वरूपिणी कथा सुनाता हूँ, जिसे सुनकर पापी मनुष्य भी जन्म-मरणवाले इस ससारके बन्धनसे मुक्त हो जाता है ॥ ६ ॥ प्राचीन कालमे गङ्गाके विवाह-महोत्सवकी बात सुनकर भगवान् विष्णुने गङ्गासहित प्रसन्न हुए भगवान् शकरको देखनेकी इच्छासे सत्कारपूर्वक उन्हे अपनी वैकुण्ठपुरीम बुलाया। महामुने! ब्रह्मादि देवगण भी परमेश्वर शिव तथा जगन्नाथ विष्णुके दर्शनकी लालसासे वहाँ पहुँचे ॥ ७-८ ॥

तत्र श्रुत्वा चापरेऽपि मरीच्याद्या महर्षयः।
विविशुश्चारु निर्माय सभां दिव्यासनोपरि॥ ९ ॥
रत्नसिंहासने रम्ये उपवेश्य महेश्वरम्।
हृष्टः प्राह जगन्नाथः कुरु गानं महेश्वर॥ १०॥
सतीवियोगदुःखार्तश्चिरं विह्वलमानसः।
स्थितोऽसि सा सतीयं त्वां पुनराप निजांशतः॥ ११॥
दृष्ट्वा त्वां सुप्रसन्नास्यं सगङ्गं हृष्टमानसम्।
सर्व एव प्रहृष्टाः स्मो वयं त्रिदशवन्दित॥ १२॥
तद्गानमतिसम्प्रीतिजनकं त्वन्मुखाच्च्युतम्।
श्रोतुमिच्छामि विश्वेश कुरु गानं महेश्वर॥ १३॥
इति तस्य वचः श्रुत्वा विष्णोरमिततेजसः।
शम्भुः सुललितं गानं चक्रेऽत्यद्भुतमुत्तमम्॥ १४॥
प्रथमं गानमाकर्ण्य ब्रह्माद्यास्त्रिदशेश्वराः।
मुमुहुः सर्वं एवातिमनोज्ञं मुनिसत्तम॥ १५॥
द्वितीयं समुपाकर्ण्य वैकुण्ठेशोऽथ नारद।
विसंज्ञः पतितो भूमौ रोमाञ्चितकलेवरः॥ १६॥
तृतीयं गानमाकर्ण्य स एव परमेश्वरः।
बभूव द्रवरूपी तु क्षणेन मुनिसत्तम॥ १७॥
विष्णौ जलमयीभूते वैकुण्ठं प्लावितं पुरम्।
बभूव व्याप्तं तोयेन सर्वतो मुनिसत्तम॥ १८॥
ततः प्राप्य प्रबोधं तु ब्रह्माद्यास्त्रिदशोत्तमाः।
ददृशुः सकलं व्याप्तं तोयेन हरिमन्दिरम्॥ १९॥
अन्यच्च जलसम्पूर्णं स्थानं तस्मिन्सुराजिरे।
दृष्ट्वा दृष्ट्वा हृषीकेशं विस्मयं परमं ययुः॥ २०॥
ब्रह्मा तदुपधार्याथ शिवगानसमुद्भवम्।
हरेर्द्रवत्वं तत्तोयं कमण्डलुमुपानयत्॥ २१॥
तत्तोयप्राप्तिमात्रेण कमण्डलुगता तु या।
गङ्गाया मूर्तिरेकासीद्द्रवरूपापरा च सा॥ २२॥
ब्रह्मा कमण्डलौ कृत्वा गङ्गां नीरमयीं मुने।
प्रययौ स्वपुरं लक्ष्मीमाश्वास्य च सरस्वतीम्॥ २३॥
शिवस्तु गङ्गया सार्धं कैलासं समुपागमत्।
गताश्चान्ये दिवं सर्वे त्रिदशा अपि नारद॥ २४॥

यह बात सुनकर मरीचि आदि दूसरे महर्षिगण भी एक सुन्दर सभाका निर्माण करके वहाँ दिव्य आसनोंपर विराजमान हो गये। एक सुन्दर रत्नसिंहासनपर महेश्वर शिवको बैठाकर प्रसन्नचित्तसे भगवान् विष्णुने निवेदन किया—महेश्वर! कोई गीत सुनाइये॥ ९-१०॥ आप दीर्घकालतक सतीके वियोगसे दुःखित और व्यग्रचित्त रहे हैं। उन सतीने अपने अंशावतारसे आपको पुनः प्राप्त कर लिया है। देववन्दित! आपको गङ्गाके साथ प्रसन्नचित्त और प्रसन्नमुख देखकर हम सब भी बड़े प्रसन्न हैं। विश्वेश! इसलिये अत्यन्त प्रीति उत्पन्न करनेवाला आपके मुखसे निकला हुआ गान हम सुनना चाहते हैं। महेश्वर! आप कृपापूर्वक गायन करें॥ ११—१३॥ अमिततेजस्वी भगवान् विष्णुके ऐसे वचन सुनकर भगवान् शंकरने अत्यन्त अद्भुत, श्रेष्ठ और मनोहर गायन प्रस्तुत किया॥ १४॥

मुनिश्रेष्ठ! अत्यन्त मनोहारी पहले गीतको सुनकर सभी ब्रह्मादि श्रेष्ठ देवगण मुग्ध हो गये। नारदजी! दूसरे गीतको सुनकर वैकुण्ठपति भगवान् विष्णुके शरीरमें रोमाञ्च हो आया और वे संज्ञाशून्य होकर पृथ्वीपर गिर पड़े। मुनिश्रेष्ठ! तीसरे गीतको सुनकर वे परमेश्वर भगवान् विष्णु क्षणभरमें द्रवीभूत हो गये। मुनिश्रेष्ठ! विष्णुके द्रवीभूत होनेसे वैकुण्ठमें बाढ़ आ गयी और चारों ओर जल व्याप्त हो गया॥ १५—१८॥ तब ब्रह्मादि श्रेष्ठ देवगणोंने सचेत होकर समस्त विष्णुधाम वैकुण्ठको जलसे व्याप्त देखा। उस लोकके अन्य सभी स्थानोंको विष्णुकी जलमयी मूर्तिसे व्याप्त देख-देखकर वे अत्यन्त विस्मित हुए॥ १९-२०॥ तदनन्तर शिवके गायनसे भगवान् विष्णुकी द्रवरूपताको जानकर ब्रह्माजीने उस जलको अपने कमण्डलुमें रख लिया। गङ्गाकी एक मूर्ति [भगवान् शिवके साथ] थी और उस कमण्डलुमें प्राप्त जलसे उनकी दूसरी द्रवमयी मूर्ति भी प्राप्त हो गयी॥ २१-२२॥ मुने! गङ्गाकी जलमयी मूर्तिको कमण्डलुमें लेकर लक्ष्मी और सरस्वतीको आश्वस्त करके ब्रह्माजी अपने धामको चले गये॥ २३॥ भगवान् शिव भी गङ्गाको साथ लेकर कैलास आ गये। नारदजी! सभी अन्य देवगण भी स्वर्गको चले गये॥ २४॥

एव द्रवमयी भूत्वा गङ्गा ब्रह्मकमण्डलौ।
सस्थिता मुनिशार्दूल देवी त्रैलोक्यपावनी॥ २५॥

इदानीं शृणु सा देवी प्राप्य विष्णुपद शुभा।
विष्णुपादोद्भवेत्याख्यामनुप्राप सुरेश्वरी॥ २६॥

तत सा प्रार्थिता पृथ्व्या यथा चावातरत्स्वयम्।
परित्राणाय लोकाना चतुर्दिक्षु चतुर्मुखी॥ २७॥

मुनिश्रेष्ठ! इस प्रकार द्रवमयी होकर त्रैलोक्यपावनी गङ्गा ब्रह्माके कमण्डलुमे स्थित हो गयीं॥ २५॥ जिस प्रकार देवी गङ्गा विष्णुपद पहुँचीं और उन सुरेश्वरीने 'विष्णुपादोद्भवा' नाम प्राप्त किया और लोकोद्धारहेतु प्रार्थना किये जानेपर उन्होने जिस प्रकार पृथ्वीपर अवतार लिया तथा जैसे चतुर्मुखी होकर सबके कल्याणके लिये चारों दिशाओमे वे बह निकलीं, अब उस आख्यानको सुनो॥ २६-२७॥

॥ इति श्रीमहाभागवते महापुराणे शिवनारदसवादे गङ्गाया द्रवरूपवर्णने चतु षष्टितमोऽध्याय ॥ ६४॥

॥ इस प्रकार श्रीमहाभागवतमहापुराणके अन्तर्गत शिव-नारद-सवादमे 'गङ्गाका द्रवरूपवर्णन' नामक चौंसठवाँ अध्याय पूर्ण हुआ॥ ६४॥

पैंसठवाँ अध्याय

भगवान् विष्णुका वामनरूपमे अवतार लेकर राजा बलिसे तीन पग भूमिका दान लेना, तीन पगोमे सम्पूर्ण ब्रह्माण्डको नापकर बलिको पाताल भेज देना

श्रीमहादेव उवाच

विरोचनसुतो राजा बलिर्दैत्यगणाधिप ।
जहार देवराजस्य त्रैलोक्य धर्मतत्पर ॥ १॥
ततोऽदितिर्देवमाता पुत्रराज्यापहारणे।
दु खिता प्रार्थयामास विष्णु त्रिजगता प्रभुम्॥ २॥
तत प्रसन्नो भगवान्प्रत्यक्ष समुपागत ।
उवाच देवमातस्त्व वृणु यत्ते समीहितम्।
दास्यामि परमप्रीत्या तपसोग्रेण तोषित ॥ ३॥

श्रीमहादेवजी बोले—विरोचनपुत्र धर्मात्मा दैत्यराज बलिने देवराज इन्द्रसे त्रैलोक्यका राज्य छीन लिया। तब देवमाता अदितिने अपने पुत्रोका राज्य छिन जानेसे दु खी होकर त्रिलोकीनाथ विष्णुकी प्रार्थना की॥ १-२॥ तब प्रसन्न होकर भगवान् विष्णुने उन्हे प्रत्यक्ष दर्शन दिये और कहा कि देवमाता! तुम यथेच्छ वरदान माँग लो, तुम्हारी उग्र तपस्यासे सन्तुष्ट हुआ मैं प्रसन्नतापूर्वक तुम्हे [वह] प्रदान करूँगा॥ ३॥

अदितिरुवाच

यदि प्रसन्नो भगवन्वर मे त्व प्रयच्छसि।
तदा बलिहत राज्यमिन्द्राय त्व समर्पय॥ ४॥

अदिति बोलीं—भगवन्! यदि आप प्रसन्न हैं और मुझे वर देना चाहते हैं तो बलिद्वारा अपहत इन्द्रका राज्य उसे लौटा दे॥ ४॥

श्रीभगवानुवाच

वैरोचनो न वध्यो मे प्रह्लादान्वयसम्भव ।
मद्भक्तो धर्मनिष्ठश्च यशस्वी लोकविश्रुत ॥ ५॥
तस्माद्वामनरूपेण सम्भूय त्वयि कश्यपात्।
याच्ञया समुपाहृत्य छलाल्लोकत्रय पुन ।
वासवाय प्रदास्यामि त्वत्पुत्रायादिते ध्रुवम्॥ ६॥

श्रीभगवान् बोले—प्रह्लादके वशमे उत्पन्न होनेके कारण विरोचनपुत्र बलि मेरे लिये अवध्य है। वह धर्मनिष्ठ, यशस्वी, लोकविख्यात और मेरा भक्त है। इसलिये देवी अदिति! महर्षि कश्यपसे आपके गर्भसे वामनरूपमें अवतरित होकर मैं छलपूर्वक भिक्षामें त्रिलोकीका राज्य लेकर तुम्हारे पुत्र इन्द्रको पुन दे दूँगा॥ ५-६॥

श्रीमहादेव उवाच

इति तस्यै वर दत्त्वा भगवान्पुरुषोत्तम ।
सहसाऽन्तर्दधे विष्णु सर्वलोकेश्वरेश्वर ॥ ७॥
अथ विष्णुर्देवमातुर्गर्भगेहमुपागमत्।
जन्मने दैत्यराजस्य राज्यापहरणेच्छया॥ ८॥

श्रीमहादेवजी बोले—इस प्रकार उसे वरदान देकर सर्वलोकाधिपति पुरुषोत्तम भगवान् विष्णु सहसा अन्तर्धान हो गये॥ ७॥ तत्पश्चात् भगवान् विष्णुने दैत्यराज बलिका राज्य अपहरण करनेकी इच्छासे जन्म लेनेके लिये देवमाता अदितिके गर्भमे प्रवेश किया॥ ८॥

सा च तं सुषुवे पुत्रं वामनं चारुरूपिणम्।
सर्वलक्षणसम्पूर्णं सुचारुमुखपङ्कजम्॥ ९ ॥
स ह्येकदा द्विजैः सार्धं द्विजरूपी जनार्दनः।
आससाद महात्मानं बलिं धर्मपरायणम्॥ १० ॥
सोऽयाचत बलिं भूमिं त्रिपादपरिसम्मिताम्।
तच्छ्रुत्वा चाह तं राजा स्वल्पं किं याचसे द्विज॥ ११ ॥
द्वीपं वा वर्षमेकं वा ग्रामं वापि तदर्धकम्।
न याचसे कथं विप्र दास्ये तुभ्यं न संशयः॥ १२ ॥
स्वल्पं दानं द्विजसुत दातुः कीर्तिविनाशकम्।
तस्मात्स्वल्पतरं दातुं न तुभ्यं रोचते मनः॥ १३ ॥

अदितिने सुन्दर रूपवाले पुत्र वामनको जन्म दिया, जो सभी शुभ लक्षणोंसे युक्त थे तथा जिनका मुखकमल अत्यन्त मनोहर था॥ ९ ॥ एक बार ब्राह्मणरूपी वे जनार्दन अन्य ब्राह्मणोंके साथ धर्मपरायण महात्मा बलिके पास आये। उन्होंने बलिसे तीन पग भूमिकी याचना की, जिसे सुनकर राजा बलिने कहा—द्विज! इतनी छोटी याचना क्यों करते हो। विप्र! कोई द्वीप, वर्ष, ग्राम अथवा आधा ग्राम ही क्यों नहीं माँग लेते! मैं निश्चय ही आपको वह समर्पित कर दूँगा। ब्राह्मणपुत्र! थोड़ा दान देनेसे दाताकी कीर्ति नष्ट होती है, इसलिये इतना स्वल्प दान आपको देनेका मन नहीं करता॥ १०—१३ ॥

श्रीवामन उवाच

किं तेन ते महाराज यन्मया काङ्क्षितं तव।
तदेव देहि नाकीर्तिस्तव तेन भविष्यति॥ १४ ॥
मह्यं त्रिपादभूदानपुण्यं कीर्तिकरं परम्।
भविष्यति महाराज यथा भूतं न भावि च॥ १५ ॥

श्रीवामन बोले—महाराज! आपको इससे क्या प्रयोजन है? मैंने जो माँगा है, वही मुझे दे दें। इससे आपका कोई अपयश नहीं होगा। महाराज! मुझे तीन पग भूमिदानका पुण्य आपके लिये अत्यन्त कीर्तिकर होगा, जैसी कीर्ति न किसीकी हुई और न भविष्यमें होगी॥ १४-१५ ॥

श्रीमहादेव उवाच

एवं वचनमाकर्ण्य वामनस्य महात्मनः।
सभ्या ऊचुर्महाराजं बलिं धर्मपरायणम्॥ १६ ॥

श्रीमहादेवजी बोले—महात्मा वामनके ऐसे वचन सुनकर सभासदोंने धर्मात्मा महाराज बलिसे कहा—॥ १६ ॥

सभ्या ऊचुः

यद्याचते द्विजसुतस्तदेव त्वं प्रयच्छ भोः।
ग्रहीतुस्तुष्टिदं दानं सफलं कीर्तिवर्धनम्॥ १७ ॥

सभासदोंने कहा—ये ब्राह्मणपुत्र जो माँगते हैं, आप वही दे दें, क्योंकि दान लेनेवालेको सन्तुष्ट करनेवाला दान ही सफल और कीर्ति बढ़ानेवाला होता है॥ १७ ॥

श्रीमहादेव उवाच

इत्याकर्ण्य वचस्तेषां राजा तस्मै द्विजातये।
त्रिपादसम्मितां भूमिं दातुं तिलकुशं दधे॥ १८ ॥
एतस्मिन्नेव काले तु दैत्यानां गुरुराह तम्।
क्षणं तिष्ठ महाराज वचनं मेऽवधारय॥ १९ ॥
नायं द्विजसुतो नूनं द्विजरूपी जनार्दनः।
मायया वामनो भूत्वा त्वदन्तिकमुपागतः॥ २० ॥
यद्याचते मुहुस्तत्र त्रिपादपरिसम्मिताम्।
भूमिं तदिन्द्रकार्यार्थं निश्चितं विद्धि भूपते॥ २१ ॥
त्वयैतस्मै यदि पुनस्त्रिपादपरिसम्मिता।
भूमिः प्रदीयते तर्हि तव लोकत्रयं ध्रुवम्।
नेष्यत्ययं चातिखर्वो दातुमिन्द्राय निश्चितम्॥ २२ ॥

श्रीमहादेवजी बोले—उनकी यह बात सुनकर राजाने उस ब्राह्मणको तीन पैरके मापकी भूमि देनेके लिये तिल और कुश हाथमें लिया॥ १८ ॥ उसी समय दैत्यगुरु शुक्राचार्यने दैत्यराज बलिसे कहा—महाराज! क्षणभर ठहरें और मेरी बात ध्यानसे सुनें! ये सामान्य ब्राह्मणपुत्र नहीं हैं। निश्चय ही ये ब्राह्मणरूपी भगवान् विष्णु हैं, जो छलसे वामनका रूप धारण करके आपके पास आये हैं। राजन्! ये बार-बार जो आपसे तीन पग परिमाणकी भूमिकी याचना कर रहे हैं, वह निश्चय ही इन्द्रका कार्य सिद्ध करनेहेतु है, ऐसा जानें। यदि आप इन्हें तीन पग परिमाणकी भूमिका दान कर देते हैं तो निश्चय ही आपका त्रिलोकीका साम्राज्य ये वामन शीघ्र इन्द्रको देनेके लिये ले जायँगे॥ १९—२२ ॥

बलिरुवाच

कुलदेवः कथं विष्णुर्मम लोकत्रयं गुरो।
सम्प्रदास्यति चेन्द्राय मत्तो नीत्वा छलेन वा॥ २३ ॥

बलि बोले—भगवान् विष्णु तो हमारे कुलदेवता हैं, गुरो! वे भला छलपूर्वक त्रिलोकीका राज्य मुझसे छीनकर इन्द्रको क्या देंगे!॥ २३ ॥

भृगुरुवाच

नासाध्य विद्यते विष्णोर्देवकार्यानुरोधिन ।
किञ्चिदत्र महाराज दारुण कर्म निश्चितम्॥ २४॥
स एव भगवान्नूनमदित्या गर्भसम्भव ।
मायया वामनो भूत्वा त्वत्तो भूमि प्रयाचते॥ २५॥
तस्माद्राजस्त्वमेतस्मै भूमि मा देहि कश्चन।
यदि त्रैलोक्यराज्य त्व समिच्छसि महामते॥ २६॥

बलिरुवाच

दास्यामीत्येवमुक्त्वाह न दास्ये वा कथ गुरो।
दास्यामि वा कथ भूमि छलग्राही ह्यय यदि॥ २७॥

श्रीमहादेव उवाच

इति राज्ञो वच श्रुत्वा शुक्रो दानवपूजित ।
मुहुस्त वारयामास भूमिदानसमुद्यतम्॥ २८॥
तच्छ्रुत्वा स तु धर्मात्मा तूष्णींभूय महामुने।
निश्चित्य चेतसा दान गुरोर्वचनमब्रवीत्॥ २९॥

बलिरुवाच

गुरो यदि स्वय विष्णुर्मायावामनरूपधृक्।
त्रैलोक्य याचते तर्हि किं मे भाग्यमत परम्॥ ३०॥
यस्य प्रीति समुद्दिश्य दान किमपि मानव ।
कुर्वन्यत्फलमाप्नोति तदनन्ततम मतम्॥ ३१॥
तस्मै वामनरूपाय विष्णवे द्विजरूपिणे।
त्रैलोक्य सम्प्रदास्यामि किं मे भाग्यमत परम्॥ ३२॥
विष्णो सम्प्रीतये कर्म न करोति विमूढधी ।
करोति यस्तु सन्क्वापि निमज्जति न वै गुरो॥ ३३॥
तस्माद्वामनरूपाय विष्णवे द्विजरूपिणे।
त्रिपादभूमि दास्यामि प्रीति तस्य समुद्दिशन्॥ ३४॥
इत्युक्त्वा स गुरु राजा विष्णो प्रीति समुद्दिशन्।
त्रिपादसम्मिता भूमि ददौ तस्मै परात्मने॥ ३५॥

भृगु बोले—महाराज! देवताओंका कार्य सम्पादन करनेमें लगे हुए विष्णुके लिये कुछ भी असाध्य नहीं है। वे कोई भी कठोर कार्य उस निमित्त कर सकते हैं। निश्चित वे भगवान् विष्णु ही अदितिके गर्भसे वामनरूपमे जन्म लेकर छलपूर्वक आपसे भूमिकी याचना कर रहे हैं। इसलिये राजन्! यदि यह त्रिलोकीका साम्राज्य आपको अपने पास रखना है तो आप इन्हें कोई भूमिदान न करे॥ २४—२६॥

बलि बोले—गुरो! 'दूँगा'—ऐसा कहकर अब भला इन्हें दान कैसे न दूँ और यदि ये छलपूर्वक दान लेने आये हैं तो इन्हें भूमि कैसे दूँ?॥ २७॥

श्रीमहादेवजी बोले—राजाकी यह बात सुनकर दानवोंसे पूजित शुक्राचार्यने भूमिदानके लिये उद्यत बलिको पुन रोका। महामुने! शुक्राचार्यकी बात सुनकर कुछ देर मौन रहकर धर्मात्मा बलिने अपने मनमे दान करनेका निश्चय किया और गुरुजीसे ऐसा कहा—॥ २८-२९॥

बलि बोले—गुरो! यदि भगवान् विष्णु स्वय छलसे वामनका रूप धारण करके मुझसे त्रिलोकीका राज्य माँगे तो इससे बडा मेरा क्या सौभाग्य होगा! जिनकी प्रसन्नताके उद्देश्यसे मनुष्य जो भी दान करता है, उसका उसे अनन्त फल प्राप्त होता है, ब्राह्मणरूपमे पधारे उन्हीं वामनरूप विष्णुको यदि मैं त्रिलोकीका दान करूँ तो यह मेरा परम सौभाग्य होगा॥ ३०—३२॥ गुरो! जो मूढमति हैं वे ही भगवान् विष्णुकी प्रीतिके लिये कर्म नहीं करते, जो उनकी प्रीतिहेतु कर्म करते हैं उनकी कभी अधोगति नहीं होती। इसलिये ब्राह्मणवेशमे आये इन वामनरूपधारी विष्णुको तीन पग भूमिका दान उनकी प्रसन्नताहेतु मैं अवश्य दूँगा॥ ३३-३४॥ गुरुजीसे इस प्रकार कहकर महाराज बलिने भगवान् विष्णुकी प्रीतिको लक्ष्य करके उन परमात्माको तीन पग भूमिका दान कर दिया॥ ३५॥

स स्वस्तीत्येवमाभाष्य वामनो मुनिसत्तम।
विश्वरूपी बभौ विष्णुस्त्रिपादो जगदीश्वर ॥ ३६ ॥
तस्यैक तु पद वत्स ब्रह्माण्ड स्फोटयत्तदा।
ऊर्ध्वं जगाम ब्रह्माण्डे तदा तस्मिन्पदाम्बुजे॥ ३७॥
कमण्डलुस्थित तत्तु तोय प्रादात्प्रजापति ।
तदा नीरमयी गङ्गा प्राप्य विष्णो पर पदम्।
तत्रैवावस्थिति चक्रे सर्वपापप्रणाशिनी॥ ३८॥
विष्णुस्तु प्राह राजान बलि धर्मपरायणम्।
सापराध इव स्पृष्ट्वा पादेनैकेन तच्छिर ॥ ३९॥
तव लोकत्रय वत्स न्यस्त तिष्ठतु साम्प्रतम्।
शक्राय तावत्पाताल व्रज त्व सह दानवै ॥ ४०॥
तवापि देवराजत्व भविष्यत्यष्टमे मनौ।
तदा लोकत्रय भूयस्त्वमाप्स्यसि न सशय ॥ ४१॥
इति विष्णोर्वच श्रुत्वा बलि सर्वासुरै सह।
पाताल प्रययो विष्णु प्रणिपत्य महामुने॥ ४२॥
वैकुण्ठे जगता नाथ प्रययो त्रिदशेश्वर ।
गङ्गा तु सस्थिता तस्य चरणे लोकपावनी॥ ४३॥

मुनिश्रेष्ठ! उन वामनरूपधारी त्रिविक्रम जगदीश्वर विष्णुने 'स्वस्ति'—ऐसा कहकर विराट् रूप धारण कर लिया॥ ३६॥ वत्स! उनका एक पैर ब्रह्माण्डका अतिक्रमण करता हुआ उसके ऊपर निकल गया। तब उस चरणकमलको प्रजापति ब्रह्माने अपने कमण्डलुमें स्थित जलसे प्रक्षालित किया। जलरूपिणी, सर्वपापनाशिनी गङ्गा भगवान् विष्णुके चरणकमलको पाकर वहीं विद्यमान हो गयीं॥ ३७-३८॥ भगवान् विष्णुने एक पैरसे उसके सिरको छूते हुए धर्मपरायण राजा बलिसे अपराधीकी भाँति ऐसा कहा—वत्स! इस समय तुम्हारा त्रिलोकीका राज्य इन्द्रके पास न्यासरूपमे रहे और तुम दानवोको साथ लेकर पाताललोकको चले जाओ। आठवे मनुके काल (मन्वन्तर)-मे तुम्हे भी इन्द्रपद मिलेगा, तब तुम त्रिलोकीका राज्य पुन प्राप्त कर लोगे, इसमे सशय नहीं है॥ ३९—४१॥

महामुने! भगवान् विष्णुके ऐसे वचन सुनकर सभी असुरोके साथ बलि उन्हे साष्टाङ्ग प्रणाम करके पाताललोकको चले गये॥ ४२॥ जगन्नाथ सुरेश्वर भगवान् विष्णु वैकुण्ठलोकको चले गये और लोकपावनी गङ्गा उनके चरणोमे स्थित हो गयीं॥ ४३॥

॥ इति श्रीमहाभागवते महापुराणे वामनावतारप्रस्तावे बलिपातालयात्राकथने पञ्चषष्टितमोऽध्याय ॥ ६५॥

॥ इस प्रकार श्रीमहाभागवतमहापुराणके अन्तर्गत वामनावतारके प्रस्तावमे 'बलिपातालयात्राकथन' नामक पैंसठवाँ अध्याय पूर्ण हुआ॥ ६५॥

छाछठवाँ अध्याय

ब्रह्माजीद्वारा भगवती गङ्गाकी प्रार्थना करना तथा गङ्गाद्वारा पुन तीनो लोकोमे आनेका आश्वासन देना, भगीरथद्वारा भगवान् विष्णु, भगवती गङ्गा और भगवान् शिवकी आराधना

श्रीमहादेव उवाच

एव हरितनु प्राप्ता ज्ञात्वा गङ्गा विधिस्तथा।
शून्य कमण्डलु चापि विलोक्य मुनिसत्तम॥ १॥
चेतसा चिन्तयामास क्षण त्रिदशवन्दित ।
इय द्रवमयी गङ्गा त्रिपु लोकेपु दुर्लभा॥ २॥
पुण्यात्पुण्यतमा धन्या स्थिता मम कमण्डलौ।
प्राप्ता हरिपदाम्भोज निश्चला समभूदियम्॥ ३॥

श्रीमहादेवजी बोले—मुनिश्रेष्ठ! देववन्दित पितामह ब्रह्माजीने भगवती गङ्गाको भगवान् विष्णुके चरणकमलमें स्थित जानकर अपने कमण्डलुको जलविहीन देखकर कुछ क्षणके लिये मनम विचार किया कि ये द्रवमयी गङ्गा तीनों लोकोमें अब दुर्लभ हो गयीं॥ १-२॥ मेरे कमण्डलुमें स्थित ये गङ्गा भगवान् विष्णुके चरणकमलको प्राप्त करके अत्यन्त पुण्यमयी और धन्य होकर वहीं स्थिर हो

नून नदी स्वय भूत्वा स्वर्ग मर्त्यं रसातलम्।
पवित्र प्रकरिष्यन्ती सिद्धसङ्गमवाप्स्यति॥ ४ ॥
तदह तपसा सद्यो देवीं गङ्गा सुरेश्वरीम्।
भूयो विष्णुपदाम्भोजाद्द्रावयिष्यामि निश्चितम्॥ ५ ॥
इति सचिन्त्य स विधिर्वैकुण्ठ समुपागत ।
गङ्गा सम्प्रार्थयामास स्थिता विष्णुतनौ मुने॥ ६ ॥
चिर प्रार्थयतस्तस्य गङ्गा त्रैलोक्यपावनी।
प्रत्यक्ष समुपागत्य वचन त्विदमब्रवीत्॥ ७ ॥

गङ्गोवाच

अह हरितनौ ब्रह्मन्स्थास्ये काल कियद्ध्रुवम्।
ततो द्रवमयी भूत्वा विष्णो पादाम्बुजात्पुन ।
नि सृत्य पावयिष्यामि लोकत्रयमसशयम्॥ ८ ॥
स्तुता भगीरथेनाह राज्ञा चामिततेजसा।
भागीरथीति विख्याता यास्येऽह धरणीतले॥ ९ ॥
उद्धृत्य तत्पितॄन्सर्वान्सिद्धसङ्गमवाप्य च।
पाताल सम्प्रविश्यामि लोकाना त्राणहेतवे॥ १०॥

ब्रह्मोवाच

अह वाप्यनुजानामि ज्ञानदृष्ट्या सुरोत्तम।
भगीरथस्य राज्ञस्त्व कीर्तिं सवर्धयिष्यसि॥ ११॥
अह चापि तदर्थं त्वा प्रार्थये शिवसुन्दरि।
यत्त्व भूयो विनि सृत्य त्रैलोक्यमधियास्यसि॥ १२॥

श्रीमहादेव उवाच

ततो गङ्गा भगवती स्वयमन्तर्दधेऽचिरात्।
ब्रह्मापि स्वपुर प्रायात् सर्वलोकपितामह ॥ १३॥
अथ विष्णुतनु प्राप्ता गङ्गा द्रवमयीं क्षितौ।
आनेतु गुरुणादिष्ट पितृच्छापप्रभावत ॥ १४॥
भस्मीभूतान्मुनीन्द्रस्य कपिलस्यातितेजस ।
उद्दिधीर्षुर्महात्मा स राजा सगरवशज ॥ १५॥
भगीरथ परात्मान विष्णु लोकेश्वरेश्वरम्।
चिरमाराधयामास यतात्मा मुनिसत्तम॥ १६॥
तत प्रसन्नो भगवान्परात्मा पुरुषोत्तम ।
प्रत्यक्ष समभूत्तस्य राज्ञ पुण्यतमात्मन ॥ १७॥

गयीं। निश्चय ही ये स्वय नदी होकर स्वर्लोक, मृत्युलोक तथा पातालल्लोकको पवित्र करती हुई सिद्धजनोंके सानिध्यको प्राप्त करेगी। इसलिये मैं शीघ्र ही तपके द्वारा सुरेश्वरी देवी गङ्गाको पुन भगवान् विष्णुके चरणकमलसे निश्चय ही द्रवित करूँगा॥ ३—५॥ मुने! ऐसा विचार कर ब्रह्मा भी वैकुण्ठलोक आये और भगवान् विष्णुके चरणकमलमे स्थित गङ्गाकी प्रार्थना करने लगे। उनके चिरकालतक प्रार्थना करनेपर त्रैलोक्यपावनी गङ्गाने प्रत्यक्ष होकर इस प्रकार कहा—॥ ६-७॥

गङ्गाजी बोलीं—ब्रह्मन्! मैं कुछ समयतक निश्चितरूपसे भगवान् विष्णुके श्रीविग्रहमे निवास करूँगी, उसके बाद भगवान् विष्णुके चरणकमलोसे निकलकर द्रवमयी होकर पुन तीनो लोकोको पवित्र करूँगी, इसमे किसी प्रकारका सदेह नहीं है॥ ८॥ अमित तेजस्वी राजा भगीरथके द्वारा स्तुति करनेपर 'भागीरथी' के नामसे विख्यात होकर मैं पृथ्वीलोकम जाऊँगी तथा उनके सम्पूर्ण पूर्वजोका उद्धार कर और सिद्धजनोके सानिध्यको प्राप्त करनेके उपरान्त त्रिलोकीकी रक्षाके लिये पातालल्लोकमे प्रवेश करूँगी॥ ९-१०॥

ब्रह्माजी बोले—सुरोत्तमे! मैं भी अपनी ज्ञानदृष्टिसे यह जानता हूँ कि आप राजा भगीरथकी कीर्तिको बढायेगी। शिवसुन्दरी! मै भी इसीलिये आपसे प्रार्थना करता हूँ कि आप भगवान् विष्णुके चरणकमलोसे निकलकर पुन त्रिलोकीमे विराजमान हो॥ ११-१२॥

श्रीमहादेवजी बोले—तब भगवती गङ्गा शीघ्र ही अन्तर्धान हो गयीं तथा लोकपितामह ब्रह्माजी भी अपने ब्रह्मलोकको प्रस्थान कर गये॥ १३॥ मुनिश्रेष्ठ! अतितेजस्वी मुनिवर कपिलक शापसे भस्मीभूत अपने पितराका उद्धार करनेकी इच्छासे गुरु वसिष्ठके द्वारा आदिष्ट होकर सगरके वशज जितेन्द्रिय राजा भगीरथने विष्णुपदको प्राप्त द्रवमयी गङ्गाको पृथ्वीपर लानेके लिये लोकनाथाधिपति परमात्मा भगवान् विष्णुकी चिरकालपर्यन्त आराधना की॥ १४—१६॥ तब परमात्मा भगवान् पुरुषोत्तम प्रसन्न होकर अत्यन्त पुण्यात्मा राजा भगीरथके स॰ प्रकट हो गये॥ १७॥

तं दृष्ट्वा जगतां नाथं शङ्खचक्रगदाधरम्।
पीताम्बरं सुपर्णस्थं वनमालाविराजितम्॥ १८॥
प्रणम्य दण्डवद्भूमौ स्तोत्रमाह महीपतिः॥ १९॥

भगीरथ उवाच

त्रैलोक्यपावन जगत्परिवन्द्यपाद
विश्वेश विश्वप महापुरुषप्रधान।
नारायणाच्युत हरे मधुकैटभारे
विष्णो प्रसीद परमेश्वर ते नमोऽस्तु॥ २०॥
विश्वैककारण पुराण जगन्निधान
श्रीवत्सलाञ्छन विभो मधुसूदनाख्य।
गोविन्द वामन जनार्दन विश्वमूर्ते
विष्णो प्रसीद परमेश्वर ते नमोऽस्तु॥ २१॥
अत्यन्तविक्रम जगन्मय वासुदेव
दैत्यान्तकान्तक भयान्तक कान्त पूर्ण।
वैकुण्ठ माधव धराधर चारुरूप
विष्णो प्रसीद परमेश्वर ते नमोऽस्तु॥ २२॥
लक्ष्मीपतेऽमरपते जगदेकनाथ
मायाश्रयैक करुणामय केशवेश।
आनन्दसान्द्र कमलक्षण शुद्धबोध
वाणीपतेऽखिलपते सततं नतोऽस्मि॥ २३॥
नमस्ते विश्वरूपाय विष्णवेऽमिततेजसे।
सच्चिदानन्दरूपाय शुद्धज्ञानात्मने नमः॥ २४॥
अद्य मे सफलं जन्म अद्य मे सफलं तपः।
यत्त्वां पश्यामि नेत्राभ्यां देवैरपि सुदुर्लभम्॥ २५॥

श्रीमहादेव उवाच

इत्यादिस्तुतिवाक्यैस्तु स स्तुतो जगदीश्वरः।
उवाच नृपशार्दूलं भगीरथमरिन्दमम्॥ २६॥

श्रीभगवानुवाच

किं तेऽभिलषितं राजन्वर तद्वरयाधुना।
प्रीत्याहं सम्प्रदास्यामि तव भावेन निश्चितम्॥ २७॥

भगीरथ उवाच

पितरो ब्रह्मशापेन भस्मीभूय मम प्रभो।
अधोगतिमनुप्राप्तास्तेषां निष्कृतिकारणात्॥ २८॥
गङ्गां द्रवमयीं नेतुं क्षित्यामिच्छामि पावनीम्॥ २९॥

गरुडपर विराजमान, वनमालासे विभूषित, पीताम्बरधारी, हाथमें शङ्ख, चक्र और गदाको धारण किये हुए उन जगन्नाथ विष्णुभगवान्‌को देखकर एवं साष्टाङ्ग प्रणाम कर राजा भगीरथने इस प्रकार उनकी स्तुति की— ॥ १८-१९॥

भगीरथ बोले—तीनों लोकोंको पवित्र करनेवाले, जगत्‌के द्वारा वन्दित चरणवाले, विश्वके पालनहार, महापुरुषोंमें श्रेष्ठ, विश्वेश, नारायण, अच्युत, हरि, मधुकैटभके शत्रु विष्णो! आप हमपर प्रसन्न हों, परमेश्वर! आपको नमस्कार है॥ २०॥ विश्वके एकमात्र कारण, सनातन, जगदाधार, श्रीवत्सके चिह्नसे सुशोभित, विभो, मधुसूदन, गोविन्द, वामन, जनार्दन, विश्वमूर्ति, विष्णो! आप हमपर प्रसन्न हों, परमेश्वर! आपको नमस्कार है॥ २१॥ वासुदेव! आप अत्यन्त पराक्रमी, विश्वरूप, दैत्योंका नाश करनेवाले, यमस्वरूप, भयको दूर करनेवाले हैं। कान्तिमय, पूर्णस्वरूप, वैकुण्ठ, माधव, पृथ्वीको धारण करनेवाले, सुन्दरस्वरूपवाले विष्णो! आप हमपर प्रसन्न हों, परमेश्वर! आपको नमस्कार है॥ २२॥ लक्ष्मीकान्त, सुरश्रेष्ठ, विश्वके एकमात्र स्वामी, मायाके एकमात्र आश्रय, करुणामय, केशव, ईश, घनानन्दस्वरूप, कमलनयन, शुद्ध ज्ञानस्वरूप, वाणीके स्वामी तथा सम्पूर्ण विश्वके स्वामीको मैं निरन्तर नमस्कार करता हूँ॥ २३॥ अत्यन्त तेजस्वरूप, विश्वरूप विष्णुको नमस्कार है, शुद्ध ज्ञानात्मा सच्चिदानन्दस्वरूपको नमस्कार है। आज मेरा जन्म और तप दोनों सफल हुआ, क्योंकि देवताओंके लिये भी दुर्लभ आपको मैं अपने नेत्रोंसे देख रहा हूँ॥ २४-२५॥

श्रीमहादेवजी बोले—इन स्तुतिवाक्योंसे स्तवन किये जानेपर भगवान् विष्णुने शत्रुसूदन नृपश्रेष्ठ भगीरथसे कहा— ॥ २६॥

श्रीभगवान् बोले—राजन्! आपका क्या अभीष्ट है, उसे अब माँग लीजिये, आपकी भक्तिसे प्रसन्न मैं उसे निश्चितरूपसे प्रदान करूँगा॥ २७॥

भगीरथ बोले—प्रभो! मेरे पूर्वज ब्रह्मशापसे भस्मीभूत होकर अधोगतिको प्राप्त हो गये हैं, उनके उद्धारके लिये मैं द्रवमयी पवित्र गङ्गाको पृथ्वीपर ले जाना चाहता हूँ॥ २८-२९॥

सा ते तनुमनुप्राप्य स्थिता त्रैलोक्यपावनी।
कमण्डलुकृतावासा ब्रह्मण परमात्मन ॥ ३० ॥
ता त्व ददासि चेद्गङ्गा स्वशरीरकृतालयाम्।
तदा मे पितर सर्वे प्रयान्ति परम पदम्॥ ३१ ॥
एतदेव जगन्नाथ वाञ्छित विद्यते मम।
त्वत्त सर्वात्मना देव प्रणताना कृपाकर॥ ३२ ॥

श्रीभगवानुवाच

वत्स क्षितितल गत्वा गङ्गा द्रवमयी स्वयम्।
मच्छरीराद्विनि सृत्योद्धरिष्यति पितृस्तव॥ ३३ ॥
त्व तु ता परमाराध्या देवानामपि दुर्लभाम्।
सम्प्रार्थय महाराज तथा शम्भु जगत्पतिम्।
तत सम्पत्स्यतेऽभीष्ट सर्वमेव भगीरथ॥ ३४ ॥

श्रीमहादेव उवाच

इति तस्मै वर दत्त्वा भगवान्पुरुषोत्तम ।
अन्तर्दधे मुनिश्रेष्ठ राज्ञस्तस्य समीपत ॥ ३५ ॥
स तु गत्वा महाराजो हिमाद्रेरुत्तर शिर ।
गङ्गामाराधयामास यतात्मा मुनिसत्तम॥ ३६ ॥
गते तु बहुसाहस्त्रे वर्षे तस्य तपस्यत ।
प्रसन्ना समभूद्गङ्गा शिवशक्ति स्मितानना॥ ३७ ॥
सा प्रत्यक्षमनुप्राप्य राजान यतमानसम्।
उवाच राजन्वृणु त यत्तेऽभिलषित वरम्॥ ३८ ॥

भगीरथ उवाच

मातस्त्व सुप्रसन्ना मे यदि त्व शिवसुन्दरी।
तदा हरिपदाम्भोजान्नि सृत्यैहि धरातले॥ ३९ ॥

पवित्रा धरणीं कृत्वा प्रविश्य विवरस्थलम्।
उद्धारय पितृन्पूर्वान्मुनिना भस्मसात्कृतान्॥ ४० ॥
पितृणा यदि निस्तार करोषि त्रिदशस्तुते।
तदाह कृतकृत्य स्यामेतन्मे वाञ्छित शिवम्॥ ४१ ॥

परमेश्वर ब्रह्माके कमण्डलुमे निवास करनेवाली वे त्रैलोक्यपावनी गङ्गा आपके श्रीविग्रहको प्राप्त होकर स्थित हो गयी हैं। आप अपने शरीरमे स्थित उन गङ्गाको यदि प्रदान कर देगे तो मेरे सभी पूर्वज परमपदको प्राप्त हो जायँगे। भक्तोपर सब प्रकारसे कृपा करनेवाले देव! जगन्नाथ! आपसे यही मेरी अभिलाषा है॥ ३०—३२ ॥

श्रीभगवान् बोले—वत्स! ये द्रवमयी गङ्गा मेरे शरीरसे निकलकर स्वय पृथ्वीपर जाकर आपके पूर्वजोका उद्धार करेगी। महाराज भगीरथ! आप उन परमाराध्या, देवताओके लिये भी दुर्लभ गङ्गा तथा भगवान् विश्वनाथकी प्रार्थना करे। तब आपका सारा अभीष्ट सिद्ध हो जायगा॥ ३३-३४ ॥

श्रीमहादेवजी बोले—मुनिश्रेष्ठ! इस प्रकार भगवान् पुरुषोत्तम राजा भगीरथको वर प्रदान कर वहाँसे अन्तधान हो गये॥ ३५ ॥ मुनिसत्तम! वे सयतेन्द्रिय महाराज भगीरथ हिमालयके उत्तरी शिखरपर जाकर भगवती गङ्गाकी आराधना करने लगे। उनके हजारो वर्ष तपस्या करनेपर स्मितमुखी शिवशक्ति-स्वरूपिणी भगवती गङ्गा प्रसन्न हो गयीं। भगवती गङ्गाने सयतेन्द्रिय राजाके समक्ष प्रकट होकर कहा राजन्! आपका जो अभिलषित वर हो उसे माँग लीजिये॥ ३६—३८ ॥

भगीरथ बोले—माता, शिवसुन्दरी! यदि आप मुझपर प्रसन्न हैं तो भगवान् विष्णुके चरणकमलसे निकलकर पृथ्वीतलपर चले और पृथ्वीको पवित्र करके विवरमें प्रविष्ट होकर मुनिके द्वारा भस्मसात् किये गये मेरे पूर्वजोका उद्धार करे। देवताओंकी वन्दनीया! यदि आप मेरे पूर्वजोका उद्धार कर दें तो मैं कृतार्थ हो जाऊँगा, यही मेरी मङ्गलमयी अभिलाषा है॥ ३९—४१ ॥

गङ्गोवाच

एवमस्तु महाराज विष्णुपादाम्बुजादहम्।
विनिःसृत्योद्धरिष्यामि तव पूर्वतमान्पितॄन्॥ ४२॥
त्वत्तः सम्प्रार्थिता यस्माद्भूत्वा विष्णुपदाम्बुजात्।
क्षिताववतरिष्यामि तस्मात्कन्या भवाम्यहम्॥ ४३॥
तेन भागीरथीत्याख्या लोके मे सम्भविष्यति।
त्वया तु जगतां नाथः शम्भुर्गत्वा प्रसाद्यताम्॥ ४४॥
स मे प्रियतमो भर्ता तस्याहं वशवर्तिनी।
तेन गन्तुं न शक्नोमि विना तस्याज्ञया प्रभो॥ ४५॥
तस्मात्प्रसन्नतां याते शंकरे त्वयि भूपते।
मेरुशृङ्गं समारुह्य शङ्खं जलदनिःस्वनम्॥ ४६॥
सन्ध्मास्यसि यदा राजस्तदा विष्णुपदाम्बुजात्।
विनिःसृत्य विनिर्भिद्य ब्रह्माण्डमतिवेगिता।
त्वदानुगा वसुमतीं यास्यामि जलरूपिणी॥ ४७॥
उद्धृत्य त्वत्पितॄन्सर्वान्विवरं समुपेत्य च।
पातालमनुयास्यामि तव कीर्तिविवर्धिनी॥ ४८॥

श्रीमहादेव उवाच

इत्युक्त्वा सा भगवती गङ्गा शंकरगेहिनी।
पश्यतो नृपतेस्तस्य क्षणादन्तरधीयत॥ ४९॥
भगीरथश्च भूपालो पितॄणां कीर्तिवर्धनः।
कृतकृत्यमिवात्मानं मेने गङ्गाभिदर्शनात्॥ ५०॥
गत्वा गङ्गाज्ञया राजा धर्मात्माऽसौ भगीरथः।
महेशं प्रार्थयामास तस्मिन्नेव नगोत्तमे॥ ५१॥
निराहारी शताब्दं तु नियतात्मा महामते।
ततः प्रसन्नो देवेशः शंकरः प्रभुरव्ययः।
प्रत्यक्षं समभूत्तस्य पञ्चास्यो वृषभध्वजः॥ ५२॥
तं वीक्ष्य रजताभासं पञ्चास्यं शूलधारिणम्।
व्याघ्राजिनपरीधानं जटामण्डितमस्तकम्॥ ५३॥
विभूतिलिप्तसर्वाङ्गं नीलकण्ठं स्मिताननम्।
नागेन्द्रभूषितं चारुचन्द्रार्धकृतशेखरम्॥ ५४॥
दण्डवत्पतितो राजा नाम्नामष्टसहस्रकैः।
तुष्टाव देवदेवेशं पूर्णं सर्वसुरोत्तमम्॥ ५५॥

गङ्गाजी बोलीं—महाराज! 'ऐसा ही होगा'। मैं भगवान् विष्णुके चरणकमलसे निकलकर आपके सभी पूर्वजोंका उद्धार करूँगी॥ ४२॥ आपसे प्रार्थित होकर मैं भगवान् विष्णुके चरणकमलसे निकलकर पृथ्वीपर अवतरित होऊँगी। इसीलिये आपकी कन्या होऊँगी और इस संसारमें 'भागीरथी' इस नामसे प्रसिद्ध होऊँगी, आप जाकर विश्वनाथ भगवान् शंकरको प्रसन्न करें। प्रभो! वे मेरे प्रियतम पति हैं तथा मैं उनकी वशवर्तिनी हूँ, इसलिये मैं उनकी आज्ञाके बिना नहीं जा सकती॥ ४३—४५॥ भूपते! आपपर भगवान् शिवके प्रसन्न हो जानेसे मेरु शिखरपर चढ़कर जब आप मेघगर्जनके समान शङ्खध्वनि करेंगे, राजन्! तब भगवान् विष्णुके चरणकमलसे निकलकर ब्रह्माण्डको अत्यन्त वेगपूर्वक विदीर्ण करके जलरूपमें मैं आपके पीछे-पीछे पृथ्वीपर जाऊँगी और विवरमें प्रविष्ट होकर आपके सभी पूर्वजोंका उद्धार करके आपकी कीर्तिको बढ़ानेवाली मैं पातालमें चली जाऊँगी॥ ४६—४८॥

श्रीमहादेवजी बोले—ऐसा कहकर वे शंकरप्रिया भगवती गङ्गा राजा भगीरथके देखते-ही-देखते क्षणभरमें अन्तर्धान हो गयीं और अपने पूर्वजोंकी कीर्तिको बढ़ानेवाले राजा भगीरथ भगवती गङ्गाके दर्शनसे अपनेको कृतार्थ मानने लगे॥ ४९-५०॥ महामते! धर्मात्मा राजा भगीरथने भगवती गङ्गाकी आज्ञासे उसी श्रेष्ठ कैलासपर्वतपर जाकर जितेन्द्रिय तथा निराहार रहते हुए सौ वर्षोंतक भगवान् शंकरकी प्रार्थना की। तब देवेश्वर, अविनाशी, पञ्चानन, वृषभध्वज भगवान् शंकरने प्रसन्न होकर उन्हें प्रत्यक्ष दर्शन दिये॥ ५१-५२॥ रजतकी तरह कान्तिवाले, पञ्चानन शूलधारी, व्याघ्रचर्म धारण किये हुए, जटासे विभूषित मस्तकवाले समस्त शरीरमें विभूति धारण किये हुए, स्मितवदन नीलकण्ठ, भुजङ्गभूषण, शिरोभूषणके रूपमें सुन्दर अर्धचन्द्रको धारण किये हुए भगवान् शंकरको देखकर राजा भगीरथ साष्टाङ्ग प्रणाम करके एक हजार आठ नामोंसे उन देवदेवेश पूर्णब्रह्म सर्वसुरोत्तमकी स्तुति करने लगे॥ ५३—५५॥

॥ इति श्रीमहाभागवते महापुराणे भगीरथगङ्गासंवादे श्रीशिवदर्शनप्राप्तिर्नाम षट्षष्टितमोऽध्यायः ॥ ६६॥

॥ इस प्रकार श्रीमहाभागवतमहापुराणके अन्तर्गत भगीरथ-गङ्गा-संवादमें 'श्रीशिवदर्शनप्राप्ति' नामक छाछठवाँ अध्याय पूर्ण हुआ॥ ६६॥

सड़सठवाँ अध्याय

भगीरथद्वारा अनेक नामोसे भगवान् शिवका स्तवन तथा मनोभिलषित वरकी प्राप्ति, शिवसहस्रनामस्तोत्रपाठका माहात्म्य

भगीरथ उवाच

ॐ नमस्ते पार्वतीनाथ देवदेव परात्पर।
अच्युतानघ पञ्चास्य भीमास्य रुचिरानन॥ १ ॥
व्याघ्राजिनधरानन्त पारावारविवर्जित।
पञ्चानन महासत्त्व महाज्ञानमय प्रभो॥ २ ॥
अजितामितदुर्धर्ष विश्वेश परमेश्वर।
विश्वात्मन्विश्वभूतेश विश्वाश्रय जगत्पते॥ ३ ॥
विश्वोपकारिन्विश्वैकधाम विश्वाश्रयाश्रय।
विश्वाधार सदानन्द विश्वानन्द नमोऽस्तु ते॥ ४ ॥
शर्व सर्वविदज्ञानविवर्जित सुरोत्तम।
सुरवन्द्य सुरस्तुत्य सुरराज सुरोत्तम॥ ५ ॥
सुरपूज्य सुरध्येय सुरेश्वर सुरान्तक।
सुरारिमर्दक सुरश्रेष्ठ तेऽस्तु नमो नम ॥ ६ ॥
त्व शुद्ध शुद्धबोधश्च शुद्धात्मा जगता पति ।
शम्भु स्वयंभूरत्युग्र उग्रकर्मोग्रलोचन॥ ७ ॥
उग्रप्रभावश्चात्युग्रमर्दकोत्युग्ररूपवान् ।
उग्रकण्ठ शिव शान्त सर्वशान्तिविधायक ॥ ८ ॥
सर्वार्थद शिवाधार शिवाय निरमित्रजित्।
शिवद शिवकर्ता च शिवहन्ता शिवेश्वर ॥ ९ ॥
शिशुशैशवयुक्तश्च पिङ्गकेशो जटाधर ।
गङ्गाधरकपर्दी च जटाजूटविराजित ॥ १० ॥
जटिलो जटिलाराध्य सर्वदोन्मत्तमानस ।
उन्मत्तकेश उन्मत्त उन्मत्तानामधीश्वर ॥ ११ ॥
उन्मत्तलोचनो भीमस्त्रिनेत्रो भीमलोचन ।
बहुनेत्रो द्विनेत्री च रक्तनेत्र सुनेत्रक॥ १२ ॥
दीर्घनेत्रश्च पिङ्गाक्ष सुप्रभाक्ष्य सुलोचन ।
सामनेत्रोऽग्निनेत्राख्य सूर्यनेत्र सुवीर्यवान्॥ १३ ॥
पद्माक्ष कमलाक्षश्च नीलोत्पलदलेक्षण ।
सुलक्षण शूलपाणि कपाली कपिलेक्षण ॥ १४ ॥
व्याघूर्णनयनो धूतो व्याघ्रचर्माम्बरावृत ।
श्रीकण्ठो नीलकण्ठाख्य शितिकण्ठ सुकण्ठक ॥ १५ ॥
चन्द्रचूडश्चन्द्रधरश्चन्द्रमौलि शशाङ्कभृत्।
शशिकान्त शशाङ्काभ शशाङ्काङ्कितमूर्धज ॥ १६ ॥
शशाङ्कवदनो वीरो वरदा वरलोचन ।
शरच्चन्द्रसमाभास शरदिन्दुसमप्रभ ॥ १७ ॥
कोटिसूर्यप्रतीकाशश्चन्द्रास्यश्चन्द्रशेखर ।
अष्टमूर्तिर्महामूर्तिर्भीममूर्तिर्भयानक ॥ १८ ॥

भगीरथ बोले—पार्वतीनाथ, देवदेव, परात्पर, अच्युत, अनघ, पञ्चास्य, भीमास्य, रुचिरानन, ओङ्कारस्वरूप आपको नमस्कार है। व्याघ्राजिनधर, अनन्त, पारावारविवर्जित, पञ्चानन, महासत्त्व, महाज्ञानमय, प्रभु अजित, अमित, दुर्धर्ष, विश्वेश, परमेश्वर, विश्वात्मा, विश्व, भूतेश, विश्वाश्रय, जगत्पति, विश्वोपकारी, विश्वैकधाम, विश्वाश्रयाश्रय, विश्वाधार, सदानन्द, विश्वानन्द आपको नमस्कार है। शर्व, सर्वविद्, अज्ञानविवर्जित, सुरोत्तम, सुरवन्द्य, सुरस्तुत्य, सुरराज, सुरोत्तम॥ १—५॥ सुरपूज्य, सुरध्येय, सुरेश्वर, सुरान्तक, सुरारिमर्दक, सुरश्रेष्ठ आपको बार-बार नमस्कार हे। आप शुद्ध, शुद्धबोध, शुद्धात्मा, जगता पति, शम्भु, स्वयभू, अत्युग्र, उग्रकर्मा, उग्रलोचन हैं। उग्रप्रभाव, अत्युग्रमर्दक, अत्युग्ररूपवान्, उग्रकण्ठ, शिव, शान्त, सर्वशान्तिविधायक, सर्वार्थद, शिवाधार, निरमित्रजित्, शिवद, शिवकर्ता, शिवहन्ता, शिवेश्वर आप शिवको नमस्कार है। शिशु, शैशवयुक्त, पिङ्गकेश, जटाधर, गङ्गाधर, कपर्दी, जटाजूटविराजित॥ ६—१०॥ जटिल, जटिलाराध्य, सर्वद, उन्मत्तमानस, उन्मत्तकेश, उन्मत्त, उन्मत्तानामधीश्वर, उन्मत्त-लोचन, भीम, त्रिनेत्र भीमलोचन, बहुनेत्र, द्विनेत्री, रक्तनेत्र, सुनेत्रक, दीर्घनेत्र, पिङ्गाक्ष, सुप्रभाक्ष्य, सुलोचन, सोमनेत्र, अग्निनेत्राख्य, सूर्यनेत्र, सुवीर्यवान्, पद्माक्ष, कमलाक्ष, नीलोत्पलदलेक्षण, सुलक्षण, शूलपाणि, कपाली, कपिलेक्षण, व्याघूर्णनयन, धूत, व्याघ्रचर्माम्बरावृत, श्रीकण्ठ, नीलकण्ठ, शितिकण्ठ सुकण्ठक॥ ११—१५॥ चन्द्रचूड चन्द्रधर, चन्द्रमौलि, शशाङ्कभृत्, शशिकान्त, शशाङ्काभ, शशाङ्काङ्कित-मूर्धज, शशाङ्कवदन, वीर वरद, वरलाचन, शरच्चन्द्र-समाभास, शरदिन्दुसमप्रभ, कोटिसूर्यप्रतीकाश, चन्द्रास्य, चन्द्रशेखर, अष्टमूर्ति महामूर्ति भीममूर्ति, भयानक,

भयदाता भयत्राता भयहर्तृभयोज्झित ।
निर्भूतो भूतवन्द्यश्च भूतात्मा भूतभावन ॥ १९ ॥

कौपीनवासा दुर्वासा विवासा कामिनीपति ।
कराल कीर्तिदो वैद्य किशोर कामनाशन ॥ २० ॥

कीर्तिरूप कुन्तधारी कालकूटकृताशन ।
कालकूटसुरूपी च कुलमन्त्रप्रदीपक ॥ २१ ॥

कलाकाष्ठात्मक काशीविहारी कुटिलानन ।
महाकाननसवासी कालीप्रीतिविवर्धन ॥ २२ ॥

कालीधर कामचारिन्कुलकीर्तिविवर्धन ।
कामाद्रि कामुकवर कार्मुकी काममोहित ॥ २३ ॥

कटाक्ष कनकाभास कनकोज्ज्वलगात्रक ।
कामातुर क्कणत्पाद कुटिलभ्रुकुटीधर ॥ २४ ॥

कार्तिकेयपिता कोकनदभूषणभूषित ।
खट्वाङ्गयोद्धा खड्गी च गिरीशो गगनेश्वर ॥ २५ ॥

गणाध्यक्ष खेटकधृक् खर्व खर्वतर खग ।
खगारूढ खगाराध्य खेचर खेचरेश्वर ॥ २६ ॥

खेचरत्वप्रद क्षोणीपति खेचरमर्दक ।
गणेश्वरो गणपिता गरिष्ठो गणभूपति ॥ २७ ॥

गुरुर्गुरुतरो ज्ञेयो गङ्गापतिरमर्षण ।
गीतप्रियो गीतरत सुगोप्यो गोपवृन्दप ॥ २८ ॥

गवारूढो जगद्धर्ता गोस्वामी गोस्वरूपक ।
गोप्रदो गोधरो गृध्रो गरुत्मान् गोकृतासन ॥ २९ ॥

गोपीशो गुरुतातश्च गुहावासी सुगोपित ।
गजारूढो गजास्यश्च गजाजिनधरोऽग्रज ॥ ३० ॥

ग्रहाध्यक्षो ग्रहगणो दुष्टग्रहविमर्दक ।
गानरूपी गानरत प्रचण्डो गानविह्वल ॥ ३१ ॥

गानमत्तो गुणी गुह्यो गुणग्रामाशयो गुण ।
गूढबुद्धिर्गूढमूर्तिर्गूढपादविभूषित ॥ ३२ ॥

गोप्ता गोलोकवासी च गुणवान्गुणिना वर ।
हरो हरितवर्णाक्षो मृत्युर्मृत्युञ्जयो हरि ॥ ३३ ॥

हव्यभुग्हरिसम्पूज्यो हविर्हविर्भुजा वर ।
अनादिरादि सर्वाद्य आदितेयवरप्रद ॥ ३४ ॥

अनन्तविक्रमो लोके लोकाना पापहारक ।
गीष्पति सद्गुणोपेत सगुणो निर्गुणो गुणी ॥ ३५ ॥

भयदाता, भयत्राता, भयहर्ता, भयोज्झित, निर्भूत, भूतवन्द्य, भूतात्मा, भूतभावन, कोपीनवासा, दुर्वासा, विवासा, कामिनीपति, कराल, कीर्तिद, वैद्य, किशोर, कामनाशन ॥ १६—२० ॥

कीर्तिरूप, कुन्तधारी, कालकूटकृताशन, कालकूट सुरूपी, कुलमन्त्रप्रदीपक, कलाकाष्ठात्मक, काशीविहारी, कुटिलानन, महाकाननसवासी, कालीप्रीतिविवर्धन, कालीधर, कामचारी, कुलकीर्तिविवर्धन, कामाद्रि, कामुकवर, कार्मुकी, काममोहित, कटाक्ष, कनकाभास, कनकोज्ज्वलगात्रक, कामातुर, क्कणत्पाद, कुटिलभ्रुकुटीधर, कार्तिकेयपिता, कोकनदभूषणभूषित, खट्वाङ्गयोद्धा, खड्गी, गिरीश, गगनेश्वर ॥ २१—२५ ॥ गणाध्यक्ष, खेटकधृक्, खर्व, खर्व-तर, खग, खगारूढ, खगाराध्य, खेचर, खेचरेश्वर, खेच-रत्वप्रद, क्षोणीपति, खेचरमर्दक, गणेश्वर, गणपिता गरिष्ठ, गण-भूपति, गुरु, गुरुतर, ज्ञेय, गङ्गापति, अमर्षण, गीतप्रिय, गीतरत, सुगोप्य, गोपवृन्दप, गवारूढ जगद्धर्ता, गोस्वामी, गोस्वरूपक, गोप्रद, गोधर, गृध्र, गरुत्मान्, गोकृतासन, गोपीश, गुरुतात, गुहावासी, सुगोपित, गजारूढ, गजास्य, गजाजिनधर, अग्रज ॥ २६—३० ॥

ग्रहाध्यक्ष, ग्रहगण, दुष्टग्रहविमर्दक, गानरूपी, गानरत, प्रचण्ड, गानविह्वल, गानमत्त, गुणी, गुह्य गुणग्रामाशय गुण, गूढबुद्धि, गूढमूर्ति, गूढपादविभूषित, गोप्ता, गोलोकवासी, गुणवान्, गुणिना वर, हर, हरितवर्णाक्ष मृत्यु, मृत्युञ्जय हरि, हव्यभुक्, हरिसम्पूज्य हवि, हविर्भुजा वर, अनादि, आदि, सर्वाद्य, आदितेयवरप्रद,

गुणप्रीतो गुणवरो गिरिजानायको गिरि ।
गौरीभर्ता गुणाढ्यश्च गोश्रेष्ठासनसंस्थित ॥ ३६ ॥
पद्मासन पद्मनेत्र पद्मतुष्ट सुपद्मक ।
पद्मवक्त्र पद्मकर पद्मारूढपदाम्बुज ॥ ३७ ॥
पद्मप्रियतम पद्मालय पद्मप्रकाशक ।
पद्मकाननसवास पद्मकाननभुञ्जक ॥ ३८ ॥
पद्मकाननसवासी पद्मारण्यकृतालय ।
प्रफुल्लवदनोत्फुल्लकमलाक्षप्रफुल्लकृत् ॥ ३९ ॥
फुल्लेन्दीवरसतुष्ट प्रफुल्लकमलासन ।
फुल्लाम्भोजकरोत्फुल्लमानस पापहारक ॥ ४० ॥
पापापहारी पुण्यात्मा पुण्यकीर्ति सुपुण्यवान्।
पुण्य पुण्यतमो धन्य सुपूतात्मा परात्मक ॥ ४१ ॥
पुण्यश पुण्यद पुण्यनिरत पुण्यभाजन ।
परापकारी पापिष्ठनाशक पापहारक ॥ ४२ ॥
पुरातन पूर्वहीन परद्रोहविवर्जित ।
पीवर पीवरमुख पीनकाय पुरान्तक ॥ ४३ ॥
पाशी पशुपति पाशहस्त पाषाणविट्पति ।
पलात्मक परावेत्ता पाशबद्धविमोचक ॥ ४४ ॥
पशूनामधिप पाशच्छेत्ता पाशविभेदक ।
पाषाणधारी पाषाणशयान पाशिपूजित ॥ ४५ ॥
पश्वारूढ पुष्पधनु पुष्पवृन्दसुपूजित ।
पुण्डरीक पीतवासा पुण्डरीकाक्षवल्लभ ॥ ४६ ॥
पानपात्रकर पानमत्त पानातिभूतक ।
पोष्टा पोष्टवर पूत परित्राताऽखिलेश्वर ॥ ४७ ॥
पुण्डरीकाक्षकर्ता च पुण्डरीकाक्षसेवित ।
पल्लवस्थ प्रपीठस्थ पीठभूमिनिवासक ॥ ४८ ॥
पिता पितामह पार्थ प्रसन्नाभीष्टदायक ।
पितृणा प्रीतिकर्ता च प्रीतिद प्रीतिभाजन ॥ ४९ ॥
प्रीत्यात्मक प्रीतवशी सुप्रीत प्रीतिकारक ।
प्रीतिहृत्प्रीतिरूपात्मन् प्रीतियुक्तस्त्वमेव हि ॥ ५० ॥
प्रणतार्तिहर प्राणवल्लभ प्राणदायक ।
प्राणी प्राणस्वरूपश्च प्राणग्राही सुनिर्दय ॥ ५१ ॥
प्राणनाथ प्रीतमना सर्वेषा प्रपितामह ।
वृद्ध प्रवृद्धरूपश्च प्रेत प्रणयिना वर ॥ ५२ ॥
पराधीश पर ज्योति परनेत्र परात्मक ।
पारुष्यरहित पुत्री पुत्रद पुत्ररक्षक ॥ ५३ ॥
पुत्रप्रिय पुत्रवश्य पुत्रवत्परिपालक ।
परित्राता परावास परचेता परेश्वर ॥ ५४ ॥
पति सर्वस्य सम्पाल्य पवमान परान्तक ।
पुरहा पुरुहूतश्च त्रिपुरारि पुरान्तक ॥ ५५ ॥

लोके अनन्तविक्रम, लोकाना पापहारक, गीष्पति, सद्गुणोपेत, सगुण, निर्गुण, गुणी ॥ ३१—३५ ॥ गुणप्रीत, गुणवर, गिरिजानायक, गिरि, गौरीभर्ता, गुणाढ्य, गोश्रेष्ठासनसंस्थित, पद्मासन, पद्मनेत्र, पद्मतुष्ट, सुपद्मक, पद्मवक्त्र, पद्मकर, पद्मारूढपदाम्बुज, पद्मप्रियतम, पद्मालय, पद्मप्रकाशक, पद्मकाननसवास, पद्मकाननभुञ्जक, पद्मकाननसवासी, पद्मारण्यकृतालय, प्रफुल्लवदनोत्फुल्लकमलाक्षप्रफुल्लकृत्, फुल्लेन्दीवरसतुष्ट, प्रफुल्लकमलासन, फुल्लाम्भोजकरोत्फुल्लमानस, पापहारक ॥ ३६—४० ॥

पापापहारी, पुण्यात्मा, पुण्यकीर्ति, सुपुण्यवान्, पुण्य, पुण्यतम, धन्य, सुपूतात्मा, परात्मक, पुण्येश, पुण्यद, पुण्यनिरत, पुण्यभाजन, परोपकारी, पापिष्ठनाशक, पापहारक, पुरातन, पूर्वहीन, परद्रोहविवर्जित, पीवर, पीवरमुख, पीनकाय, पुरान्तक, पाशी, पशुपति, पाशहस्त, पाषाणविट्पति, पलात्मक, परावेत्ता, पाशबद्धविमोचक, पशूनामधिप, पाशच्छेत्ता, पाशविभेदक, पाषाणधारी, पाषाणशयान, पाशिपूजित ॥ ४१—४५ ॥ पश्वारूढ, पुष्पधनु, पुष्पवृन्दसुपूजित, पुण्डरीक, पीतवासा, पुण्डरीकाक्षवल्लभ, पानपात्रकर, पानमत्त, पानातिभूतक, पोष्टा, पोष्टवर, पूत, परित्राता, अखिलेश्वर, पुण्डरीकाक्षकर्ता, पुण्डरीकाक्षसेवित, पल्लवस्थ, प्रपीठस्थ, पीठभूमिनिवासक, पिता, पितामह, पार्थ, प्रसन्नाभीष्टदायक, पितृणा प्रीतिकर्ता, प्रीतिद, प्रीतिभाजन, प्रीत्यात्मक, प्रीतवशी, सुप्रीत, प्रीतिकारक, प्रीतिहृत्, प्रीतिरूपात्मा, प्रीतियुक्त ॥ ४६—५० ॥ प्रणतार्तिहर, प्राणवल्लभ, प्राणदायक, प्राणी, प्राणस्वरूप, प्राणग्राही, सुनिर्दय, प्राणनाथ, प्रीतमना, सर्वेषा प्रपितामह, वृद्ध, प्रवृद्धरूप, प्रेत, प्रणयिना वर, पराधीश, पर ज्योति, परनेत्र, परात्मक, पारुष्यरहित, पुत्री, पुत्रद, पुत्ररक्षक, पुत्रप्रिय, पुत्रवश्य, पुत्रवत् परिपालक, परित्राता, परावास, परचेता, परेश्वर, सर्वस्य पति, सम्पाल्य, पवमान, परान्तक, पु॰ पुरुहूत, त्रिपुरारि, पुरान्तक ॥ ५१—५५ ॥

पुरन्दरातिसम्पूज्य प्रधर्षो दुष्प्रधर्षण ।
पटु पटुतर प्रौढ प्रपूज्य पर्वतालय ॥ ५६ ॥
पुलिनस्थ पुलस्त्याख्य पिङ्गचक्षु प्रपन्नग ।
अभीरुरसिताङ्गश्च चण्डरूप सिताङ्गक ॥ ५७ ॥
सर्वविद्याविनोदश्च सर्वसौख्ययुत सदा।
सुखहर्ता सर्वसुखी सर्वलोकैकपावन ॥ ५८ ॥
सदावन सारदश्च सुसिद्ध शुद्धरूपक ।
सार सारतर सूर्य सोम सर्वप्रकाशक ॥ ५९ ॥
सोममण्डलधारी च समुद्र सिन्धुरूपवान्।
सुरज्येष्ठ सुरश्रेष्ठ सुरासुरनिषेवित ॥ ६० ॥
सर्वधर्मविनिर्युक्त सर्वलोकनमस्कृत ।
सर्वाचारसुत सौर शाक्त परमवैष्णव ॥ ६१ ॥
सर्वधर्मविधानज्ञ सर्वाचारपरायण ।
सर्वरोगप्रशमन सर्वरोगापहारक ॥ ६२ ॥
प्रकृष्टात्मा महात्मा च सर्वधर्मप्रदर्शक ।
सर्वसम्पद्युत सर्वसम्पद्दानसमेक्षण ॥ ६३ ॥
सहास्यवदनो हास्ययुक्त प्रहसितानन ।
साक्षी समक्षवक्ता च सर्वदर्शी समस्तवित्॥ ६४ ॥
सकलज्ञ समर्थज्ञ सुमना शैवपूजित ।
शोकप्रशमन शोकहन्ताऽशोच्य शुभान्वित ॥ ६५ ॥
शैलज्ञ शैलजानाथ शैलनाथ शनैश्चर ।
शशाङ्कसदृशज्योति शशाङ्कार्धविराजित ॥ ६६ ॥
साधुप्रिय साधुतम साध्वीपतिरलौकिक ।
शून्यरूप शून्यदेह शून्यस्थ शून्यभावन ॥ ६७ ॥
शून्यगामी श्मशानस्थ श्मशानाधिपति सुवाक्।
शतसूर्यप्रभ सूर्य सूर्यदीप्त सुरारिहा।
शुभान्वित शुभतनु शुभबुद्धि शुभात्मक ॥ ६८ ॥
शुभान्विततनु शुक्लतनु शुक्लप्रभान्वित ।
सुशौक्ल शुक्लदशन शुक्लाभ शुक्लमाल्यधृक्॥ ६९ ॥
शुक्लपुष्पप्रिय शुक्लवसन शुक्लकेतन ।
शेषालङ्करण शेषरहित शेषवेष्टित ॥ ७० ॥
शेषारूढ शेषशायी शेषाङ्गदविराजित ।
सतीप्रियश्च सशक समदर्शी समाधिमान्॥ ७१ ॥
सत्सङ्गी सत्प्रिय सङ्गी नि सङ्गी सङ्गवर्जित ।
सहिष्णु शाश्वतैश्वर्य सामगानरत सदा॥ ७२ ॥
सामवेत्ता साम्यतर श्यामापतिरशेषभुक्।
तारिणीपतिराताम्रनयनस्त्वरिताप्रिय ॥ ७३ ॥
तारात्मकस्त्वग्वसनस्तरुणीरमणे रत ।
तृप्तिरूपस्तृप्तिकर्ता तारकारिनिषेवित ॥ ७४ ॥
वायुकेशो भैरवेशो भवानीशो भवान्तक ।
भवबन्धुर्भवहरो भवबन्धनमोचक ॥ ७५ ॥

पुरन्दरातिसम्पूज्य, प्रधर्ष, दुष्प्रधर्षण, पटु, पटुतर, प्रौढ, प्रपूज्य, पर्वतालय, पुलिनस्थ, पुलस्त्याख्य, पिङ्गचक्षु, प्रपन्नग, अभीरु, असिताङ्ग, चण्डरूप सिताङ्गक, सर्वविद्याविनाद, सर्वसौख्ययुत, सुखहर्ता, सर्वसुखी, सर्वलोकैकपावन, सदावन, सारद, सुसिद्ध, शुद्धरूपक, सार, सारतर, सूर्य, सोम, सर्वप्रकाशक, सोममण्डलधारी, समुद्र, सिन्धुरूपवान्, सुरज्येष्ठ, सुरश्रेष्ठ, सुरासुरनिषेवित ॥ ५६—६० ॥

सर्वधर्मविनिर्युक्त, सर्वलोकनमस्कृत, सर्वाचारसुत, सौर, शाक्त, परमवैष्णव, सर्वधर्मविधानज्ञ, सर्वाचारपरायण, सर्वरोगप्रशमन, सर्वरोगापहारक, प्रकृष्टात्मा, महात्मा, सर्वधर्मप्रदर्शक, सर्वसम्पद्युत, सर्वसम्पद्दानसमेक्षण, सहास्यवदन, हास्ययुक्त, प्रहसितानन, साक्षी, समक्षवक्ता, सर्वदर्शी, समस्तवित्, सकलज्ञ, समर्थज्ञ, सुमना, शैवपूजित, शोकप्रशमन, शोकहन्ता, अशोच्य, शुभान्वित ॥ ६१—६५ ॥

शैलज्ञ, शैलजानाथ, शैलनाथ, शनैश्चर, शशाङ्कसदृश ज्योति, शशाङ्कार्धविराजित, साधुप्रिय, साधुतम, साध्वीपति, अलौकिक, शून्यरूप, शून्यदेह, शून्यस्थ, शून्यभावन, शून्यगामी, श्मशानस्थ, श्मशानाधिपति सुवाक्, शतसूर्यप्रभ, सूर्य, सूर्यदीप्त, सुरारिहा, शुभान्वित, शुभतनु, शुभबुद्धि, शुभात्मक, शुभान्विततनु, शुक्लतनु, शुक्लप्रभान्वित सुशौक्ल शुक्लदशन, शुक्लाभ, शुक्लमाल्यधृक्, शुक्लपुष्पप्रिय, शुक्लवसन, शुक्लकेतन, शेषालङ्करण, शेषरहित, शेषवेष्टित ॥ ६६—७० ॥

शेषारूढ, शेषशायी, शेषाङ्गदविराजित, सतीप्रिय, सशक, समदर्शी, समाधिमान्, सत्सङ्गी, सत्प्रिय, सङ्गी, नि सङ्गी, सङ्गवर्जित, सहिष्णु, शाश्वतैश्वर्य, सामगानरत, सामवेत्ता साम्यतर, श्यामापति, अशेषभुक्, तारिणीपति, आताम्रनयन, त्वरिताप्रिय तारात्मक, त्वग्वसन, तरुणी-रमणे रत, तृप्तिरूप, तृप्तिकर्ता तारकारिनिषेवित वायुकेश, भैरवेश, भवानीश भवान्तक, भवबन्धु, भवहर भवबन्धनमोचक ॥ ७१—७५ ॥

अभिभूतोऽभिभूतात्मा सर्वभूतप्रमोहक ।
भुवनेशो भूतपूज्यो भोगमोक्षफलप्रद ॥ ७६ ॥
दयालुर्दीननाथश्च दु सहो दैत्यमर्दक ।
दक्षकन्यापतिर्दु खनाशको धनधान्यद ॥ ७७ ॥
दयावान् दैवतश्रेष्ठो देवगन्धर्वसेवित ।
नानायुधधरो नानापुष्पगुच्छविराजित ॥ ७८ ॥
नानासुखप्रदो नानामूर्तिधारी च नर्तक ।
नित्यविज्ञानसयुक्तो नित्यरूपोऽनिलोऽनल ॥ ७९ ॥
लब्धवर्णो लघुतरो लघुत्वपरिवर्जित ।
लोलाक्षो लोकसम्पूज्यो लावण्यपरिसयुत ॥ ८० ॥
नपुरी न्याससस्थश्च नागेशो नगपूजित ।
नारायणो नारदश्च नानाभरणभूषित ॥ ८१ ॥
नगभूतो नग्रदेशो नग्र सानन्दमानस ।
नमस्यो नतनाभिश्च नम्रमूर्धाभिवन्दित ॥ ८२ ॥
नन्दिकेशो नन्दिपूज्यो नानानीरजमध्यग ।
नवीनबिल्वपत्रौघतुष्टो नवघनद्युति ॥ ८३ ॥
नन्द सानन्द आनन्दमयश्चानन्दविह्वल ।
नालसस्थ शोभनस्थ सुस्थ सुस्थमतिस्तथा ॥ ८४ ॥
स्वल्पासनो भीमरुचिर्भुवनान्तकराम्बुद ।
आसन्न सिकतालीनो वृषासीनो वृषासन ॥ ८५ ॥
वैरस्यरहितो वार्यो व्रती व्रतपरायण ।
ब्राह्मयो विद्यामयो विद्याभ्यासी विद्यापतिस्तथा ॥ ८६ ॥
घण्टाकारा घोटकस्थो घोररावघनस्वन ।
घूर्णचक्षुरघूर्णात्मा घोरहासो गभीरधी ॥ ८७ ॥
चण्डीपतिश्चण्डमूर्तिश्चण्डमुण्डी प्रचण्डवाक् ।
चितासस्थश्चितावासश्चितिदण्डकर सदा ॥ ८८ ॥
चिताभस्माभिसलिप्तश्चितानृत्यपरायण ।
चिताप्रमोदी चित्साक्षी चिन्तामणिरचिन्तक ॥ ८९ ॥
चतुर्वेदमयश्चक्षुश्चतुराननपूजित ।
चिरवासाश्चकोराक्षश्चलन्मूर्तिश्चलेक्षण ॥ ९० ॥
चलत्कुण्डलभूषाढ्यश्चलद्भूषणभूषित ।
चलन्नेत्रश्चलत्पादश्चलन्नूपुरराजित ॥ ९१ ॥
स्थावर स्थिरमूर्तिश्च स्थावरेश स्थिरासन ।
स्थापकास्थैर्यनिरत स्थूलरूपी स्थलालय ॥ ९२ ॥
स्थैर्यातिप स्थितिपर स्थाणुरूपी स्थलाधिप ।
ऐहिको मदमत्तश्च महीमण्डलपूजित ॥ ९३ ॥
महीप्रियो मत्तरवो मीनकेतुर्विमर्दक ।
मीनरूपो मीनसस्थो मृगहस्तो मृगासन ॥ ९४ ॥
मार्गस्थो मेखलायुक्तो मैथिलीश्वरपूजित ।
मिथ्याहीनो मङ्गलदो माङ्गल्यो मकरासन ॥ ९५ ॥

अभिभूत, अभिभूतात्मा, सर्वभूतप्रमोहक, भुवनेश, भूतपूज्य, भोगमोक्षफलप्रद, दयालु, दीननाथ, दु सह, दैत्यमर्दक, दक्षकन्यापति, दु खनाशक, धनधान्यद, दयावान्, दैवतश्रेष्ठ, देवगन्धर्वसेवित, नानायुधधर, नानापुष्पगुच्छविराजित, नानासुखप्रद, नानामूर्तिधारी, नर्तक, नित्यविज्ञानसयुक्त, नित्यरूप, अनिल, अनल, लब्धवर्ण, लघुतर, लघुत्वपरिवर्जित, लोलाक्ष, लोकसम्पूज्य, लावण्यपरिसयुत ॥ ७६—८० ॥

नपुरी, न्याससस्थ, नागेश, नगपूजित, नारायण, नारद, नानाभरणभूषित, नगभूत, नग्रदेश, नग्र, सानन्दमानस, नमस्य, नतनाभि, नम्रमूर्धाभिवन्दित, नन्दिकेश, नन्दिपूज्य, नानानीरजमध्यग, नवीन-बिल्वपत्रौघतुष्ट, नवघनद्युति, नन्द, सानन्द, आनन्दमय, आनन्दविह्वल, नालसस्थ, शोभनस्थ, सुस्थ, सुस्थमति, स्वल्पासन, भीमरुचि, भुवनान्तकराम्बुद, आसन्न, सिकतालीन, वृषासीन, वृषासन ॥ ८१—८५ ॥

वैरस्यरहित, वार्य, व्रती, व्रतपरायण, ब्राह्मय, विद्यामय, विद्याभ्यासी, विद्यापति, घण्टाकार, घोटकस्थ, घोररावघनस्वन, घूर्णचक्षु, अघूर्णात्मा, घोरहास, गभीरधी, चण्डीपति, चण्डमूर्ति, चण्डमुण्डी, प्रचण्डवाक्, चितासस्थ, चितावास, चितिदण्डकर, चिताभस्माभिसलिप्त, चितानृत्यपरायण, चिताप्रमोदी, चित्साक्षी, चिन्तामणि, अचिन्तक, चतुर्वेदमय, चक्षु, चतुराननपूजित, चिरवासा, चकोराक्ष, चलन्मूर्ति, चलेक्षण ॥ ८६—९० ॥

चलत्कुण्डलभूषाढ्य, चलद्भूषणभूषित, चलन्नेत्र, चलत्पाद, चलन्नूपुरराजित, स्थावर, स्थिरमूर्ति, स्थावरेश, स्थिरासन, स्थापकास्थैर्यनिरत, स्थूलरूपी, स्थलालय, स्थैर्यातिप, स्थितिपर, स्थाणुरूपी, स्थलाधिप, ऐहिक, मदमत्त, महीमण्डलपूजित, महीप्रिय, मत्तरव, मीनकेतु, विमर्दक, मीनरूप, मीनसस्थ, मृगहस्त, मृगासन, मार्गस्थ, मेखलायुक्त, मैथिलीश्वरपूजित, मिथ्याहीन, मङ्गलद, माङ्गल्य, मकरासन ॥ ९१—९५ ॥

मत्स्यप्रियो मधुरगीर्मधुपानपरायण ।
मृदुवाक्यपर सौरप्रियो मोदान्वितस्तथा॥ ९६ ॥
मुण्डालिर्भूपणो दण्डी उद्दण्डोज्ज्वललोचन ।
असाध्यसाधक शूरसेव्य शोकापनोदन ॥ ९७ ॥
श्रीपति श्रीसुसेव्यश्च श्रीधर श्रीनिकेतन ।
श्रीमता श्रीस्वरूपश्च श्रीमाञ्श्रीनिलयस्तथा॥ ९८ ॥
श्रमादिक्लेशरहित श्रीनिवास श्रियान्वित ।
श्रद्धालु श्राद्धदेवश्च श्राद्धो मधुरवाक्तथा॥ ९९ ॥
प्रलयाग्न्यर्कसकाश प्रमत्तनयनोज्ज्वल ।
असाध्यसाधक शूरसेव्य शोकापनोदन ॥ १०० ॥
विश्वभृतमयो वैश्वानरनेत्रोऽधिमोहकृत्।
लोकत्राणपरोऽपारगुण पारविवर्जित ॥ १०१ ॥
अग्निजिह्वो द्विजास्यश्च विश्वास्य सर्वभूतधृक्।
खेचर खेचराधीशो सर्वग सार्वलौकिक ॥ १०२ ॥
सेनानीजनक क्षुब्धाब्धिवारिक्षोभविनाशक ।
कपालविलसद्धस्त कमण्डलुभृदर्चित ॥ १०३ ॥
केवलात्मस्वरूपश्च केवलज्ञानरूपक ।
व्योमालयनिवासी च बृहद्व्योमस्वरूपक ॥ १०४ ॥
अम्भोजनयनाम्भोधिशयान पुरुपातिग ।
निरालम्बावलम्बश्च सम्भोगानन्दरूपक ॥ १०५ ॥
योगनिद्रामयो लोकप्रमोहापहरात्मक ।
बृहद्वक्त्रो बृहन्नेत्रो बृहद्बाहुर्बृहद्बल ॥ १०६ ॥
बृहत्सर्पाङ्गदो दुष्टबृहद्बलविमर्दक ।
बृहद्भुजबलोन्मत्तो बृहत्तुण्डो बृहद्वपु ॥ १०७ ॥
बृहदैश्वर्ययुक्तश्च बृहदैश्वर्यद स्वयम्।
बृहत्सम्भोगसतुष्टो बृहदानन्ददायक ॥ १०८ ॥
बृहज्जटाजूटधरो बृहन्माली बृहद्धनु ।
इन्द्रियाधिष्ठित सर्वलोकेन्द्रियविमोहकृत्॥ १०९ ॥
सर्वेन्द्रियप्रवृत्तिकृत् सर्वेन्द्रियनिवृत्तिकृत्।
प्रवृत्तिनायक सर्वविपत्तिपरिनाशक ॥ ११० ॥
प्रवृत्तिमार्गनेता त्व स्वतन्त्रेच्छामय स्वयम्।
सत्प्रवृत्तिरतो नित्य दयानन्दशिवाधर ॥ १११ ॥
क्षितिरूपस्तोयरूपी विश्वतृप्तिकरस्तथा।
तर्पस्तर्पणसम्प्रीतस्तर्पकस्तर्पणात्मक ॥ ११२ ॥
तृप्तिकारणभूतश्च सर्वतृप्तिप्रसाधक ।
अभेदाभेदकोच्छिद्यच्छेदकोऽछेद्य एव हि॥ ११३ ॥
अछिन्नधन्वाच्छिन्नेपुरच्छिन्नध्वजवाहन ।
अधृष्ट समधृष्टास्त्र समधृष्टयबलोन्नत ॥ ११४ ॥
चित्रयोधी चित्रकर्मा विश्वसकर्षक स्वयम्।
भक्तानामीप्सितकर सर्वेप्सितफलप्रद ॥ ११५ ॥

मत्स्यप्रिय, मधुरगी, मधुपानपरायण, मृदुवाक्यपर, सौरप्रिय, मोदान्वित, मुण्डालि, भूपण, दण्डी, उद्दण्डोज्ज्वललोचन, असाध्यसाधक, शूरसेव्य, शोकापनोदन, श्रीपति, श्रीसुसेव्य, श्रीधर, श्रीनिकेतन, श्रीमता श्रीस्वरूप, श्रीमान्, श्रीनिलय, श्रमादिक्लेशरहित, श्रीनिवास, श्रियान्वित, श्रद्धालु, श्राद्धदेव, श्राद्ध, मधुरवाक्, प्रलयाग्न्यर्कसकाश, प्रमत्तनयनोज्ज्वल, असाध्यसाधक, शूरसेव्य, शोकापनोदन॥ ९६—१०० ॥

विश्वभूतमय, वैश्वानरनेत्र अधिमोहकृत, लोकत्राणपर, अपारगुण, पारविवर्जित, अग्निजिह्व, द्विजास्य, विश्वास्य, सर्वभूतधृक्, खेचर, खेचराधीश, सर्वग, सार्वलौकिक, सेनानीजनक, क्षुब्धाब्धिवारिक्षोभविनाशक, कपालविलसद्धस्त, कमण्डलुभृत्, अर्चित, केवलात्मस्वरूप, केवलज्ञानरूपक, व्योमालयनिवासी, बृहद्व्योमस्वरूपक, अम्भोजनयनाम्भोधिशयान, पुरुपातिग, निरालम्बावलम्ब, सम्भोगानन्दरूपक॥ १०१—१०५ ॥

योगनिद्रामय, लोकप्रमोहापहरात्मक, बृहद्वक्त्र, बृहन्नेत्र, बृहद्बाहु, बृहद्बल, बृहत्सर्पाङ्गद, दुष्टबृहद्बलविमर्दक, बृहद्भुजबलोन्मत्त, बृहत्तुण्ड, बृहद्वपु, बृहदैश्वर्ययुक्त, बृहदैश्वर्यद, बृहत्सभोगसतुष्ट, बृहदानन्ददायक, बृहज्जटाजूटधर, बृहन्माली, बृहद्धनु, इन्द्रियाधिष्ठित, सर्वलोकेन्द्रियविमोहकृत्, सर्वेन्द्रियप्रवृत्तिकृत्, सर्वेन्द्रियनिवृत्तिकृत्, प्रवृत्तिनायक, सर्वविपत्तिपरिनाशक॥ १०६—११० ॥

प्रवृत्तिमार्गनेता, स्वतन्त्रेच्छामय सत्प्रवृत्तिरत, दयानन्दशिवाधर, क्षितिरूप तोयरूपी, विश्वतृप्तिकर, तर्प, तर्पणसम्प्रीत, तर्पक, तर्पणात्मक, तृप्तिकारणभूत, सर्वतृप्तिप्रसाधक, अभेदाभेदकोच्छिद्यच्छेदक, अछेद्य अछिन्नधन्वा, अच्छिन्नेपु, अच्छिन्नध्वजवाहन, अधृष्ट, समधृष्टास्त्र, समधृष्टयबलोन्नत, चित्रयोधी, चित्रकर्मा विश्वसकर्पक, भक्तानामीप्सितकर सर्वेप्सितफलप्रद॥ १११—११५ ॥

वाञ्छिताभीष्टफलदो भिन्नज्ञानप्रवर्तक ।
बोधनात्मा बोधनार्थातिग सर्वप्रबोधकृत्॥ ११६॥

त्रिजटश्चैकजटिलश्चलज्जटभयानक ।
जटाटीरो जटाजूटस्पृष्टावरवच स्वयम्॥ ११७॥

षाण्मातुरस्य जनक शक्तिप्रहरता वर ।
अनर्घास्त्रप्रहारी चानर्घधन्वा महार्घ्यपात्॥ ११८॥

योनिमण्डलमध्यस्थ मुखयोनिरजृम्भन ।
महाद्रिसदृश श्वेत श्वेतपुष्पस्त्रगन्वित ॥ ११९॥

मकरन्दप्रियो नित्य मासर्तुहायनात्मक ।
नानापुष्पप्रसूर्नानापुष्पैरर्चितगात्रक ॥ १२०॥

षडङ्गयोगनिरत सदायोगार्द्रमानस ।
सुरासुरनिषेव्याङ्घ्रिर्विलसत्पादपङ्कज ॥ १२१॥

सुप्रकाशितवक्त्राब्ज सितेतरगलोज्ज्वल ।
वैनतेयसमारूढ शरदिन्दुसहस्त्रवत्॥ १२२॥

जाज्वल्यमानस्तेजोभिर्ज्वालापुञ्जो यम स्वयम्।
प्रज्वलद्विद्युदाभश्च साट्टहासभयकर ॥ १२३॥

प्रलयानलरूपी च प्रलयाग्निरुचि स्वयम्।
जगतामेकपुरुषो जगता प्रलयात्मक ॥ १२४॥

प्रसीद त्व जगन्नाथ जगद्योने नमोऽस्तु ते॥ १२५॥

श्रीमहादेव उवाच

एव नामसहस्त्रेण राज्ञा वै सस्तुतो हर ।
प्रत्यक्षमगमत्तस्य सुप्रसन्नमुखाम्बुज ॥ १२६॥

स त विलोक्य त्रिदशैकनाथ
पञ्चानन श्वेतरुचि प्रसन्नम्।
वृषाधिरूढ भुजगाङ्गदैर्युत
ननर्त राजा धरणीभुजा वर ॥ १२७॥

प्रोवाच चेद परमेश्वराद्य मे
एतानि सर्वाणि सुखार्थकानि।
तपश्च होमश्च मनुष्यजन्म
यत्त्वा प्रपश्यामि दृशा परेशम्॥ १२८॥

वाञ्छिताभीष्टफलद, भिन्नज्ञानप्रवर्तक, बोधनात्मा, बोधनार्थातिग, सर्वप्रबोधकृत्, त्रिजट, एकजटिल, चलज्जटभयानक, जटाटीर, जटाजूटस्पृष्टावरवच, षाण्मातुरस्य जनक, शक्तिप्रहरता वर, अनर्घास्त्रप्रहारी, अनर्घधन्वा, महार्घ्यपात्, योनिमण्डलमध्यस्थ, मुखयोनि, अजृम्भन, महाद्रिसदृश, श्वेत, श्वेतपुष्पस्रगन्वित, मकरन्दप्रिय, मासर्तुहायनात्मक, नानापुष्पप्रसू, नानापुष्पैरर्चित-गात्रक॥ ११६—१२०॥ षडङ्गयोगनिरत, सदायोगार्द्रमानस, सुरासुरनिषेव्याङ्घ्रि, विलसत्पादपङ्कज, सुप्रकाशितवक्त्राब्ज, सितेतरगलोज्ज्वल, वैनतेयसमारूढ, शरदिन्दुसहस्त्रवत्, तेजोभि जाज्वल्यमान, ज्वालापुञ्ज, यम, प्रज्वलद्विद्युदाभ, साट्टहासभयकर, प्रलयानलरूपी, प्रलयाग्निरुचि, जगतामेकपुरुष, जगता प्रलयात्मक॥ १२१—१२४॥ जगद्योने! जगन्नाथ! आपको नमस्कार है, आप मुझपर प्रसन्न होइये॥ १२५॥

श्रीमहादेवजी बोले—राजा भगीरथके द्वारा इस प्रकार एक हजार नामोंसे स्तुति करनेपर अत्यन्त प्रसन्न मुखकमलवाले भगवान् शकर उनके समक्ष प्रकट हो गये॥ १२६॥

देवताओंके एकमात्र स्वामी, पञ्चानन, श्वेतकान्तियुक्त, वृषपर आरूढ, सर्पोके बाजूबन्दसे सम्पन्न प्रसन्न भगवान् शिवको देखकर राजाओमे श्रेष्ठ महाराज भगीरथ नाचने लगे और कहने लगे—परमेश्वर! आज! मेरी तपस्या, होम और मानवजन्म—ये सभी सुखके साधन सफल हो गये, क्योंकि आप परमेश्वरका मैं अपने नेत्रोंसे दर्शन कर रहा हूँ॥ १२७-१२८॥

मत्तो न त्वन्योस्ति महीतले वा
स्वर्गे यतस्त्व मम नेत्रगोचर ।
सुरासुराणामपि दुर्लभेक्षण
परात्पर पूर्णमयो निरामय ॥ १२९ ॥
ततस्तमेव प्रतिभाषमाण
प्राह प्रपन्नार्तिहरो महेश्वर ।
कि ते मनोवाञ्छितमेव विद्यते
वृणुष्व तत्पुत्र ददामि तुभ्यम्॥ १३० ॥
स चाह पूर्व कपिलस्य शापत
पातालरन्ध्रे मम पूर्ववशजा ।
भस्मीबभूवु सगरस्य पुत्रा
महाबला देवसमानविक्रमा ॥ १३१ ॥
तेषा तु निस्तारणकाम्यया ह्यह
गङ्गा धरण्यामभिनेतुमीहे।
सा तु त्वदीया परमा हि शक्ति
विनाज्ञया ते नहि याति पृथ्वीम्॥ १३२ ॥
तदेतदिच्छामि समेत्य गङ्गा
क्षितौ महावेगवती महानदी।
प्रविश्य तस्मिन्विवरे महेश्वरी
पुनातु सर्वान्सगरस्य पुत्रान्॥ १३३ ॥
इत्येवमाकर्ण्य वच परेश्वर
प्रोवाच वाक्य क्षितिपालपुङ्गवम्।
मनोरथस्तेऽयमवेहि पूर्णो
मम प्रसादादचिराद्भविष्यति॥ १३४॥
ये चापि मा भक्तित एव मर्त्या
स्तोत्रेण चानेन नृप स्तुवन्ति।
तेषा तु पूर्णा सकला मनोरथा
ध्रुव भविष्यन्ति मम प्रसादात्॥ १३५ ॥

श्रीमहादेव उवाच

इत्येव स वर लब्ध्वा राजा हृष्टमनास्तत ।
दण्डवत्प्रणिपत्याह धन्योऽह त्वत्प्रसादत ॥ १३६ ॥
ततश्चान्तर्दधे देव क्षणादेव महामते।
राजा निर्वृत्तचेता स बभूव मुनिसत्तम॥ १३७॥
राज्ञा कृतमिद स्तोत्र सहस्रनामसज्ञकम्।
य पठेत्परया भक्त्या स कैवल्यमवाप्नुयात्॥ १३८ ॥
न चेह दु ख कुत्रापि जायते तस्य नारद।
जायते परमैश्वर्यं प्रसादाच्च महेशितु ॥ १३९ ॥

इस पृथ्वीपर अथवा स्वर्गमे मेरे समान क दूसरा नहीं है, क्योंकि मैं आपका दर्शन कर रहा। आप परात्पर, पूर्णमय, निर्विकार हैं तथा देवता अ असुरोके लिये भी आपका दर्शन दुर्लभ है॥ १२९ तदनन्तर शरणागतोकी पीडाका हरण करनेवाले भगव महेश्वरने ऐसा कहते हुए भगीरथसे कहा—पुत्र! तुम्ह मनमे कौन-सी अभिलाषा है, उसे माँगो। मैं तुम वह दूँगा॥ १३० ॥ उन्होने कहा कि पूर्वकालम महारा सगरके महाबलशाली पुत्र, देवताओके समान पराक्रम मेरे पूर्व वशज कपिलमुनिके शापसे पातालमें भस्मीभू हो गये हैं। उन्हीं लोगोके उद्धारकी इच्छासे मैं गङ्गाकं पृथ्वीपर ले जाना चाहता हूँ। वे तो आपकी परम शक्ति हैं इसलिये वे आपकी आज्ञाके बिना पृथ्वीपर नहीं जा रही हैं॥ १३१-१३२ ॥ मैं यह चाहता हूँ कि महावेगवती महानदी महेश्वरी गङ्गा पृथ्वीपर आकर उस पाताल-विवरमे प्रवेश कर महाराजा सगरके सभी पुत्रोंको पवित्र करें॥ १३३ ॥ ऐसा सुनकर परमेश्वर भगवान् शकरने राजाओंमे श्रेष्ठ भगीरथसे कहा कि आप यह जानिये कि मेरी कृपासे आपका यह मनोरथ अविलम्ब ही पूर्ण होगा॥ १३४॥ राजन्! जो मानव इस स्तोत्रसे भक्तिपूर्वक मेरा स्तवन करेगे, मेरी कृपासे निश्चित ही उनके सभी मनोरथ पूर्ण होगे॥ १३५ ॥

श्रीमहादेवजी बोले—प्रसन्नमनवाले राजा भगीरथने ऐसा वरदान प्राप्त कर भगवान् शकरको दण्डवत् प्रणाम कर कहा कि आपकी कृपासे मैं धन्य हो गया॥ १३६॥ महामते! मुनिश्रेष्ठ! तब भगवान् शकर क्षणभरमें ही अन्तर्धान हो गये और राजा भगीरथ भी पूर्णमनोरथ हो गये॥ १३७॥ जो मनुष्य राजा भगीरथके द्वारा किये गये इस सहस्रनामवाले स्तोत्रका परम भक्तिके साथ पाठ करता है, वह मोक्ष प्राप्त कर लेता है। नारद! इस ससारमे उसे कहीं भी दु ख नहीं होता और भगवान् शकरकी कृपासे उसे परम ऐश्वर्य प्राप्त होता है॥ १३८-१३९ ॥

महापदि भये घोरे य पठेत्स्तोत्रमुत्तमम्।
शम्भोर्नामसहस्राख्य सर्वमङ्गलवर्धनम्॥ १४०॥

महाभयहर सर्वं सुखसम्पत्तिदायकम्।
स मुच्यते महादेवप्रसादेन महाभयात्॥ १४१॥

दुर्भिक्ष्ये लोकपीडाया देशोपद्रव एव वा।
सम्पूज्य परमेशान धूपदीपादिभिर्मुने॥ १४२॥

य पठेत्परया भक्त्या स्तोत्र नामसहस्रकम्।
न तस्य देशे दुर्भिक्ष न च लोकादिपीडनम्॥ १४३॥

न चान्योपद्रवो वापि भवेदेतत्सुनिश्चितम्।
पर्जन्योऽपि यथाकाले वृष्टिं तत्र करोति हि॥ १४४॥

यत्रेद पठ्यते स्तोत्र सर्वपापप्रणाशनम्।
सर्वसस्ययुता पृथ्वी तस्मिन्देशे भवेद्ध्रुवम्॥ १४५॥

न दुष्टबुद्धिर्लोकाना तत्रस्थाना भवेदपि।
नाकाले मरण तत्र प्राणिना जायते मुने॥ १४६॥

न हिंसास्तत्र हिंसन्ति देवदेवप्रसादत ।
धन्या देशा प्रजा धन्या यत्र देशे महेश्वरम्॥ १४७॥

सम्पूज्य पार्थिव लिङ्ग पठेद्यत्रेदमुत्तमम्।
चतुर्दश्या तु कृष्णाया फाल्गुने मासि भक्तित ॥ १४८॥

य पठेत्परमेशस्य नाम्ना दशशताख्यकम्।
स्तोत्रमत्यन्तसुखद न पुनर्जन्मभाग्भवेत्॥ १४९॥

वायुतुल्यबलो नून विहरेद्धरणीतले।
धनेशतुल्यो धनवान्कन्दर्पसमरूपवान्॥ १५०॥

विहरेद्देवतातुल्यो निग्रहानुग्रहे क्षम ।
गङ्गाया वा कुरुक्षेत्रे प्रयागे वा महेश्वरम्।
परिपूज्य पठेद्यस्तु स कैवल्यमवाप्नुयात्॥ १५१॥

जो व्यक्ति महान् विपत्तिमे तथा कठिन भयकी स्थितिमें समस्त मङ्गलोकी वृद्धि करनेवाले, महाभयको दूर करनेवाले, सभी प्रकारकी सुख-सम्पत्तिको देनेवाले भगवान् शम्भुके सहस्रनामसज्ञक इस उत्तम स्तोत्रका पाठ करता है, वह महादेवजीकी कृपासे महाभयसे मुक्त हो जाता है॥ १४०-१४१॥ मुने! अकाल पड़नेपर, लोगोके पीडित होनेपर अथवा देशमे उपद्रव होनेपर धूप-दीप आदि उपचारोसे भगवान् शकरकी पूजा कर जो परम भक्तिसे इस *सहस्रनामस्तोत्रका* पाठ करता है, उसके देशमे न दुर्भिक्ष रहता है न लोगोको कष्ट होता है और न ही अन्य कोई उपद्रव ही होता है तथा बादल भी यथासमय वृष्टि करते हैं, यह सुनिश्चित है॥ १४२—१४४॥ मुने! जिस स्थानपर सभी पापाको नष्ट करनेवाले इस स्तोत्रका पाठ किया जाता है, वहाँकी भूमि निश्चितरूपसे सभी धान्योसे सम्पन्न रहती है। वहाँके लोग कभी भी दुष्ट बुद्धिवाले नहीं होते और वहाँके प्राणियाकी अकालमृत्यु नहीं होती॥ १४५-१४६॥ जिस देशमे *फाल्गुन कृष्ण चतुर्दशीको पार्थिवलिङ्गमे भगवान्* महेश्वरकी भक्तिपूर्वक पूजा करके इस उत्तम स्तोत्रका पाठ किया जाता है, देवाधिदेव भगवान् शकरकी कृपासे वहाँके हिंसक जन्तु भी हिंसावृत्तिका परित्याग कर देते हैं, वे देश धन्य हैं तथा वहाँकी प्रजा भी धन्य है॥ १४७-१४८॥ जो व्यक्ति भगवान् शकरके अत्यन्त सुखदायक इस सहस्रनामस्तोत्रका पाठ करता है, उसे पुनर्जन्मकी प्राप्ति नहीं होती। वह वायुके समान बलवान्, कुबेरके समान धनवान् तथा कामदेवके समान रूपवान् होकर निश्चय ही पृथ्वीपर विहार करता है। वह अनुग्रह तथा निग्रह (नियन्त्रण)-मे समर्थ होकर देवताके समान विचरण करता है। गङ्गा, कुरुक्षेत्र अथवा प्रयागमें भगवान् शकरकी पूजा करके जो मनुष्य इस *सहस्रनामस्तोत्रका* पाठ करता है, वह मोक्ष प्राप्त कर लेता है॥ १४९—१५१॥

काश्या यस्तु पठेदेतत्स्तोत्र परममङ्गलम्।
तस्य पुण्य मुनिश्रेष्ठ किमह कथयामि ते॥ १५२॥

एतत्स्तोत्रप्रसादेन स जीवन्नेव मानव ।
साक्षान्महेशतामेति मुक्तिरन्ते करास्थिता॥ १५३॥

प्रत्यह प्रपठेदेतद्बिल्वमूले नरोत्तम ।
स सालोक्यमवाप्नोति देवदेवप्रसादत ॥ १५४॥

यो ह्येतत्पाठयेत्स्तोत्र सर्वपापनिबर्हणम्।
स मुच्यते महापापात्सत्य सत्य वदामि ते॥ १५५॥

न तस्य ग्रहपीडा स्यान्नापमृत्युभय तथा।
न त द्विषन्ति राजानो न वा व्याधिभय भवेत्॥ १५६॥

पठेदेतद्धृदि ध्यात्वा देवदेव सनातनम्।
सर्वदेवमय पूर्णं रजताद्रिसमप्रभम्॥ १५७॥

प्रफुल्लपङ्कजास्य च चारुरूप वृषध्वजम्।
जटाजूटज्वलत्कालकूटशोभितविग्रहम् ॥ १५८॥

त्रिशूल डमरु चैव दधान दक्षवामयो ।
द्वीपिचर्माम्बरधर शान्त त्रैलोक्यमोहनम्॥ १५९॥

एव हृदि नरो भक्त्या विभाव्यैतत्पठेद्यदि।
इह भुक्त्वा पर भोग परत्र च महामते॥ १६०॥

शम्भो स्वरूपता याति किमन्यत्कथयामि ते॥ १६१॥

तत्रैव सद्भक्तियुत पठेदिद
स्तोत्र मम प्रीतिकर पर मुने।
मर्त्यो हि योऽन्य खलु सोऽपि कृच्छ्र
जगत्पवित्रायत एव पापत ॥ १६२॥

मुनिश्रेष्ठ! जो व्यक्ति काशीमे इस परम मङ्गलदायक स्तोत्रका पाठ करता हे, उसके पुण्यके विषयम मैं आपसे क्या कहूँ। इस स्तोत्रके प्रभावसे वह मानव जीते-जी साक्षात् महेश्वरत्वको प्राप्त हो जाता है तथा अन्तमे मुक्ति उसके हाथमे स्थित रहती हे॥ १५२-१५३॥ जो नरश्रेष्ठ बिल्ववृक्षके मूलके पास बैठकर इस स्तोत्रका प्रतिदिन पाठ करता है, उसे देवाधिदेव भगवान् शकरके प्रसादसे सालोक्यमुक्ति प्राप्त होती है॥ १५४॥ जो मनुष्य सभी पापोको दूर करनेवाले इस स्तोत्रका पाठ करता हे, वह महापापसे मुक्त हो जाता हे, यह मैं आपसे सच-सच कहता हूँ। उसको न ग्रहोकी पीडा होती हे, न अकालमृत्युका भय रहता है, न उससे राजा लोग द्वेष करते हैं और न ही उसे रोगका भय रहता है॥ १५५-१५६॥ महामते! जो मनुष्य सर्वदेवमय, पूर्णस्वरूप, रजतके पर्वतके समान प्रभावाले, खिले हुए कमलके समान मुखवाले, सुन्दररूपसे सम्पन्न, जटाजूटसे देदीप्यमान, कालकूटसे सुशोभित विग्रहवाले, दक्षिण तथा वामहस्तमें क्रमश त्रिशूल एव डमरू धारण करनेवाले, व्याघ्रचर्माम्बरधारी, शान्तस्वरूप और तीनो लोकोंको मोहित करनेवाले वृषध्वज देवाधिदेव, सनातन भगवान् शिवका अपने हृदयमे ध्यान करके तथा हृदयमे उनकी भावना करते हुए भक्तिपूर्वक इस स्तोत्रका पाठ करता हे, वह ऐहिक श्रेष्ठ भोगाको भोगकर परलोकमे भगवान् शिवके सारूप्य मोक्षको प्राप्त करता हे। आपसे और अधिक क्या कहूँ॥ १५७—१६१॥

मुने! वहीं जो अन्य मनुष्य उत्तम भक्तिसे युक्त होकर मुझे परम प्रसन्न करनेवाले इम स्तोत्रका पाठ करता है, वह निश्चय ही कठिन ससारको पापसे [मुक्त करके] पवित्र कर देता है॥ १६२॥

॥ इति श्रीमहाभागवते महापुराणे श्रीशिवनारदसवादे गङ्गाया आगमनोपाख्याने भगीरथमुखनिर्गतशिवसहस्रनामकथनं नाम सप्तषष्टितमोऽध्याय ॥ ६७॥

॥ इस प्रकार श्रीमहाभागवतमहापुराणके अन्तर्गत श्रीशिव-नारद-सवादमे गङ्गाके आगमनोपाख्यानमे 'भगीरथमुखनिर्गत-शिवसहस्रनामकथन' नामक सडसठवाँ अध्याय पूर्ण हुआ॥ ६७॥

अड़सठवाँ अध्याय

भगवती गङ्गाका भगवान् विष्णुके चरणकमलोसे निकलकर सुमेरु पर्वतपर आना, पृथ्वीद्वारा गङ्गाकी स्तुति, इन्द्रकी प्रार्थनापर गङ्गाकी एक धाराका स्वर्गमे प्रतिष्ठित होना तथा दूसरी धाराका सुमेरुके दक्षिण शिखरका भेदन करना

श्रीमहादेव उवाच

अथ राजा स पुण्यात्मा ज्येष्ठे मासि शुभेऽहनि।
हस्ताया मङ्गलदिने शुक्लपक्षे महामुने॥ १ ॥
आरुरोह रथ दिव्य ध्मायन्शङ्खं महास्वनम्।
स रथस्थो महाबाहुर्व्यराजत महामुने॥ २ ॥
मध्याह्नार्क इवातीव तेजसा ह्यमितेन वै।
सर्वाभरणसम्पन्नो मुकुटोज्ज्वलमस्तक ॥ ३ ॥
तेजस्वी रुचिरश्याम सुवासा रक्तलोचन ।
राजर्षी राजवर्यश्च सुप्रसन्नमुखाम्बुज ॥ ४ ॥
काकपक्षधरो धन्यो राजन्यतिलको बलि ।
रथश्च विमलाभासो नानारत्नविभूषित ॥ ५ ॥
सुमेरुशृङ्गसकाश कान्त्यातीव व्यराजत॥ ६ ॥
चित्रध्वजपताकाभिर्हयै काञ्चनभूषितै ।
विरेजे रथराजस्तु राज्ञ सूर्यरथोपम ॥ ७ ॥
एतस्मिन्नन्तरे क्षोणी ज्ञात्वा त नृपसत्तमम्।
गङ्गावतारक भूमौ दिव्यरूप समागमत्॥ ८ ॥
सा त प्रणम्य राजान धर्मात्मान भगीरथम्।
अब्रवीन्मुनिशार्दूल वाक्य सुरुचिर तदा॥ ९ ॥

धरण्युवाच

राजन्धर्ममय साक्षात्त्व महात्मा महीक्षित ।
ज्ञात मया समुद्धर्तुं पितॄन्सगरवशजान्॥ १० ॥
गङ्गा पुण्यतमा धन्या विष्णोर्देहकृताश्रयाम्।
समानेष्यसि यत्रासन्सगरा भस्मरूपिण ॥ ११ ॥
तत्र ते प्रार्थयाम्येतच्चतुर्दिक्ष्वेव भूपते।
आसमुद्राच्चतुर्धारा भूत्वा मा स पुनाति वै॥ १२ ॥
यथा तथा विधातव्य त्वया पुण्यात्मना सदा।

राजोवाच

यदा हरिपदाम्भोजान्निसृत्य द्रवरूपिणी॥ १३ ॥
शाम्भवी सा महाशक्तिर्मेरुशृङ्गमवाप्स्यति।
तदा त्वयापि सा देवी समाराध्या सुरेश्वरी॥ १४ ॥

श्रीमहादेवजी बोले—महामुने! इस प्रकार पुण्यात्मा राजा भगीरथ ज्येष्ठमासके शुक्लपक्षमे हस्त नक्षत्रसे युक्त मङ्गलवार शुभ दिनको उच्च ध्वनिमे शङ्ख बजाते हुए रथपर आरूढ हो गये। महामुने! रथपर आरूढ राजा भगीरथ मध्याह्नकालीन सूर्यकी भाँति अपरिमित अतीव तेजसे सुशोभित हो रहे थे। वे सभी आभूषणोसे सम्पन्न, मस्तकपर उज्ज्वल मुकुट धारण किये हुए, तेजसम्पन्न, सुन्दर श्याम वर्णवाले, शोभनीय वस्त्र धारण किये हुए, रक्तनेत्रोवाले, राजाओमें श्रेष्ठ राजर्षि, कमलकी भाँति प्रसन्न मुखवाले, सुविभक्त केशराशिसे विभूषित, बली राजाओमे श्रेष्ठ तथा धन्यभाक् थे॥ १—४½ ॥ उनका रथ स्वच्छ, कान्तियुक्त, विभिन्न रत्नोसे सुशोभित, सुमेरुशृङ्गके समान विशाल और अपनी अत्यधिक कान्तिसे सुशोभित था। राजाका वह महान् रथ सूर्यके रथके समान, स्वर्णालङ्कारोसे सुशोभित घोडो तथा विभिन्न ध्वज-पताकाओंसे सुसज्जित था॥ ५—७॥ तदनन्तर पृथ्वी दिव्यरूपवाले नृपश्रेष्ठ भगीरथको भूमिपर गङ्गाका अवतरण करानेवाला जानकर उनके सम्मुख प्रकट हो गयीं। मुनिश्रेष्ठ! धर्मात्मा राजा भगीरथको नमस्कार कर पृथ्वीने राजासे इस प्रकार सुन्दर वचन कहा—॥ ८-९ ॥

पृथ्वी बोलीं—राजन्! आप पृथ्वीपालक महात्मा तथा साक्षात् धर्मस्वरूप हैं। मुझे ज्ञात हुआ है कि आप सगरके वशज अपने पितरोंके उद्धारके लिये भगवान् विष्णुके शरीरमे स्थित, धन्य, पवित्रतम गङ्गाको वहाँ लायेगे जहाँ आपके पूर्वज भस्मरूपमें अवस्थित हैं॥ १०-११ ॥ इसलिये भूपते! मैं आपसे प्रार्थना करती हूँ कि आप पुण्यात्मा वैसा करे, जिससे वे गङ्गा चारों दिशाओमे समुद्रपर्यन्त चार धाराओमे होकर मुझे पवित्र करती रह ॥ १२½ ॥

राजा बोले—जब वे शाम्भवी महाशक्ति द्रवरूप होकर भगवान् विष्णुके पदकमलसे निकलकर मेरुशृङ्गको प्राप्त करेगी तब आप भी सुरेश्वरी भगवतीकी आराधना कीजियेगा॥ १३-१४॥

अहं च प्रार्थयिष्यामि त्वत्कृते तां विशेषतः ।
ततस्ते सम्भवित्री सा यथेष्टफलदायिनी ॥ १५ ॥

अहं स्वर्गपुरं यामि तामानेतुमना क्षितौ ।
त्वमेहि तत्र तां भक्त्या सम्प्रार्थयितुमुत्तमाम् ॥ १६ ॥

श्रीमहादेव उवाच

राज्ञा सहैव सा क्षोणी सुप्रसन्नमुखाम्बुजा ।
स्वर्गाभिगमने चक्रे मतिं स्थिरतरां मुने ॥ १७ ॥

ततः प्राह स राजापि सारथिं रथिनां वरः ।
वाहयस्व रथं तूर्णं स्वर्गं नय महाबल ॥ १८ ॥

तच्छ्रुत्वा चालयामास सारथिस्तुरगोत्तमान् ।
वायुतुल्यप्रवेगान्वै तत्क्षणान्मुनिसत्तम ॥ १९ ॥

ततः सम्प्राप सहसा मेरुशृङ्गं रथोत्तमः ।
राजा दध्मौ महाशङ्खं युगान्तजलदस्वनम् ॥ २० ॥

स शब्दः समनुप्राप वैकुण्ठनगरं यदा ।
तदा विष्णुपदाम्भोजान्निःसृत्य द्रवरूपिणी ॥ २१ ॥

गङ्गा कलकलध्वानं कृत्वा वेगवती स्वयम् ।
पपात मेरुशृङ्गे तु प्रकृतिर्नीररूपिणी ॥ २२ ॥

तदा राजातिहृष्टात्मा शङ्खशब्दं विहाय वै ।
ननर्त कृतकृत्यः सन्दृष्ट्वा गङ्गां द्रवात्मिकाम् ॥ २३ ॥

विरते शङ्खशब्दे तु सापि वेगं विहाय वै ।
विरराम कियत्कालं तस्मिन्मेरोस्तु शीर्षके ॥ २४ ॥

एतस्मिन्नन्तरे क्षोणी गङ्गां त्रैलोक्यपावनीम् ।
समुपागत्य तुष्टाव स्तोत्रेणानेन भक्तितः ॥ २५ ॥

धरण्युवाच

देवि गङ्गे जगद्धात्रि ब्रह्मरूपे सुरेश्वरि ।
लोकनिस्तारणार्थाय द्रवरूपे प्रसीद मे ॥ २६ ॥

मैं भी आपके लिये विशेषरूपसे उनसे प्रार्थना करूँगा, तब आपके लिये वे मनोवाञ्छित फल देनेवाली होंगी। मैं उन्हें पृथ्वीपर लानेका संकल्प करके स्वर्ग जा रहा हूँ। आप भी उन श्रेष्ठ भगवतीकी भक्तिपूर्वक प्रार्थना करनेके लिये वहाँ आवें ॥ १५-१६ ॥

श्रीमहादेवजी बोले—मुने! खिले हुए कमलके समान मुखवाली उन पृथ्वीने राजा भगीरथके साथ ही स्वर्गमें जानेका दृढ निश्चय किया। तब रथियोंमें श्रेष्ठ राजाने सारथिसे कहा—महाबली! रथको शीघ्रतासे चलाओ और स्वर्गलोकमें ले चलो ॥ १७-१८ ॥ मुनिश्रेष्ठ! यह सुनकर सारथिने वायुतुल्य तीव्र वेगवाले उत्तम घोड़ोंको तुरंत चलाया ॥ १९ ॥ तब वह उत्तम रथ मेरुशृङ्गपर सहसा पहुँच गया। तदनन्तर राजाने प्रलयकालीन घनगर्जनके समान महाशङ्ख बजाया ॥ २० ॥ जब शङ्खकी ध्वनि वैकुण्ठधामको प्राप्त हुई तब नीररूपिणी पराप्रकृति भगवती गङ्गा द्रवरूपमें होकर भगवान् विष्णुके पदकमलसे निकलकर कल-कल ध्वनि करती हुई वेगपूर्वक मेरुशृङ्गपर गिरीं ॥ २१-२२ ॥

तब अतिप्रसन्न राजा जलधारारूपी गङ्गाको देखकर कृतकृत्य हो गये और शङ्ख बजाना छोड़कर नाचने लगे ॥ २३ ॥ शङ्खकी ध्वनि शान्त हो जानेपर भगवती गङ्गाने भी अपने वेगको छोड़कर मेरुपर्वतके शिखरपर कुछ समयतक विश्राम किया ॥ २४ ॥ उसी समय पृथ्वी त्रैलोक्यपावनी गङ्गाके समीप आकर इस स्तोत्रसे भक्तिपूर्वक उनकी स्तुति करने लगीं— ॥ २५ ॥

पृथ्वी बोलीं—जगत्का पालन करनेवाली सुरेश्वरी, ब्रह्मरूपिणी तथा लोकका उद्धार करनेके लिये द्रवरूप धारण करनेवाली देवी गङ्गे! मुझपर प्रसन्न होइये ॥ २६ ॥

तवाम्बुकणिका भक्त्याप्यभक्त्या वापि य स्पृशेत्।
सोऽपि मुक्तिमवाप्नोति गङ्गे देवि नमोऽस्तु ते॥ २७॥
ये त्वा पश्यन्ति लोका हि पापात्मानोऽपि वै सकृत्।
न तेऽपि यमदण्ड्या स्युर्देवि गङ्गे नमोऽस्तु ते॥ २८॥
ये स्मरन्ति सकृन्नाम गङ्गेति परमाक्षरम्।
न तस्यास्ति समो लोके देवो वा मानुषोऽपि वा॥ २९॥
त्वा नमन्ति सदा भक्त्या प्रकृति द्रवरूपिणीम्।
न तेषा दुर्गति क्वापि न वा भीतिर्यमादपि॥ ३०॥
प्राप्नुवन्ति पर मोक्ष गङ्गे देवि नमोऽस्तु ते।
त्वमेका परमा शक्ति सर्वभूताशये स्थिता॥ ३१॥
अविद्योच्छेदिनी विद्या गङ्गे देवि नमोऽस्तु ते।
अविद्याधारिणी विद्या विष्णुदेहकृतालये।
विष्णुपादाब्जसम्भूते देवि गङ्गे नमोऽस्तु ते॥ ३२॥
विश्वात्मिके जगद्वन्द्ये शिवध्यानपरायणे।
गिरिराजसुते देवि गङ्गे देवि नमोऽस्तु ते॥ ३३॥
त्वयि भक्तिस्त्वयि प्रीतिस्त्वयि श्रद्धा मतिस्त्वयि।
येषामस्ति न ते मृत्योर्वशमायान्ति कुत्रचित्॥ ३४॥
नवाऽध पतन तेषा न वा दु ख न वा भयम्।
त्वत्प्रसादाद्भवेद्देवि गङ्गे मातर्नमोऽस्तु ते॥ ३५॥
शुद्धबोधात्मिके सर्वलोकचैतन्यरूपिणी।
प्रसीद गङ्गे पापानि ध्वस विश्वेशि ते नम ॥ ३६॥

श्रीमहादेव उवाच

इत्येव सस्तुवन्तीं ता धरणीं जगदम्बिका।
गङ्गा प्राह वचो देवीं दिव्यरूपा महामुने॥ ३७॥

गङ्गोवाच

क्षिते किं याचसे मत्तस्तद्ब्रूहि तव वाञ्छितम्।
किमर्थं स्तौषि धरणि दृष्ट्वा मा वै द्रवात्मिकाम्॥ ३८॥

धरण्युवाच

अनुगृह्य महात्मान राजान त्व भगीरथम्।
प्रयासि विवरस्थान यत्रास्य पितर पुरा।
भस्मीभूता मुने शापात्सगरस्य महामखे॥ ३९॥
अत्रैतत्प्रार्थये दिक्षु चतुर्ष्वेव सुरेश्वरि।
आसमुद्राच्चतुर्धारा भूत्वा त्व मम पृष्ठत ।
विहृत्य सरिता श्रेष्ठे पवित्र कुरु मे तनुम्॥ ४०॥

जो व्यक्ति भक्ति अथवा अभक्तिसे भी आपके जलकणका स्पर्श करता है, वह भी मुक्तिको प्राप्त करता है। देवी गङ्गे! आपको नमस्कार है॥ २७॥ जो पापीजन आपका एक बार भी दर्शन कर लेते हैं, उन्हे यमराजके दण्डका भय नहीं होता। देवी गङ्गे! आपको नमस्कार है॥ २८॥ दिव्य अक्षरोसे युक्त 'गङ्गा' इस नामका जो एक बार स्मरण कर लेते हैं, उनके समान इस लोकमे देवता अथवा मनुष्य कोई भी नहीं होता॥ २९॥ द्रवरूपिणी पराप्रकृति आपको जो सदा भक्तिपूर्वक नमन करते हैं, उनकी कभी भी दुर्गति नहीं होती और यमराजसे भय भी नहीं रहता, वे उत्तम मोक्षको प्राप्त करते हैं। देवी गङ्गे! आपको नमस्कार है॥ ३०½॥ आप एकमात्र परम शक्ति हैं, सभी प्राणियोके हृदयम वास करती हैं, अविद्याको दूर करनेवाली विद्यास्वरूपिणी हैं, देवी गङ्गे! आपको नमस्कार है। आप अविद्या (माया)-को धारण करनेवाली विद्यास्वरूपा हैं, भगवान् विष्णुके विग्रहमे वास करती हैं तथा भगवान् विष्णुके चरणकमलसे उत्पन्न हुई हैं, देवी गङ्गे! आपको नमस्कार है॥ ३१-३२॥ देवि! आप विश्वात्मा, विश्वकी वन्दनीया, भगवान् शङ्करके ध्यानमे लगी रहनेवाली तथा गिरिराजपुत्री हैं, देवी गङ्गे! आपको नमस्कार है॥ ३३॥ जिनकी आपमे भक्ति, प्रीति, श्रद्धा और बुद्धि है, उन्हें कभी भी मृत्युका भय नहीं होता। देवी गङ्गे! आपकी कृपासे उनका न अध पतन होता है, न उन्हे दु ख और भय ही प्राप्त होता है। माता! आपको नमस्कार है॥ ३४-३५॥ विश्वेशि गङ्गे! आप शुद्ध ज्ञानस्वरूपिणी, सभी प्राणियोमे चेतनारूपसे स्थित हैं। भगवती! आप प्रसन्न होइये और पापोका नाश कीजिये, आपको नमस्कार है॥ ३६॥

श्रीमहादेवजी बोले—महामुने! इस प्रकार स्तुति करती हुई उन दिव्यरूपा पृथ्वीसे जगदम्बिका गङ्गाने इस प्रकार कहा—॥ ३७॥

गङ्गाजी बोलीं—धरणी! क्षिते! आप मुझसे क्या माँगती हैं, वह अपना वाञ्छित मुझे बतायें। मुझ द्रवरूपिणीको देखकर आप किसलिये स्तुति कर रही हैं?॥ ३८॥

पृथ्वी बोलीं—आप महात्मा राजा भगीरथपर कृपा करके पूर्वकालमे महाराजा सगरके महायज्ञमें मुनिके शापसे जहाँ इनके पूर्वज भस्मीभूत हैं, उस विवरकी ओर प्रस्थान कर रही हैं॥ ३९॥ सुरेश्वरि, सरित्श्रेष्ठे! मैं आपसे यही प्रार्थना करती हूँ कि समुद्रपर्यन्त चारो दिशाओमें चार

गङ्गोवाच

भगीरथस्तुता विष्णो पद त्यक्त्वाहमागता।
न तस्याभिमतादन्यत्कर्तुं शक्नोमि किञ्चन॥ ४१॥

श्रीमहादेव उवाच

ततो भगीरथो राजा धरणीहितकाम्यया।
प्रणिपत्य वच प्राह गङ्गा परमवेगिनीम्॥ ४२॥

राजोवाच

मातर्गङ्गे महाभागे पुण्ये पुण्यतमोत्तमे।
धरणीयमनुग्राह्या त्वया त्रिदशवन्दिते॥ ४३॥

श्रीमहादेव उवाच

एव मतमभिज्ञाय राज्ञस्तस्य महामते।
पश्चिमोत्तरपूर्वासु त्रिधा भूत्वानुवेगिनी।
नि ससार जगन्माता स्वर्गात्त्रैलोक्यपावनी॥ ४४॥
अपरैका महाधारा भगीरथपथानुगा।
अवाच्या दिशि मार्गे तु स्वर्गे वेगवती बभौ॥ ४५॥
सा धारा प्लावयित्वा च स्वर्गं सुरतरङ्गिणी।
दक्षिणाभिमुखी वेगात्कियद्दूर जगाम ह॥ ४६॥
अग्रे भगीरथो राजा मध्याह्नार्कसमप्रभ।
अपूर्वं रथमारुह्य ध्मायन्शङ्खमुपागमत्॥ ४७॥
त्रिदिव प्लवमान तु दृष्ट्वा देवा सकिन्नरा।
देव्यश्च समुपागत्य गङ्गा भक्त्याभ्यपूजयन्॥ ४८॥
अथाह देवराजस्त राजान सूर्यवशजम्।
विनयेन महाबाहु सहित सर्वदैवतै॥ ४९॥
भो भो क्षत्रियशार्दूल पुण्यकीर्ते भगीरथ।
त्रैलोक्यदुर्लभा गङ्गा नीत्वा यासि महीतले।
क्षण तिष्ठ महाभाग वचोऽस्माक निशामय॥ ५०॥
इति देवाधिराजस्य वच श्रुत्वा भगीरथ।
विरम्य तत्र देवेश प्रत्युवाच पुरन्दरम्॥ ५१॥
कमर्थं देवराज त्व ममादिशसि तद्वद।
करिष्यामि तदेवाह तवाज्ञावशग प्रभो॥ ५२॥

देवराज उवाच

आनीता भवता गङ्गा ब्रह्मादीना सुदुर्लभा।
क्षितावेव समग्रा ता नीत्वा यासि कथ नृप॥ ५३॥
एका सुललिता धारा स्वर्गे वाप्यवतिष्ठतु।
यथा मर्त्ये तथा स्वर्गे कीर्तिस्तेऽपि विराजताम्॥ ५४॥

धाराओमे विभक्त होकर मेरे तलपर विहार करके मेरे इस शरीरको पवित्र कीजिये॥ ४०॥

गङ्गाजी बोलीं—राजा भगीरथद्वारा स्तुति किये जानेपर भगवान् विष्णुके चरणकमलको छोडकर मैं आयी हूँ। अत उन भगीरथकी इच्छाके अतिरिक्त कुछ भी करनेमे मैं सक्षम नहीं हूँ॥ ४१॥

श्रीमहादेवजी बोले—तब राजा भगीरथने पृथ्वीके हितकी इच्छासे साष्टाङ्ग प्रणाम करके उत्तम वेगवाली गङ्गासे इस प्रकार कहा—॥ ४२॥

राजा बोले—महाभागा, पुण्या, पुण्यतमोंमें श्रेष्ठतमा तथा सुरवन्दिता मा गङ्गे! इन पृथ्वीपर आप कृपा कीजिये॥ ४३॥

दानं ध्यानं जपो होमोऽभ्यर्चनं श्राद्धतर्पणम्।
बहुपुण्यकरं प्रोक्तं गङ्गायां मुनिसत्तम॥ ३३॥

मनुष्यको अपने पितरोकी तृप्तिके लिये गङ्गातीर्थमें जाकर श्राद्ध तथा तर्पण करना चाहिये, अन्यथा वह नरकगामी होता है॥ २१॥ गङ्गाको उद्देश्य करके जाते हुए मनुष्यको देखकर श्राद्धभोगकी इच्छा रखनेवाले उसके पितर प्रसन्न होकर हँसने तथा नाचने लगते हैं॥ २२॥ मुने! श्राद्ध न करनेके कारण पितर निराश होकर लौट जाते हैं। अत यदि मनुष्य अपने पितरोका श्राद्ध नहीं करता है तो वह नरकमे पडता है॥ २३॥ गङ्गाके जलमें पकाया हुआ अन्न देवताओको भी दुर्लभ है। उस अन्नसे श्राद्ध किये जानेपर पितरोको सतृप्ति होती है॥ २४॥ जिसके पितर सन्तुष्ट रहते हैं, उसका जन्म सार्थक है और जिसके पितर कुपित रहते हैं उसका जीवन निरर्थक है॥ २५॥ पितरोके रुष्ट रहनेपर मनुष्योको धर्मकी प्राप्ति नहीं होती है। अत पितरोको भलीभाँति तृप्त करके ही धार्मिक कृत्य करना चाहिये॥ २६॥

चन्द्र अथवा सूर्यग्रहणके अवसरपर यदि भाग्यसे गङ्गाका सानिध्य प्राप्त होता है तो उस समय गङ्गामें स्नान करके विधि-विधानपूर्वक पितृश्राद्ध करना चाहिये। वह श्रेष्ठ श्राद्ध अक्षय, पितरोंको तृप्त करनेवाला, सौ गङ्गाश्राद्धोंके समान और मोक्षपद प्रदान करनेवाला होता है॥ २७½॥ उस समय पुरश्चरण करनेसे मनुष्य मन्त्रोको सिद्ध कर लेता है। वह असाध्य कार्योंको भी सम्पन्न कर लेता है और स्वय शिव-तुल्य हो जाता है। पुरश्चरण कर रहे मनुष्यको किसी दूसरे अधिकारी पुरुषसे अपने पितरोका श्राद्ध करा लेना चाहिये। किंतु अज्ञानवश उसे अपने पितराको कभी श्राद्धसे वञ्चित नहीं करना चाहिये॥ २८-२९½॥ अक्षय कही जानेवाली तथा युगादि तिथिया*पर गङ्गाके जलमें स्नान करके श्राद्ध तथा दान आदिसे पितराको सतृप्त करनेसे मनुष्य पुनर्जन्मका भागी नहीं होता॥ ३०-३१॥ उत्तम साधक गङ्गामें पुरश्चरण करके पापसे रहित होकर मन्त्रसिद्ध तथा महाज्ञानी हो जाता है। मुनिश्रेष्ठ! गङ्गाके सानिध्यमें किये गये दान, ध्यान, जप, होम, पूजन तथा श्राद्ध-तर्पण आदि महान् पुण्यकारक कहे गये हैं॥ ३२-३३॥

* कार्तिक शुक्ल नवमी (सत्ययुग) वैशाख शुक्ल तृतीया (त्रेतायुग) माघमासकी अमावास्या (द्वापरयुग) तथा भाद्रपद कृष्ण त्रयोदशी (कलियुग)-इन चार तिथियोको युगोकी आदि तिथि कहा गया है। (विष्णुपुराण ३। १४। १२-१३)

गङ्गाया मोहतो नैव विण्मूत्र विसृजेन्नर ।
विसृजन्निरय याति यावदिन्द्राश्चतुर्दश ॥ ३४ ॥

असत्यभाषण लोभ हित्वा च परनिन्दनम्।
परद्रोहादिक पाप वर्जयेत्सुसमाहित ॥ ३५ ॥

यदि कुर्याच्च मोहेन तदा तत्पापशान्तये।
कृत्वा स्नान नमस्कृत्य क्षेत्रादन्तर्हितो भवेत्॥ ३६ ॥

यस्तु गङ्गा महादेवीं प्रकृति नीररूपिणीम्।
नदीति मन्यते मोहात्स याति नरकान्बहून्॥ ३७ ॥

साक्षाद्ब्रह्ममयीं पूर्णां लोकाना त्राणहेतवे।
द्रवरूपेण निर्याता शक्तिराद्येति भावयेत्॥ ३८ ॥

सर्वत्र सुलभा गङ्गा त्रिषु स्थानेषु दुर्लभा।
हरिद्वारे प्रयागे च गङ्गासागरसङ्गमे॥ ३९ ॥

महाफलप्रदा गङ्गा तस्मात्तत्र विशेषत ।
प्रयत स्नानदानादीन्कुर्यान्मर्त्यो महामति ॥ ४० ॥

काश्या यस्तु समागत्य गङ्गाया विधिवन्नर ।
स्नानमुत्तरवाहिन्या कुरुते भक्तिभावत ॥ ४१ ॥

स साक्षाच्छिवतामेति देवपूज्यतम स्मृत ।
पितृणा तर्पण चापि तत्र निर्वाणदायकम्॥ ४२ ॥

सर्वतीर्थादिनिलया काशी विश्वेश्वरालया।
दुर्लभा पृथिवीबाह्या पृथिव्यन्त स्थितापि च॥ ४३ ॥

सा स्थली जाह्नवीतोय जल यत्र महामते।
तत्र मुक्ति करस्था तु देहिना पापिनामपि॥ ४४॥

अन्नपूर्णान्नदा यत्र माता देहभृता स्वयम्।
गङ्गा च जलदा यत्र ज्ञानदा च सरस्वती॥ ४५ ॥

ब्राह्मादितो मुनिश्रेष्ठ यत्र मृत्यु पर पदम्।
पिता विश्वेश्वरो यत्र मोक्षमार्गोपदेशक ॥ ४६ ॥

भूलकर भी मनुष्यको गङ्गामे मल-मूत्रका त्याग नहीं करना चाहिये। गङ्गामे मल-मूत्रका विसर्जन करनेवाला व्यक्ति चोदह इन्द्रोके भोगकालतक (एक कल्पपर्यन्त) नरकमें वास करता है ॥ ३४ ॥ पुण्यात्मा व्यक्तिको चाहिये कि असत्य भाषण तथा लोभका त्याग करके परनिन्दा ओर परद्रोह आदि पापोसे रहित हो जाय। यदि भूलसे ऐसा कर देता है, तब उस पापकी शान्तिके लिये उसे गङ्गास्नान करके तथा भगवती गङ्गाको प्रणाम करके उस क्षेत्रसे अन्यत्र हट जाना चाहिये ॥ ३५-३६ ॥ जो पुरुष जलरूपिणी, पूर्णा, परा प्रकृति तथा साक्षात् ब्रह्मस्वरूपिणी भगवती गङ्गाको अज्ञानवश नदी—ऐसा मानता है, वह अनेक नरकामे जाता है। आदिशक्ति ही प्राणियाकी रक्षाके लिये द्रवरूपम निकली हुई हैं—ऐसी भावना करनी चाहिये ॥ ३७-३८ ॥

गङ्गा सभी स्थानोपर तो सुलभ हैं, किंतु हरिद्वार, प्रयाग और गङ्गासागरसङ्गम—इन तीन स्थानोपर दुर्लभ हैं। इन स्थानोपर गङ्गा महान् फल प्रदान करती हैं। अत महान् बुद्धिवाले मनुष्यको चाहिये कि वहाँपर विशेष प्रयत्नके साथ स्नान, दान आदि कृत्योको करे ॥ ३९-४० ॥ जो मनुष्य काशीमे आकर भक्तिभावसे सम्पन्न हो विधिपूर्वक उत्तरवाहिनी गङ्गामे स्नान करता हे, वह साक्षात् शिवत्वको प्राप्त हो जाता है। वह व्यक्ति देवताओका भी अत्यन्त पूजनीय कहा गया है और वहाँपर किया गया पितृतर्पण भी निर्वाण प्रदान करता हे ॥ ४१-४२ ॥ विश्वेश्वर सदाशिवकी नगरी काशी अत्यन्त दुर्लभ है तथा सभी तीर्थोकी आदि-निवासस्थली है। वह पृथ्वीमण्डलके अन्तर्गत रहते हुए भी भूमण्डलसे पृथक् है [भगवान् विश्वनाथके त्रिशूलपर स्थित है]। महामते! ऐसी दिव्य भूमि तथा भगवती गङ्गाका पावन जल जहाँ है, वहाँ पापी प्राणियोंके लिये भी मुक्ति हाथमे ही हे॥ ४३-४४॥ जहाँ देहधारियोकी माता अन्नपूर्णा स्वय अन्न प्रदान करती हें, जहाँ भगवती गङ्गा जल और भगवती सरस्वती ज्ञान प्रदान करती हैं। मुनिश्रेष्ठ! जहाँ मृत्यु ब्राह्म आदिसे श्रेष्ठ परम पद [मोक्ष]-का प्रदान करती हैं और जहाँपर जगत्पिता विश्वेश्वर मोक्षमार्गके उपदेशकके रूपमे विराजमान हैं,

ता काशीं यो न सेवेत विधिना वञ्चितस्तु स ।
मणिकर्ण्यां कृतस्नान काश्या विश्वेश्वर प्रभुम्।
सम्पूज्य बिल्वपत्राद्यै शिवसायुज्यमाप्नुयात्॥ ४७॥

उस काशीका जो सेवन नहीं करता, वह विधाताके द्वारा ठग लिया गया है। काशीमे मणिकर्णिकापर स्नान करनेवाला व्यक्ति बिल्वपत्र आदिसे भगवान् विश्वेश्वरका पूजन करके शिवसायुज्य प्राप्त कर लेता है॥ ४५—४७॥

गङ्गामृत्तिकया कृत्वा तिलक मुनिसत्तम।
यत्किंचित्कुरुते कर्म तत्सर्वं पूर्णतामियात्॥ ४८॥

मुनिश्रेष्ठ! गङ्गाकी मिट्टीसे तिलक धारण करके मनुष्य जो कुछ कर्म करता है, वह सब पूर्ण हो जाता है॥ ४८॥

यत्रकुत्रापि गङ्गाया सलिलेर्देवपूजनम्।
श्राद्धाभिषेककर्मादि कुरुते मानवोत्तम ॥ ४९॥
ज्ञानतोऽज्ञानतो वापि विधिहीन भवेद्यदि।
अकालऽप्यथ वा देशे श्राद्धादिपरिवर्जिते॥ ५०॥
दाम्भिक भावमास्थाय कृत वा द्रव्यवर्जितम्।
अशुद्धद्रव्यसघेन कृत वा पापचेतसा।
सम्पूर्णफलद सर्व तथापि खलु तद्भवेत्॥ ५१॥

जहाँ-कहीं भी श्रेष्ठ मनुष्य गङ्गाके जलसे देवपूजन, श्राद्ध तथा अभिषेक आदि कर्म करता है—वह कर्म चाहे ज्ञान अथवा अज्ञानसे हो, विधिहीन हो गया हो, श्राद्ध आदिके लिये अविहित देश अथवा कालमे किया गया हो, दम्भभावनासे युक्त होकर या द्रव्यरहित रूपमे अथवा अन्यायोपार्जित द्रव्योसे या पापयुक्त मनसे ही किया गया हो, फिर भी वह निश्चितरूपसे सम्पूर्ण फल प्रदान करनेवाला होता है॥ ४९—५१॥

॥ इति श्रीमहाभागवते महापुराणे श्रीमहादेवनारदसवादे श्रीगङ्गामाहात्म्यकथने त्रिसप्ततितमोऽध्याय ॥ ७३॥

॥ इस प्रकार श्रीमहाभागवतमहापुराणके अन्तर्गत श्रीमहादेव-नारद-सवादमे 'श्रीगङ्गामाहात्म्यकथन' नामक तिहत्तरवाँ अध्याय पूर्ण हुआ॥ ७३॥

चौहत्तरवॉ अध्याय

गङ्गामाहात्म्य-कथनके प्रसगमे धनाधिप वैश्यकी कथा

श्रीमहादेव उवाच

गङ्गाया सत्यजन्देह ज्ञानतो मुनिसत्तम।
कैवल्य समवाप्नोति मानव पापवर्जित ॥ १॥

श्रीमहादेवजी बोले— मुनिश्रेष्ठ! ज्ञानपूर्वक गङ्गामें देहत्याग करनेवाला मनुष्य पापसे मुक्त होकर मोक्ष प्राप्त कर लेता हे॥ १॥

अज्ञानाच्छिवसायुज्य त्यक्त्वा तत्र कलेवरम्।
प्राप्नुयान्मानवो गङ्गाप्रसादादतिपातकी॥ २॥

महापातकी मनुष्य अज्ञानतापूर्वक भी उसमे शरीर त्यागकर गङ्गाजीकी कृपासे शिवसायुज्य प्राप्त करता है॥ २॥

मृतस्य यत्रकुत्रापि मासमस्थि च नारद।
प्रपतेज्जाह्नवीतोये सोऽपि स्वर्गमवाप्नुयात्॥ ३॥

यदि पापसहस्त्र स्याद्ब्रह्महत्यादिगर्हितम्।
यत्रकुत्रस्थित मासमस्थिगङ्गाजल लभेत्।
मृतस्य सोऽपि निर्याति स्वर्गं लाकमनामयम्॥ ४॥

नारद! जहाँ-कहीं भी मृत्युको प्राप्त प्राणीका मास अथवा अस्थि आदि गङ्गाके जलमे पड जाता है, वह प्राणी भी स्वर्ग प्राप्त करता है, चाहे उसने ब्रह्महत्या आदि हजारो निन्दित पाप किये हो। मरे हुए प्राणीके जहाँ-कहीं भी पडे हुए मास अथवा अस्थि आदिको यदि गङ्गाजलकी प्राप्ति हो जाती है तो वह भी निर्विकार स्वर्गलोकको प्राप्त हो जाता है॥ ३-४॥

गङ्गाया च जले मुक्तिर्वाराणस्या जले स्थल।
जले स्थले चान्तरिक्षे त्रिधा सागरसङ्गमे॥ ५॥

गङ्गाके जलमे मरनेसे मुक्ति मिल जाती है, वाराणसीक्षेत्रमें कहीं भी जल अथवा स्थलमे मरनेसे मुक्ति प्राप्त हो जाती है और गङ्गासागरसङ्गमपर जल स्थल और अन्तरिक्ष—इन तीनोमे कहीं भी मरनेपर मुक्ति प्राप्त हो जाती है॥ ५॥

अत्रेतिहास वक्ष्यामि शृणु सावहितो मुने।
आश्चर्यं महदाख्यान मुने श्रोतृसुखावहम्॥ ६ ॥

आसीत्परमपापात्मा वैश्यो नाम्ना धनाधिप ।
दस्युकर्मरतो नित्य परदाररत सदा॥ ७ ॥

स पापात्मा त्यजन्देह यमस्य वशतामगात्।
यमस्त पातयामास नरके त्वसिपत्रके॥ ८ ॥

देहस्तस्य त्वनिर्दग्ध स्थितोऽरण्यस्य मध्यत ।
त चखाद शृगालस्तु क्षुधार्तो मुनिसत्तम॥ ९ ॥

एतस्मिन्नन्तरे तत्र कानने मुनिसत्तम।
आगत्य गृध्रराजस्त शृगाल प्राभ्यधावत॥ १० ॥

वियद्गतोऽतिश्रान्तस्तु गङ्गाया समुपेत्य वै।
पपौ जल मुनिश्रेष्ठ तत्र तन्मासमाविशत्॥ ११ ॥

तत्तोयस्पर्शमात्रेण स पापी घोरकिल्बिषात्।
विमुक्त शाकर देह प्राप्य स्वर्गं जगाम ह॥ १२ ॥

रक्षकास्त्वसिपत्रस्थं गच्छन्त वीक्ष्य पापिनम्।
धर्मराजमुपागत्य वचन चेदमब्रुवन्॥ १३ ॥

रक्षका ऊचु

प्रभोऽसिपत्रे नरके य पापी रक्षितस्त्वया।
स साक्षाच्छाकर देह प्राप्य स्वर्गं जगाम ह॥ १४ ॥
तच्छ्रुत्वा विस्मय प्राप्य यम प्राह भटान्प्रति।
विज्ञाय कारण तस्य ज्ञानदृष्ट्या तपोधन ॥ १५ ॥

यम उवाच

दूता गङ्गाजलस्पर्शाच्छृगालकवलीकृते।
मासे चातिनिकृष्टोऽपि मुक्तोऽसौ सहसाऽभवत्॥ १६ ॥

श्रीमहादेव उवाच

तच्छ्रुत्वा विस्मय प्राप्य दूता स्वस्थानमाययु ।
स्मरन्तो जाह्नवीतोयमाहात्म्य मुनिसत्तम॥ १७ ॥

स तु स्वर्गपुरे देवै स्तूयमानो महामते।
सम्प्राप्य शिवसायुज्य मुमोद सुचिर मुने॥ १८ ॥

एव भगवती गङ्गा महापातकनाशिनी।
दर्शनात्स्पर्शनाच्चापि मोक्षदा च यतस्तत ॥ १९ ॥

मुने! अब मैं इस सदर्भमे एक कथाका वर्णन करूँगा, आप सावधान होकर सुनिये। मुने! यह आख्यान अत्यन्त आश्चर्यजनक तथा श्रोताको सुख प्रदान करनेवाला है॥ ६ ॥ धनाधिप नामक एक महापापी वैश्य था। वह प्रतिदिन चोरीके काममे लगा रहता और सदा परायी स्त्रियोमे आसक्त रहता था। वह पापात्मा देह-त्याग कर यमराजके पास पहुँचा और यमराजने उसे असिपत्र नामक नरकमे डाल दिया॥ ७-८ ॥ उसका बिना जला शरीर जगलके बीचमे पडा रहा। मुनिश्रेष्ठ! भूखसे पीडित एक सियार उस मृतदेहको खाने लगा॥ ९ ॥ मुनिश्रेष्ठ! इसी बीच उस जगलमे रहनेवाला एक गीधराज वहाँ आकर सियारकी ओर दौडा [और स्वय उसे खाने लगा]॥ १० ॥ मुनिश्रेष्ठ! अत्यन्त थका हुआ वह गीध आकाशमे उड गया और गङ्गातटपर आकर उसने जल पीया। उसकी चोचपर लगा हुआ मास गङ्गाजलमे गिर गया। उस जलके स्पर्शमात्रसे वह पापी [वैश्य] घोर पापसे मुक्त हो गया और शिवरूप होकर स्वर्ग चला गया॥ ११-१२ ॥ असिपत्र नरकके रक्षक वहाँ स्थित उस पापीको वहाँसे जाते हुए देखकर धर्मराजके पास आकर यह वचन कहने लगे— ॥ १३ ॥

रक्षकगण बोले—प्रभो! आपने जिस पापीको असिपत्र नरकमे रखा था, वह तो साक्षात् शिवदेह प्राप्त कर स्वर्ग चला गया। यह सुनकर तपोधन यमराजको महान् आश्चर्य हुआ। पुन अपनी ज्ञानदृष्टिसे उसका कारण जानकर वे अपने रक्षकोसे कहने लगे— ॥ १४-१५ ॥

यमराज बोले—दूतो! [मृत्यूपरान्त] जिसका मास सियारके द्वारा खा लिया गया, ऐसा यह पापी भी अपने मासके गङ्गाजलके स्पर्शसे सहसा मुक्त हो गया॥ १६ ॥

श्रीमहादेवजी बोले—मुनिश्रेष्ठ! ऐसा सुनकर यमदूताको बडा आश्चर्य हुआ और वे गङ्गाजलकी महिमाका स्मरण करते हुए अपने स्थानपर आ गये॥ १७ ॥ महामते! मुने! स्वर्गलोकमे देवताओके द्वारा स्तुत होते हुए वह शिवसायुज्य प्राप्त करके सदाके लिये आनन्दित हो गया॥ १८ ॥ इस प्रकार महापातकोका नाश करनेवाली भगवती गङ्गा जिस किसी भी प्रकारसे दर्शन या स्पर्श हो जानेपर मोक्ष प्रदान कर देती हैं॥ १९ ॥

सर्वात्मना नरो भक्त्या गङ्गामेव समाश्रयेत्।
अद्य वाब्दशतान्ते वा मृत्युर्नैयत्यवर्जित ।
तस्मात्प्रागेव ता गङ्गा मुमुक्षु समुपाश्रयेत्॥ २०॥

अतर्कितमिवागम्य शमनोऽतिदुरासद ।
यावत्केशान्न गृह्णाति तावद्गङ्गामुपाश्रयेत्॥ २१॥

पुत्रमित्रकलत्रादि न बन्धु कथ्यते मुने।
गङ्गैव परमा बन्धुर्भवमोचनकारिणी॥ २२॥

दर्शनात्स्पर्शनान्नामकीर्तनाद्ध्यानतोऽपि च।
सुखदा मोक्षदा गङ्गा बन्धु परम ईरिता॥ २३॥

महाघोरतरे याम्ये भये निर्भयदायिनीम्।
गङ्गा ये नाश्रयन्तीह ज्ञेयास्ते चात्मघातिन ॥ २४॥

वृथा पुत्रादिक सर्वं मोहबन्धप्रवर्तकम्।
शाश्वतीमुक्तिदा गङ्गेत्येव मत्वा समाश्रयेत्॥ २५॥

मुमूर्षुं प्रापयेद्गङ्गा निर्वाणपददायिनीम्।
सोऽपि निर्वाणमायाति जाह्नव्यास्तु प्रसादत ॥ २६॥

गङ्गैव परमो बन्धुर्गङ्गैव परम सुखम्।
गङ्गैव परम वित्त गङ्गैव परमा गति ॥ २७॥

गङ्गैव परमा मुक्तिर्गङ्गा सारतरेति ये।
विभावयन्ति तेपा तु न दूरस्था कदाचन॥ २८॥

गङ्गेति वदता गङ्गा पृष्ठतश्चानुधावति।
शङ्खस्वनाद्यथा पूर्वं भगीरथमुपाययौ॥ २९॥

गङ्गातीर परित्यज्य योऽन्यत्र निवसेन्नर ।
करस्था सत्यजन्मुक्ति सोऽन्वेपी नरकस्य तु॥ ३०॥

धन्य स देशो यत्रास्ति गङ्गा त्रैलोक्यपावनी।
गङ्गाहीनस्तु यो देशो न प्रदेश स भण्यत॥ ३१॥

गङ्गातीरे वर भिक्षा वर प्राणवियोजनम्।
अन्यत्र पृथिवीपत्य न नर प्रार्थयेत्क्वचित्॥ ३२॥

मनुष्यको सभी प्रकारसे भक्तिपूर्वक गङ्गाका आश्रय ग्रहण करना चाहिये। मृत्यु आज अथवा सौ वर्षोंके अन्तमे नियत और अवश्यम्भावी है। अत उससे पहले ही मोक्ष चाहनेवालेको भगवती गङ्गाका आश्रय ले लना चाहिये॥ २०॥ अति दुर्धर्ष यम जबतक अप्रत्याशित रूपसे आकर केशोको पकड नहीं लेता, उससे पहले ही गङ्गाका आश्रय ग्रहण कर लेना चाहिये॥ २१॥ मुने! पुत्र, मित्र तथा स्त्री आदि कोई भी [यथार्थ] बन्धु नहीं कहे जा सकते हैं। इस ससारसे मुक्त करनेवाली भगवती गङ्गा ही परम बन्धु हे॥ २२॥ दर्शन, स्पर्श, नाम-कीर्तन अथवा ध्यान करनेसे भी सुख और मोक्ष प्रदान करनेवाली भगवती गङ्गा परम बन्धु कही गयी हैं॥ २३॥ अत्यन्त घोर यम-यातनाके भयसे अभय प्रदान करनेवाली गङ्गाका जो आश्रय नहीं लेते, उन्हे आत्मघाती समझना चाहिये॥ २४॥ मोहबन्धनकी ओर प्रवृत्त करनेवाले पुत्र आदि सभी व्यर्थ हैं। गङ्गा ही शाश्वत मुक्ति देनेवाली हैं—ऐसा मानकर गङ्गाका आश्रय ग्रहण करना चाहिये॥ २५॥ निर्वाणपद देनेवाली गङ्गातक मरणासन्न व्यक्तिको पहुँचा देना चाहिये। इसस वह पहुँचानेवाला भी भगवती गङ्गाकी कृपासे मोक्ष प्राप्त कर लेता है॥ २६॥

'गङ्गा ही परम बन्धु हैं, गङ्गा ही परम सुख हैं, गङ्गा ही परम धन हैं, गङ्गा ही परम गति हे, गङ्गा ही परम मुक्ति हैं और गङ्गा ही परम तत्त्व हैं', जो लोग ऐसी भावना रखते हें, गङ्गा उनसे कभी भी दूर नहीं रहती हैं॥ २७-२८॥ 'गङ्गा'—ऐसा उच्चारण करनेवालेके पीछे-पीछे गङ्गा उसी प्रकार दौडती हैं, जैसे पूर्वकालमें भगीरथकी शङ्ख-ध्वनिसे गङ्गा उनके पीछे-पीछे चली थीं॥ २९॥ जो मनुष्य गङ्गाका तट छोडकर अन्यत्र निवास करता है, वह मानो अपने हाथमें स्थित मुक्तिका त्याग करके नरककी खोज करता है॥ ३०॥ वह देश धन्य है, जहाँ तीनों लोकोको पवित्र कर देनेवाली गङ्गा रहती हैं। जो देश गङ्गासे रहित है, उसे प्रशस्त देश नहीं कहा जा सकता॥ ३१॥ गङ्गाके तटपर रहते हुए भिक्षा माँगना भी श्रेष्ठ है तथा वहाँ प्राणान्त हो जाना भी श्रेयस्कर हैं। किंतु गङ्गाको छोडकर मनुष्यको अन्य स्थानपर राज्य प्राप्त करनेकी भी कामना नहीं करनी चाहिये॥ ३२॥

यस्मिन्देशे वसेदेको गङ्गाभक्तिपरो नर ।
सोऽपि पुण्यतमो देशस्तत्र दान महाफलम्॥ ३३॥

श्राद्ध च तर्पण तत्र पितृणा तृप्तिकारकम्।
अनन्तफलद ज्ञेय जपहोमादिक तथा॥ ३४॥

गङ्गा नाम पर सौख्य गङ्गा नाम पर तप ।
गङ्गेति सस्मरन्नित्य तस्य नास्ति यमाद्भयम्॥ ३५॥

गङ्गाकी भक्तिमे तत्पर रहनेवाला एक भी मनुष्य जिस देशमे रहता हे, वह देश भी परम पुण्यशाली हे और वहाँपर दिया गया दान महान् फल देनेवाला होता है। वहाँपर किया गया श्राद्ध तथा तर्पण पितरोको तृप्त करनेवाला होता हे। वहाँपर किये गये जप-होम आदिको अनन्त फल देनेवाला समझना चाहिये॥ ३३-३४॥ गङ्गाका नाम ही परम सुख है तथा गङ्गाका नाम परम तप हे। जो मनुष्य 'गङ्गा'—इस नामका नित्य स्मरण करता है, उसे यमराजका भय नहीं रहता॥ ३५॥

॥ इति श्रीमहाभागवते महापुराणे श्रीमहादेवनारदसवादे गङ्गामाहात्म्ये शृगालकवलितस्यारण्यमृतधनाधिपमासस्य गङ्गाजलस्पर्शेन धनाधिपमुक्तिपदगमन नाम चतु सप्ततितमोऽध्याय ॥ ७४॥

॥ इस प्रकार श्रीमहाभागवतमहापुराणके अन्तर्गत श्रीमहादेव-नारद-सवादमे गङ्गामाहात्म्यमे 'सियारके द्वारा खाये गये जगलमे मृत धनाधिपके मासका गङ्गाजलस्पर्शसे धनाधिप-मुक्तिपदगमन' नामक चौहत्तरवाँ अध्याय पूर्ण हुआ॥ ७४॥

पचहत्तरवाँ अध्याय

गङ्गाजीका अष्टोत्तरशतनामस्तोत्र तथा उसका माहात्म्य

श्रीनारद उवाच

गङ्गा नाम पर पुण्य कथित परमेश्वर।
नामानि कति शस्तानि गङ्गाया प्रणिशस मे॥ १॥

श्रीमहादेव उवाच

नाम्ना सहस्त्रमध्ये तु नामाष्टशतमुत्तमम्।
जाह्नव्या मुनिशार्दूल तानि मे शृणु तत्त्वत ॥ २॥
ॐ गङ्गा त्रिपथगा देवी शम्भुमौलिविहारिणी।
जाह्नवी पापहन्त्री च महापातकनाशिनी॥ ३॥
पतितोद्धारिणी स्त्रोतस्वती परमवेगिनी।
विष्णुपादाब्जसम्भूता विष्णुदेहकृतालया॥ ४॥
स्वर्गाब्धिनिलया साध्वी स्वर्णदी सुरनिम्नगा।
मन्दाकिनी महावेगा स्वर्णशृङ्गप्रभेदिनी॥ ५॥
देवपूज्यतमा दिव्या दिव्यस्थाननिवासिनी।
सुचारुनीररुचिरा महापर्वतभेदिनी॥ ६॥
भागीरथी भगवती महामोक्षप्रदायिनी।
सिन्धुसङ्गगता शुद्धा रसातलनिवासिनी॥ ७॥
महाभागा भोगवती सुभगानन्ददायिनी।
महापापहरा पुण्या परमाह्लाददायिनी॥ ८॥
पार्वती शिवपत्नी च शिवशीर्षगतालया।
शम्भोर्जटामध्यगता निर्मला निर्मलानना॥ ९॥

श्रीनारदजी बोले—परमेश्वर! आपने बताया कि 'गङ्गा' नाम परम पुण्यदायी है। गङ्गाके ओर भी कितने श्रेष्ठ नाम हैं, उन्हे मुझे बताइये॥ १॥

श्रीमहादेवजी बोले—मुनिश्रेष्ठ! गङ्गाके एक हजार नामोमे एक सौ आठ नाम अत्युत्तम हैं। आप मुझसे उन नामोको तत्त्वत सुन लीजिये—॥ २॥ १ [ओङ्कारस्वरूपिणी] गङ्गा, २ त्रिपथगा देवी, ३ शम्भुमौलिविहारिणी, ४ जाह्नवी, ५ पापहन्त्री, ६ महापातकनाशिनी, ७ पतितोद्धारिणी, ८ स्त्रोतस्वती, ९ परमवेगिनी, १० विष्णुपादाब्जसम्भूता, ११ विष्णुदेहकृतालया, १२ स्वर्गाब्धिनिलया, १३ साध्वी, १४ स्वर्णदी १५ सुरनिम्नगा, १६ मन्दाकिनी, १७ महावेगा, १८ स्वर्णशृङ्गप्रभेदिनी, १९ देवपूज्यतमा, २० दिव्या, २१ दिव्यस्थाननिवासिनी २२ सुचारुनीररुचिरा, २३ महापर्वतभेदिनी, २४ भागीरथी, २५ भगवती, २६ महामोक्षप्रदायिनी, २७ सिन्धुसङ्गगता, २८ शुद्धा, २९ रसातलनिवासिनी॥ ३—७॥ ३० महाभोगा, ३१ भोगवती, ३२ सुभगानन्ददायिनी, ३३ महापापहरा, ३४ पुण्या ३५ परमाह्लाददायिनी, ३६ पार्वती, ३७ शिवपत्नी, ३८ शिवशीर्षगतालया, ३९ शम्भोर्जटामध्यगता ४० निर्मला, ४१ निर्मलानना,

महाकलुषहन्त्री च जह्नुपुत्री जगत्प्रिया।
त्रैलोक्यपावनी पूर्णा पूर्णब्रह्मस्वरूपिणी॥ १०॥
जगत्पूज्यतमा चारुरूपिणी जगदम्बिका।
लोकानुग्रहकर्त्री च सर्वलोकदयापरा॥ ११॥
याम्यभीतिहरा तारा पारा ससारतारिणी।
ब्रह्माण्डभेदिनी ब्रह्मकमण्डलुकृतालया॥ १२॥
सौभाग्यदायिनी पुसा निर्वाणपददायिनी।
अचिन्त्यचरिता चारुरुचिरातिमनोहरा॥ १३॥
मर्त्यस्था मृत्युभयहा स्वर्गमोक्षप्रदायिनी।
पापापहारिणी दूरचारिणी वीचिधारिणी॥ १४॥
कारुण्यपूर्णा करुणामयी दुरितनाशिनी।
गिरिराजसुता गौरीभगिनी गिरिशप्रिया॥ १५॥
मेनकागर्भसम्भूता मैनाकभगिनीप्रिया।
आद्या त्रिलोकजननी त्रैलोक्यपरिपालिनी॥ १६॥
तीर्थश्रेष्ठतमा श्रेष्ठा सर्वतीर्थमयी शुभा।
चतुर्वेदमयी सर्वा पितृसतृप्तिदायिनी॥ १७॥
शिवदा शिवसायुज्यदायिनी शिववल्लभा।
तेजस्विनी त्रिनयना त्रिलोचनमनोरमा॥ १८॥
सप्तधारा शतमुखी सगरान्वयतारिणी।
मुनिसेव्या मुनिसुता जह्नुजानुप्रभेदिनी॥ १९॥
मकरस्था सर्वगता सर्वाशुभनिवारिणी।
सुदृश्या चाक्षुषीतृप्तिदायिनी मकरालया॥ २०॥
सदानन्दमयी नित्यानन्ददा नगपूजिता।
सर्वदेवाधिदेवैश्च परिपूज्यपदाम्बुजा॥ २१॥
एतानि मुनिशार्दूल नामानि कथितानि ते।
शस्तानि जाह्नवीदेव्या सर्वपापहराणि च॥ २२॥
य इद पठते भक्त्या प्रातरुत्थाय नारद।
गङ्गाया परम पुण्य नामाष्टशतमेव हि॥ २३॥
तस्य पापानि नश्यन्ति ब्रह्महत्यादिकान्यपि।
आरोग्यमतुल सौख्य लभते नात्र सशय॥ २४॥
यत्र कुत्रापि सस्नायात्पठेत्स्तोत्रमनुत्तमम्।
तत्रैव गङ्गास्नानस्य फल प्राप्नोति निश्चितम्॥ २५॥
प्रत्यह प्रपठेदेतद्गङ्गानामशताष्टकम्।
सोऽन्ते गङ्गामनुप्राप्य प्रयाति परम पदम्॥ २६॥

४२ महाकलुषहन्त्री, ४३ जह्नुपुत्री, ४४ जगत्प्रिया, ४५ त्रैलोक्यपावनी, ४६ पूर्णा, ४७ पूर्णब्रह्मस्वरूपिणी, ४८ जगत्पूज्यतमा, ४९ चारुरूपिणी, ५० जगदम्बिका, ५१ लोकानुग्रहकर्त्री, ५२ सर्वलोकदयापरा, ५३ याम्य-भीतिहरा, ५४ तारा, ५५ पारा, ५६ ससारतारिणी, ५७ ब्रह्माण्डभेदिनी, ५८ ब्रह्मकमण्डलुकृतालया॥ ८—१२॥ ५९ सौभाग्यदायिनी, ६० पुसा निर्वाणपददायिनी, ६१ अचिन्त्यचरिता, ६२ चारुरुचिरातिमनोहरा, ६३ मर्त्यस्था, ६४ मृत्युभयहा, ६५ स्वर्गमोक्षप्रदायिनी, ६६ पापापहारिणी, ६७ दूरचारिणी, ६८ वीचिधारिणी, ६९ कारुण्यपूर्णा, ७० करुणामयी, ७१ दुरितनाशिनी, ७२ गिरिराजसुता, ७३ गौरीभगिनी, ७४ गिरिशप्रिया ७५ मेनकागर्भसम्भूता, ७६ मैनाकभगिनीप्रिया, ७७ आद्या, ७८ त्रिलोकजननी, ७९ त्रैलोक्यपरिपालिनी, ८० तीर्थश्रेष्ठतमा, ८१ श्रेष्ठा, ८२ सर्वतीर्थमयी, ८३ शुभा, ८४ चतुर्वेदमयी, ८५ सर्वा, ८६ पितृसतृप्तिदायिनी ॥ १३—१७॥ ८७ शिवदा ८८ शिवसायुज्यदायिनी, ८९ शिववल्लभा, ९० तेजस्विनी, ९१ त्रिनयना, ९२ त्रिलोचनमनोरमा, ९३ सप्तधारा, ९४ शतमुखी ९५ सगरान्वयतारिणी, ९६ मुनिसेव्या, ९७ मुनिसुता ९८ जह्नुजानुप्रभेदिनी, ९९ मकरस्था, १०० सर्वगता, १०१ सर्वाशुभनिवारिणी, १०२ सुदृश्या, १०३ चाक्षुषी-तृप्तिदायिनी, १०४ मकरालया, १०५ सदानन्दमयी, १०६ नित्यानन्ददा, १०७ नगपूजिता १०८ सर्वदेवाधिदेवै परिपूज्यपदाम्बुजा॥ १८—२१॥

मुनिश्रेष्ठ! मैंने आपसे भगवती गङ्गाके ये श्रेष्ठ नाम बता दिये। ये नाम समस्त पापोका विनाश करनेवाले हैं॥ २२॥ नारद! जो व्यक्ति प्रात काल उठकर गङ्गाके इन परम पुण्य देनेवाले एक सौ आठ नामोको भक्तिपूर्वक पढता है, उसके ब्रह्महत्या आदि पाप भी नष्ट हो जाते हैं तथा वह अतुलनीय आरोग्य एव सुख प्राप्त करता है, इसम कोई सदेह नहीं है॥ २३-२४॥ जहाँ-कहीं भी स्नान करके मनुष्य यदि इस उत्तम स्तोत्रका पाठ करे तो उस वहींपर गङ्गास्नानका फल निश्चितरूपसे प्राप्त हो जाता है॥ २५॥ जो मनुष्य गङ्गाके एक सौ आठ नामावाल स्तात्रका प्रतिदिन पाठ करता है, वह अन्तमें

गङ्गायां स्नानसमये य पठेद्भक्तिसयुत ।
सोऽश्वमेधसहस्राणा फलमाप्नोति मानव ॥ २७ ॥

गवामयुतदानस्य यत्फल समुदीरितम्।
तत्फल समवाप्नोति पञ्चम्या प्रपठन्नर ॥ २८ ॥

कार्तिक्या पौर्णमास्या तु स्नात्वा सागरसङ्गमे।
य पठेत्स महेशत्व याति सत्य न सशय ॥ २९ ॥

सिन्धुना तीर्थराजेन सर्वतीर्थमयी स्वयम्।
सगता समभूद्यत्र तीर्थं नास्ति ततोऽधिकम्॥ ३० ॥

अन्यत्र जाह्नवीतीर्थे निर्वाण ज्ञानतो भवेत्।
वाराणस्या स्थले वापि जले वा मुनिसत्तम॥ ३१ ॥

ज्ञानादज्ञानतश्चापि विज्ञान परिकल्पितम्।
स्थले वा जाह्नवीतोये गगनेऽज्ञानतोऽपि च।
अज्ञानादपि सत्यज्य देह मुक्तिमवाप्नुयात्॥ ३२ ॥

तत्र त्यजति यो देह नरोऽन्यस्येच्छया मुने।
सोऽपि निर्वाणमाप्नोति महातीर्थप्रसादत ॥ ३३ ॥

तीर्थश्रेष्ठतमा गङ्गा नृणा सर्वार्थसाधिनीम्।
शक्तीं नीरमयीं मूर्ति लोकनिस्तारकारिणीम्॥ ३४ ॥

अविद्याछेदिनीं देवीं ब्रह्मविद्याप्रदायिनीम्।
गृहीत इव केशेषु मृत्युना समुपाश्रयेत्॥ ३५ ॥

इत्युक्त ते मुनिश्रेष्ठ गङ्गामाहात्म्यमुत्तमम्।
पवित्र परम गुह्य महापातकनाशनम्॥ ३६ ॥

यश्चैतन्महदाख्यान प्रपठेद्भक्तिसयुत ।
स देव्या पदवी याति मुने नास्त्यत्र सशय ॥ ३७ ॥

यत्रैतत्पठ्यते पुण्य गङ्गामाहात्म्यमुत्तमम्।
तत्र गङ्गा वसेत्साक्षात्सर्वतीर्थै समावृता॥ ३८ ॥

अत्र यत्क्रियते कर्म दैव पित्र्य च मानवै ।
तदक्षयतमं लोके फलद परिकीर्तितम्॥ ३९ ॥

गङ्गाको प्राप्त होकर परमपद प्राप्त कर लेता है॥ २६॥ जो मनुष्य गङ्गामे स्नानके समय भक्तिपरायण होकर इसका पाठ करता है, वह हजारो अश्वमेधयज्ञोका फल प्राप्त करता है॥ २७॥ पञ्चमी तिथिको इसका पाठ करनेवाला मनुष्य वह फल प्राप्त करता है जो फल दस हजार गायाके दानका कहा गया है॥ २८॥ कार्तिक पूर्णिमाको गङ्गासागरसङ्गममे स्नान करके जो मनुष्य इसका पाठ करता है, वह शिवत्वको प्राप्त हो जाता है, यह सच है, इसमे कोई सशय नहीं है॥ २९॥ स्वय सर्वतीर्थमयी गङ्गाने जहाँ समुद्र तथा तीर्थराजके साथ सङ्गम किया है, उससे बढकर कोई तीर्थ नहीं है॥ ३०॥ दूसरे स्थानके गङ्गातीर्थमें ज्ञानसे मुक्ति होती है, किंतु मुनिश्रेष्ठ! वाराणसीमें भूमिपर अथवा जलमे कहीं भी ज्ञान या अज्ञानपूर्वक विज्ञानकी प्राप्ति कही गयी है। यहाँ स्थलपर, गङ्गाजलमे अथवा आकाशमे ज्ञान या अज्ञान किसी भी तरहसे शरीरका त्याग करके मनुष्य मुक्ति प्राप्त कर लेता है। मुने! वहाँपर जो मनुष्य किसी अन्य (पुरुषार्थ)-की इच्छासे भी देहत्याग करता है, वह भी महातीर्थकी कृपासे मोक्ष प्राप्त कर लेता है॥ ३१—३३॥

मृत्युने मेरे केशोको पकड रखा है—ऐसा सोचकर मनुष्यको तीर्थोंमे सर्वश्रेष्ठ, मनुष्योके सभी कार्योंको सिद्ध करनेवाली, शक्तिस्वरूपिणी, जलमयी मूर्ति, लोकोका उद्धार करनेवाली, अविद्याका नाश करनेवाली तथा ब्रह्मविद्या प्रदान करनेवाली भगवती गङ्गाका आश्रय ग्रहण करना चाहिये॥ ३४-३५॥

मुनिश्रेष्ठ! इस प्रकार मैंने आपसे उत्तम, परम पवित्र, गुप्त तथा महापातकोका नाश करनेवाले गङ्गामाहात्म्यका वर्णन कर दिया॥ ३६॥ मुने! जो मनुष्य भक्तिसे युक्त होकर इस उत्तम आख्यानको पढता है, वह भगवती गङ्गाके दिव्य धामको प्राप्त हो जाता है, इसमे सदेह नहीं है॥ ३७॥ जिस स्थानपर इस पवित्र गङ्गामाहात्म्यका पाठ किया जाता है, वहाँपर गङ्गा सभी तीर्थोंके साथ प्रत्यक्षरूपसे निवास करती हैं। यहाँ मनुष्य जो भी देवकार्य या पितृकार्य करता है, वह कर्म इस लोकमे अक्षय फल देनेवाला कहा गया है॥ ३८-३९॥

लिखित तिष्ठते यत्र पुण्याख्यानमिद मुने।
तद्देश न स्पृशेत्पाप भयात्सत्य न सशय ॥ ४० ॥

आसन्ने मृत्युकाले तु भक्त्या य शृणुयान्नर ।
न मृत्युवशतामेति स याति परमा गतिम् ॥ ४१ ॥

एकादश्या कृतस्नानस्तुलसीबिल्वसनिधौ।
उपोष्य प्रपठेदेतत्स याति परमा गतिम् ॥ ४२ ॥

पितृश्राद्धदिने यस्तु पठेद्विप्रस्य सनिधौ।
तस्य तृप्तिमुपायान्ति पितर शाश्वतीं मुने ॥ ४३ ॥

महाष्टम्या निशीथे तु प्रपठेन्मानवोत्तम ।
स याति परम सौख्य महादेव्या प्रसादत ॥ ४४ ॥

आत्यन्तिक मुनिश्रेष्ठ फलमेतस्य कथ्यते।
नैतस्य सदृश लोके पुण्याख्यान प्रगीयते ॥ ४५ ॥

महापापहर पुण्य स्मृत पुण्यतमादपि।
एतदाख्यानमाकर्ण्य नर स्वर्गमवाप्नुयात् ॥ ४६ ॥

मुने! यह पावन आख्यान जहाँ लिखा हुआ स्थित रहता है, पाप उस स्थानको भयके मारे स्पर्शतक नहीं करता है, यह बात सत्य है, इसम कोई सशय नहीं है ॥ ४० ॥ मरणासन्न-स्थितिमे पडा हुआ जो मनुष्य भक्तिपूर्वक इसका श्रवण करता है, वह मृत्युके अधीन नहीं होता और परम गतिको प्राप्त होता है ॥ ४१ ॥ एकादशी तिथिको स्नान करके जो व्यक्ति उपवासपूर्वक तुलसी या बिल्ववृक्षके समीप बैठकर इसे ध्यानपूर्वक पढता है, वह परम गति प्राप्त करता है ॥ ४२ ॥ मुने! जो मनुष्य पितरोके श्राद्धके दिन ब्राह्मणके सानिध्यमें इसका पाठ करता है, उसके पितर शाश्वत तृप्ति प्राप्त करते हैं ॥ ४३ ॥ जो श्रेष्ठ मानव महाष्टमीकी अर्धरात्रिम इसे ध्यानपूर्वक पढता है, वह महादेवी गङ्गाकी कृपासे परम आनन्दको प्राप्त हो जाता है ॥ ४४ ॥ मुनिश्रेष्ठ! इस आख्यानके पाठका अनन्त फल कहा गया है। ससारमें इसके समान पुण्य प्रदान करनेवाला कोई भी आख्यान नहीं बताया जाता है ॥ ४५ ॥ यह आख्यान महापापोका हरण करनेवाला तथा पुण्यतमसे भी अधिक पुण्यदायी कहा गया है। इस आख्यानका श्रवण करके मनुष्य स्वर्गलोक [परम गति] प्राप्त कर लेता है ॥ ४६ ॥

॥ इति श्रीमहाभागवते महापुराणे श्रीमहादेवनारदसवादे श्रीगङ्गादेव्या अष्टोत्तरशतनामपूर्वकमाहात्म्यवर्णने पञ्चसप्ततितमोऽध्याय ॥ ७५ ॥

॥ इस प्रकार श्रीमहाभागवतमहापुराणके अन्तर्गत श्रीमहादेव-नारद-सवादमे 'श्रीगङ्गादेवीका अष्टोत्तरशतनामपूर्वकमाहात्म्यवर्णन' नामक पचहत्तरवाँ अध्याय पूर्ण हुआ ॥ ७५ ॥

छिहत्तरवाँ अध्याय

कामरूपतीर्थ (कामाख्या-शक्तिपीठ)-के माहात्म्यका वर्णन

श्रीनारद उवाच

प्रभो देव जगन्नाथ श्रुत्वा तव मुखाम्बुजात्।
गङ्गामाहात्म्यमतुल पवित्रोऽस्मि न सशय ॥ १ ॥
भूयस्ते श्रोतुमिच्छामि माहात्म्यमतिविस्तरात्।
कामरूपस्य तीर्थस्य तत् समाचक्ष्व साम्प्रतम् ॥ २ ॥

श्रीमहादेव उवाच

शृणु सावहितो वक्ष्ये माहात्म्य मुनिसत्तम।
कामरूपस्य तीर्थस्य यत्र साक्षात्स्वय शिवा।
प्रत्यक्षफलदा मर्त्ये स्थान नास्ति ततोऽधिकम् ॥ ३ ॥

श्रीनारदजी बोले—प्रभो! देव! जगन्नाथ! आपके मुखकमलसे भगवती गङ्गाके अतुलनीय माहात्म्यको सुनकर मैं पवित्र हो गया हूँ, इसमे कोई सदेह नहीं है। पुन आपसे कामरूपतीर्थका माहात्म्य अत्यन्त विस्तारपूर्वक सुनना चाहता हूँ। अब आप उसे सुनायें ॥ १-२ ॥

श्रीमहादेवजी बोले—मुनिश्रेष्ठ! आप सावधान होकर सुनिये। मैं कामरूपतीर्थका माहात्म्य बताता हूँ जहाँ प्रत्यक्ष फल देनेवाली साक्षात् भगवती शिवा स्वय विराजमान हैं। मृत्युलोकमे इससे

यत्र देवा सगन्धर्वा ब्रह्माद्याश्च सुरोत्तमा ।
प्रत्यह समुपागत्य सेवन्ते भक्तितत्परा ॥ ४ ॥

योनिरूपा महामाया पूर्णाद्या परमेश्वरी।
पृथ्व्या लोकहितार्थाय यत्रास्ते निजलीलया॥ ५ ॥

यत्राकार्षीत्तप पूर्वं ब्रह्मा विष्णुस्तथेश्वर ।
अभीप्सुर्भगवत्यास्तु कामाक्ष्ये मुनिसत्तम॥ ६ ॥

यत्र कृत्वा पुरश्चर्यां वसिष्ठो मुनिसत्तम ।
सिद्धमन्त्रोऽभवत्पूर्वं सृष्टिकर्त्रेव चापर ॥ ७ ॥

अव्याहताज्ञा ये चान्ये सिद्धा देवर्षयस्तथा।
ते सर्वे मुनिशार्दूल कामाख्याया प्रसादत ॥ ८ ॥

सिद्धमन्त्रा समभवस्तत्र जप्त्वा महामनुम्।
खेचरत्वमनुप्रापुस्तथा देवाधिपूज्यताम्॥ ९ ॥

योनिरूपा भगवतीं सुगुप्ता मुनिसत्तम।
दृष्ट्वा स्पृष्ट्वा सुसम्पूज्य जीवन्मुक्तो भवेन्नर ॥ १०॥

विहरेत्पृथिवीपृष्ठे शूलपाणिरिवापर ।
निग्रहानुग्रहे शक्तो देवानामपि नारद॥ ११॥

तदाज्ञावशगा सर्वे देवा इन्द्रपुरोगमा ।
नासाध्य विद्यते तस्य मुने लोकत्रये तथा॥ १२॥

तस्यैव जन्म सफल यो गत्वा योनिमण्डले।
प्रणमेत्परया भक्त्या देवीं त्रिपुरभैरवीम्॥ १३॥

क्षेत्रस्पर्शनमात्रेण ब्रह्महापि नर क्षणात्।
मुच्यते नात्र सदेह कामाख्याया प्रसादत ॥ १४॥

कामाख्यादर्शन वत्स देवानामपि दुर्लभम्।
तद्य पश्यति कामाख्या स देवपरिपूजित ॥ १५॥

जन्मान्तरसहस्रैस्तु सचित पापपुञ्जकम्।
क्षणेन भस्मसात्कुर्यात्कामाख्याया प्रदर्शनम्॥ १६॥

गोपनीय त्वया वत्स नान्यत्रैतत्प्रकाश्यताम्।
कामाख्यासदृश तीर्थं नास्त्येव धरणीतले॥ १७॥

उत्तम कोई तीर्थ नहीं है जहाँ गन्धर्वोसहित देवगण तथा ब्रह्मादि श्रेष्ठ देवता प्रतिदिन आकर भक्तिपूर्वक पूजा करते हैं और जहाँ पृथ्वीपर लोगोके कल्याणके लिये योनिरूपमे महामाया पूर्णा आदिशक्ति परमेश्वरी लीलापूर्वक विराजती हैं॥ ३—५॥ मुनिश्रेष्ठ! पूर्वमे भगवतीके प्रत्यक्ष दर्शनकी इच्छा रखनेवाले पितामह ब्रह्मा, विष्णु तथा भगवान् शकरने उस कामाक्ष्य-क्षेत्रम तप किया था॥ ६॥ पूर्व कालमे जहाँ मुनिश्रेष्ठ वसिष्ठजीने पुरश्चरण करके मन्त्रकी सिद्धि प्राप्त कर ली और वे दूसरे सृष्टिकर्ताकी भाँति हो गये। मुनिश्रेष्ठ! जो अन्य देवता, ऋषिगण तथा सिद्धगण अव्याहत आज्ञावाले हुए हैं वे सभी भगवती कामाख्याकी कृपासे ही हुए हैं। व भगवती कामाख्याके महामन्त्रका जप करके मन्त्रसिद्ध हुए, उन्होने आकाशमे विचरण करनेकी शक्ति प्राप्त की तथा देवताओके द्वारा पूज्य हो गये॥ ७—९॥

मुनिश्रेष्ठ! मनुष्य योनिरूपा, अतिगोपनीय भगवती कामाख्याका दर्शन, स्पर्श और पूजन करके जीवन्मुक्त हो जाता हे और दूसरे शकरकी तरह पृथ्वीतलपर विचरण करता है। नारद! वह देवताओको भी दण्डित तथा पुरस्कृत करनेमे समर्थ हो जाता है। मुने! इन्द्र आदि सभी प्रमुख देवगण उसकी आज्ञाके अधीन हो जाते हैं। उसके लिये तीनो लोकोमें कुछ भी असाध्य नहीं हे॥ १०—१२॥ जो मनुष्य योनिमण्डलमे जाकर परम देवी त्रिपुरभैरवी [कामाख्या]-को भक्तिपूर्वक प्रणाम करता है, उसका ही जन्म सफल होता है॥ १३॥ ब्रह्महत्या करनेवाला मनुष्य भी भगवती कामाख्याके पुण्यक्षेत्रका स्पर्श करनेमात्रसे उनकी कृपासे क्षणभरमे पापसे मुक्त हो जाता है, इसम कोई सदेह नहीं है॥ १४॥ वत्स! भगवती कामाख्याका दर्शन देवताओके लिये भी दुर्लभ है। जो व्यक्ति उनका दर्शन करता है, वह देवताओके द्वारा विशेषरूपसे पूजित होता है॥ १५॥ हजारो जन्म-जन्मान्तरमे किये हुए सञ्चित पापसमूह भगवती कामाख्याके दर्शनमात्रसे क्षणभरमें ही भस्मीभूत हो जाते हें॥ १६॥ वत्स! इस पृथ्वीतलपर देवी भगवती कामाख्याके शक्तिपीठके समान कोई तीर्थ नहीं है। यह गोपनीय रहस्य आपको अन्यत्र प्रकाशित नहीं करना चाहिये॥ १७॥

अङ्गप्रत्यङ्गपातेन सत्या पुण्यतमो मुने।
देशो भारतखण्डेऽस्मिन्नृणा पापप्रणाशक ॥ १८॥

अङ्गेषु भगवत्यास्तु योनि श्रेष्ठतमा यत ।
योनिरूपा हि सा देवी सर्वासु स्त्रीष्ववस्थिता॥ १९॥

सा योनि पतिता यत्र तत्र साक्षात्स्वय सती।
तेन नास्ति सम स्थान पुण्यद धरणीतले॥ २०॥

शम्भुर्वाराणसीक्षेत्रे नराणा मुक्तिदायक ।
आराध्य सिद्धगन्धर्वैर्देवकिन्नरराक्षसै ॥ २१॥

स शम्भु काङ्क्षते यत्र मुक्ति तस्मान्महेश्वरीम्।
प्रत्यह समुपागत्य स्थान नास्ति ततोऽधिकम्॥ २२॥

प्रदक्षिण कृत येन तीर्थं श्रीयोनिमण्डलम्।
कृत लोकत्रय तेन प्रदक्षिणमशेषत ॥ २३॥

निर्माल्य शिरसा यस्तु कामाख्याया प्रधारयेत्।
स देवपूज्यतामेत्य विहरेद्भैरवोपम ॥ २४॥

न तस्य विद्यते भीति कुत्रापि धरणीतले।
भयदा प्रपलायन्ते भयात्तस्य सुदूरत ॥ २५॥

प्रसादो येन केनापि दत्तो देव्या महामुने।
प्राप्तिमात्रेण भोक्तव्यो नात्र कार्या विचारणा॥ २६॥

उत्तमोऽपि मुने वर्णो न्यूनवर्णादवाप्य वै।
प्रसाद भक्षयेद्भक्त्या नत्वा च शिरसा पुन ।
विभूति समवाप्नोति कैवल्य तत्प्रसादत ॥ २७॥

तत्र श्राद्ध कृत येन पितॄणा तृप्तिमिच्छता।
गयाश्राद्ध कृत तेन सहस्राब्द न सशय ॥ २८॥

लौहित्ये तु कृतस्नान प्रयत साधकोत्तम ।
पुरश्चर्यां नर कृत्वा सिद्धमन्त्रो भवेद्ध्रुवम्॥ २९॥

अव्याहताज्ञ स भवेन्महेश्वर इवापर ।
भूचर खेचरत्व च प्राप्नुयात्तत्प्रसादत ॥ ३०॥

मुने! इस भारतवर्षमे भगवती सतीके अङ्ग-प्रत्यङ्गके गिरनेसे यह देश मनुष्योंके पापोका नाश करनेवाला तथा पुण्यमय है॥ १८॥ भगवतीके सभी अङ्गोमे योनि-अङ्ग सर्वश्रेष्ठ है, क्योकि वे देवी योनिरूपमे सभी स्त्रियोंमें अवस्थित हैं॥ १९॥ वह योनि जिस स्थानपर गिरी, वहाँ साक्षात् स्वय भगवती सती प्रतिष्ठित हैं। इस पृथ्वीपर उसके समान पुण्यदायक कोई स्थान नहीं है॥ २०॥ सिद्धा, गन्धर्वों, देवताओ, किन्नरों और राक्षसोंके आराध्य भगवान् शकर वाराणसी (काशी)-क्षेत्रमे प्राणियोंको मुक्ति देनेवाले हैं, वे भगवान् शकर भी जहाँ महेश्वरी कामाख्याके पास प्रतिदिन आकर मुक्ति प्रदान करनेकी सामर्थ्य प्राप्त करनेकी आकाङ्क्षा करते हैं, उससे बढकर पवित्र स्थान अन्य कोई नहीं है॥ २१-२२॥

जिसने श्रीयोनिमण्डल तीर्थकी प्रदक्षिणा कर ली, उसने तीनो लोकोकी पूर्णरूपसे प्रदक्षिणा कर ली॥ २३॥ जो भगवती कामाख्याका निर्माल्य सिरपर धारण करता है वह देवताओके द्वारा पूजित होकर भैरवके समान विचरण करता है। इस पृथ्वीतलपर कहीं भी उसको भय नहीं है। उसके भयसे भय प्रदान करनेवाले बहुत दूर भाग जाते हैं॥ २४-२५॥ महामुने! जिस किसीके द्वारा देवी भगवतीका दिया गया प्रसाद प्राप्त होते ही ग्रहण कर लेना चाहिये, इसमें विचार करनेकी आवश्यकता नहीं है॥ २६॥ मुने! उत्तम वर्णका व्यक्ति भी निम्न वर्णके व्यक्तिसे प्राप्त भगवतीके प्रसादको भक्तिपूर्वक सिरसे प्रणाम करके उसे ग्रहण कर लेता है तो वह भगवतीकी कृपासे तत्क्षण ऐश्वर्य और मुक्ति प्राप्त कर लेता है॥ २७॥ अपने पितरोकी तृप्तिकी इच्छासे जिसने उस शक्तिपीठमे श्राद्ध किया, उसने मानो हजार वर्षोंतक गयाश्राद्ध कर लिया, इसम कोई सदेह नहीं है॥ २८॥ जो जितेन्द्रिय उत्तम साधक ब्रह्मपुत्र नदमें स्नान करके भगवतीके मन्त्रका पुरश्चरण करता है, उसका मन्त्र निश्चित ही सिद्ध हो जाता है, वह अमोघ आज्ञावाला होकर दूसरे भगवान् शकरके समान हो जाता है और उनके अनुग्रहसे पृथ्वीपर चलनेवाला आकाशचारी हो जाता है॥ २९-३०॥

कालादींस्तत्र मोहेन कदाचिन्न विचारयेत्।
पुरश्चर्याविधौ मन्त्री विचार्य नरक व्रजेत्॥ ३१॥

सुरत्व, सुरराजत्व ब्रह्मत्व वा शिवत्वकम्।
विष्णुत्व सुलभ तत्र जपता भैरवीमनुम्॥ ३२॥

जमदग्निसुतो राम कार्तवीर्यवधेच्छया।
तत्र कृत्वा पुरश्चर्यां प्रत्यक्ष विष्णुतामगात्॥ ३३॥

तथैव भुवि ये चान्ये कुर्युस्तत्र पुरस्क्रियाम्।
ते सर्वे समतामेत्य अन्ते मोक्षमवाप्नुयु ॥ ३४॥

कामाख्या परम तीर्थ कामाख्या परम तप ।
कामाख्या परमो धर्म कामाख्या परमा गति ॥ ३५॥

कामाख्या परम वित्त कामाख्या परम पदम्।
विभाव्येव मुनिश्रेष्ठ न पुनर्जन्मभाग्भवेत्॥ ३६॥

दर्शन वहुसाहस्त्रयजन्मान्तरसुसचितम्।
विद्यते सुमहत्पुण्य यस्य तस्यैव जायते॥ ३७॥

तीर्थं - श्रीकामरूपाख्य देवानामपि दुर्लभम्।
अन्येषा दुर्लभ ज्ञेय देवीलोक यथा मुने॥ ३८॥

भगवती कामाख्याके शक्तिपीठमे मन्त्र जपनेवाले व्यक्तिको अज्ञानवश भी पुरश्चरणकी विधिमे काल आदि मुहूर्तका विचार नहीं करना चाहिये। यदि वह ऐसा विचार करता हे तो नरकमे जाता हे॥ ३१॥

शक्तिपीठमे भगवती भैरवीका मन्त्र जपनेवालोको सुरत्व, इन्द्रत्व, ब्रह्मत्व, शिवत्व अथवा विष्णुत्व सुलभतासे प्राप्त हो जाता है॥ ३२॥ कार्तवीर्यको मारनेकी इच्छासे जमदग्नि ऋषिके पुत्र परशुरामने उन्हीं भगवती कामाख्याके शक्तिपीठमे पुरश्चरण करके साक्षात् विष्णुरूपताको प्राप्त किया था॥ ३३॥ उसी प्रकार पुरश्चरणविधिसे जो अन्य लोग पृथ्वीपर भगवती कामाख्याके शक्तिपीठमे मन्त्र जपते हैं, वे अन्तमे देवी भगवतीकी सारूप्य मुक्ति प्राप्त करते हैं॥ ३४॥ मुनिश्रेष्ठ! कामाख्या सर्वश्रेष्ठ तीर्थ है, कामाख्या सर्वश्रेष्ठ तपस्या है, कामाख्या सर्वश्रेष्ठ धर्म हे, कामाख्या परम गति है, कामाख्या सर्वश्रेष्ठ धन है तथा कामाख्या परम पद है—इस प्रकारकी भावना करनेवाले (मनुष्य)-का पुनर्जन्म नहीं होता॥ ३५-३६॥ जिस मनुष्यके अनेक सहस्रजन्मोके सचित महान् पुण्य होते हैं, उसीको भगवतीका दर्शन होता है॥ ३७॥ मुने! जिस प्रकार देवीलोक अन्य लोगोके लिये दुर्लभ कहा गया है, उसी प्रकार भगवती कामाख्याका श्रीकामरूप नामक [शक्तिपीठ] तीर्थ देवताओके लिये भी दुर्लभ है॥ ३८॥

॥ इति श्रीमहाभागवते महापुराणे श्रीमहादेवनारदसवादे कामाख्यामाहात्म्यवर्णने षट्सप्ततितमोऽध्याय ॥ ७६॥

॥ इस प्रकार श्रीमहाभागवतमहापुराणके अन्तर्गत श्रीमहादेव-नारद-सवादमे 'कामाख्यामाहात्म्यवर्णन' नामक छिहत्तरवाँ अध्याय पूर्ण हुआ॥ ७६॥

सतहत्तरवाँ अध्याय

कामरूपतीर्थमे प्रतिष्ठित दस महाविद्याओका वर्णन तथा कामाख्याकवच

श्रीनारद उवाच

कामरूपे महाक्षेत्रे काऽधिष्ठात्री महेश्वरी।
विद्याना दशमूर्तीना तन्मे ब्रूहि महेश्वर॥ १॥

श्रीमहादेव उवाच

दशैवैता महाविद्या क्षेत्रस्था मुनिसत्तम।
साधकाना हितार्थाय जपपूजाफलप्रदा ॥ २॥

श्रीनारदजी बोले—महेश्वर! कामरूप महाक्षेत्रमे दस महाविद्याओकी अधिष्ठात्री देवी महेश्वरी कौन हैं? उनके विषयमे हमे बताइये॥ १॥

श्रीमहादेवजी बोले—मुनिश्रेष्ठ! साधकोके हितसम्पादनके लिये जप ओर पूजाका फल प्रदान करनेवाली ये दसो महाविद्याएँ इस शक्तिपीठमे स्थित हैं॥ २॥

कामाख्या कालिका देवी स्वयमाद्या सनातनी।
तस्याः पार्श्वे स्थिताश्चान्या नव विद्या महामते॥ ३ ॥

सर्वविद्यात्मिका काली कामाख्यारूपिणी यतः ।
ततस्तां तत्र सम्पूज्य पूजयित्वेष्टदेवताम्।
इष्टमन्त्रं जपेद्भक्त्या सिद्धमन्त्रो भवेत्तदा॥ ४ ॥

ध्यायतां परमेशानीं कामाख्यां कालिकां पराम्।
रक्तवस्त्रपरीधानां घोरनेत्रत्रयोज्ज्वलाम्॥ ५ ॥

चतुर्भुजां भीमदंष्ट्रां युगान्तजलदद्युतिम्।
मणिसिंहासने न्यस्तां सिंहप्रेताम्बुजस्थिताम्॥ ६ ॥

हरिः सिंहः शवः शम्भुर्ब्रह्मा कमलरूपधृक्।
ललज्जिह्वां महाघोरां किरीटकनकोज्ज्वलाम्॥ ७ ॥

अनर्घ्यमणिमाणिक्यघटितैर्भूषणोत्तमैः ।
अलंकृतां जगद्धात्रीं सृष्टिस्थित्यन्तकारिणीम्॥ ८ ॥

वामे तारा भगवती दक्षिणे भुवनेश्वरी।
अग्नौ तु षोडशीविद्या नैर्ऋत्यां भैरवी स्वयम्॥ ९ ॥

वायव्यां छिन्नमस्ता च पृष्ठतो बगलामुखी।
ऐशान्यां सुन्दरी विद्या चोर्ध्वं मातङ्गनायिका॥ १० ॥

याम्यां धूमावती विद्या महापीठस्य नारद।
अधस्ताद्भगवान्रुद्रो भस्माचलमयः स्वयम्॥ ११ ॥

ब्रह्मविष्णुमुखाश्चान्ये देवाः शक्तिसमन्विताः ।
सदा संनिहितास्तत्र पीठे लोके सुदुर्लभे॥ १२ ॥

तत्र सम्पूजयेद्देवीं परिवारसमन्विताम्।
विविधैरुपचारैश्च यथाविभवविस्तरैः ॥ १३ ॥

इच्छन्देव्याः परां प्रीतिं सद्भक्त्या प्रयतो नरः ।
न पुनर्जननाशङ्का विद्यते मुनिसत्तम॥ १४ ॥

बिल्वपत्रं महादेव्यै यो दद्याद्भक्तिभावतः ।
स साक्षाच्छंकरो ज्ञेयः सर्वलोकेश्वरेश्वरः ॥ १५ ॥

त्रिपत्रं बिल्वपत्रं तु ब्रह्मविष्णुशिवात्मकम्।
यदात्मकमिदं सर्वं जगत्स्थावरजङ्गमम्॥ १६ ॥

महामते! भगवती कामाख्या ही स्वयं आदिशक्ति सनातनी देवी कालिका हैं। उनके बगलमें अन्य नौ महाविद्याएँ प्रतिष्ठित हैं॥ ३ ॥ सर्वविद्यात्मिका काली ही कामाख्यारूपिणी हैं। उस शक्तिपीठमें उनकी तथा अपने इष्टदेवताकी पूजा करके भक्तिपूर्वक जो इष्ट मन्त्रका जप करता है, उसका मन्त्र सिद्ध हो जाता है॥ ४ ॥ जो रक्तवस्त्र धारण करनेवाली, तीन भयंकर नेत्रोंसे सुशोभित, चार भुजाओं और विकराल दन्तावली तथा प्रलयकालीन मेघोंकी आभासे सुशोभित हैं, जो मणिसिंहासनपर विराजमान हैं और सिंह, प्रेत तथा कमलपर आसीन हैं—ऐसी परमेश्वरी महाकालिका भगवती कामाख्याका ध्यान करनेवाले भक्तोंके लिये भगवतीका वाहन सिंह विष्णुस्वरूप, शव शिवस्वरूप तथा कमल ब्रह्मस्वरूप हो जाता है। लपलपाती जिह्वावाली, अत्यन्त घोरस्वरूपिणी, स्वर्णकिरीटसे प्रकाशित, बहुमूल्य मणि-माणिक्यसे जटित उत्तम आभूषणोंसे अलंकृत तथा सृष्टि-पालन-संहार करनेवाली जगद्धात्री कामाख्याकी सदा उपासना करनी चाहिये॥ ५—८ ॥

नारद! इस महापीठके वामभागमें भगवती तारा, दक्षिणभागमें भुवनेश्वरी, अग्निकोणमें षोडशीविद्या, नैर्ऋत्यकोणमें स्वयं भैरवी, वायव्यकोणमें छिन्नमस्ता, पृष्ठभागमें बगलामुखी, ईशानकोणमें सुन्दरी विद्या, ऊर्ध्व भागमें मातङ्गनायिका तथा दक्षिणभागमें धूमावती विद्या प्रतिष्ठित हैं। नीचेके भागमें भस्माचलस्वरूप स्वयं भगवान् शंकर विराजमान हैं॥ ९—११ ॥ पितामह ब्रह्मा तथा भगवान् विष्णु और जो अन्य प्रमुख देवता हैं, वे सभी शक्तिसे समन्वित होकर भगवती कामाख्याके लोकदुर्लभ शक्तिपीठमें निरन्तर प्रतिष्ठित रहते हैं॥ १२ ॥ मुनिश्रेष्ठ! भगवतीको परम प्रसन्न करनेकी इच्छावाला जो जितेन्द्रिय व्यक्ति भक्तिपूर्वक अपनी शक्तिके अनुसार प्राप्त वैभवके अनुकूल विविध उपचारोंसे शक्तिपीठमें परिकरसहित भगवतीकी पूजा करता है, उसको पुनर्जन्मकी आशंका नहीं रहती॥ १३-१४ ॥ जो व्यक्ति भक्तिभावसे महादेवी भगवतीको बिल्वपत्र अर्पित करता है, उसे साक्षात् सर्वलोकेश्वरेश्वर शंकर ही जानना चाहिये॥ १५ ॥ तीन पत्तेवाला बिल्वपत्र ब्रह्मा, विष्णु और शिवात्मक है। यह जड-चेतनरूप समस्त संसार उससे व्याप्त है॥ १६ ॥

तद्ददाति च यो देव्यै पूर्णायै मुनिसत्तम।
सम्पूर्णजगतो दानफल सम्प्राप्नुयान्नर ॥ १७॥

सम्पूर्णकामो भूपृष्ठे विहरेन्मानवोत्तम ।
तस्य जन्म च सम्पूर्णं न पुनर्जायते क्वचित्॥ १८॥

तत्र यो भक्तिभावेन भस्माचलमय शिवम्।
पूजयेद्भस्मलिप्ताङ्गो बिल्वपत्रैर्महामते।
स याति परम मोक्ष भुक्त्वा भोग मनोरथम्॥ १९॥

रुद्राक्ष बिभृयान्नित्य शैव शाक्तोऽथ वैष्णव ।
युक्तस्तेन महापुण्य कृत्वा कर्म समश्नुते॥ २०॥

रुद्राक्षधारी सम्पूज्य रुद्र सहारकारकम्।
रुद्रत्व समवाप्नोति क्षेत्रेऽस्मिन्नात्र सशय ॥ २१॥

अमाया वा चतुर्दश्यामष्टम्या वा दिनक्षये।
नवम्या रजनीयोगे योजयेद्भैरवीमनुम्॥ २२॥

क्षेत्रेऽस्मिन्प्रयतो भूत्वा निर्भय साहस वहन्।
तस्य साक्षाद्भगवती प्रत्यक्ष जायते ध्रुवम्॥ २३॥

आत्मसरक्षणार्थाय मन्त्रससिद्ध्येऽपि च।
प्रपठेत्कवच देव्यास्ततो भीतिर्न जायते॥ २४॥

तस्मात्पूर्वं विधायैव रक्षा सावहितो नर ।
प्रजपेत्स्वेष्टमन्त्रस्तु निर्भीतो मुनिसत्तम॥ २५॥

नारद उवाच

कवच कीदृश देव्या महाभयनिवर्तकम्।
कामाख्यायास्तु तद्ब्रूहि साम्प्रत मे महेश्वर॥ २६॥

श्रीमहादेव उवाच

शृणुष्व परम गुह्य महाभयनिवर्तकम्।
कामाख्याया सुरश्रेष्ठ कवच सर्वमङ्गलम्॥ २७॥

यस्य स्मरणमात्रेण योगिनीडाकिनीगणा ।
राक्षस्यो विघ्नकारिण्यो याश्चान्या विघ्नकारिका ॥ २८॥

क्षुत्पिपासा तथा निद्रा तथान्ये ये च विघ्नदा ।
दूरादपि पलायन्ते कवचस्य प्रसादत ॥ २९॥

निर्भयो जायते मर्त्यस्तेजस्वी भैरवोपम ।
समासक्तमनाश्चापि जपहोमादिकर्मसु।
भवेच्च मन्त्रतन्त्राणा निर्विघ्नेन सुसिद्धये॥ ३०॥

मुनिश्रेष्ठ! जो व्यक्ति उस बिल्वपत्रको पूर्णा भगवती देवीको अर्पण करता है, उसे सम्पूर्ण संसारका दान करनेका फल प्राप्त होता है। वह उत्तम मनुष्य पूर्णकाम होकर पृथ्वीपर विचरण करता है। उसका यह जन्म कृतार्थ हो जाता है तथा कहीं पुनर्जन्म नहीं होता॥ १७-१८॥ महामते! भगवतीके उस शक्तिपीठमे शरीरमे भस्म लगाकर भक्तिपूर्वक जो व्यक्ति भस्माचलस्वरूप भगवान् शकरकी पूजा करता हे, वह मनचाहा भोग प्राप्त कर परम मोक्षको प्राप्त कर लेता है॥ १९॥ शैव, शाक्त तथा वैष्णवको सर्वदा रुद्राक्ष धारण किये रहना चाहिये। रुद्राक्षसे युक्त होकर जो व्यक्ति कर्म करता है, वह महापुण्य प्राप्त करता है॥ २०॥ भगवती कामाख्याके शक्तिपीठमे रुद्राक्ष धारण किया हुआ व्यक्ति सहारकारक भगवान् रुद्रकी पूजाकर रुद्रत्वको प्राप्त करता है, इसमे कोई सदेह नहीं है॥ २१॥ भगवती कामाख्याके शक्तिपीठमे अमावास्या, चतुर्दशी, अष्टमी अथवा तिथिक्षय होनेपर या नवमी तिथिकी रात्रिमे भगवती भैरवीका साहसपूर्वक जो जितेन्द्रिय व्यक्ति निर्भय होकर मन्त्र जपता है, उसे निश्चित ही भगवतीका प्रत्यक्ष दर्शन होता है॥ २२-२३॥ आत्मसरक्षा तथा मन्त्रसिद्धिके लिये जो व्यक्ति देवी भगवतीके कवचका पाठ करता हे उस व्यक्तिको कभी भय नहीं होता॥ २४॥ मुनिश्रेष्ठ! इसलिये पूर्वमे मनुष्यको रक्षाविधान करके निर्भीक होकर सावधानीपूर्वक अपने इष्ट-मन्त्रका जप करना चाहिये॥ २५॥

नारदजी बोले—महेश्वर! महाभयको दूर करनेवाला भगवती कामाख्याका कवच कैसा है, वह अब हमे बताय॥ २६॥

श्रीमहादेवजी बोले—सुरश्रेष्ठ! भगवती कामाख्याका परम गोपनीय, महाभयको दूर करनेवाला तथा सर्वमङ्गलदायक वह कवच सुनिये, जिसकी कृपा तथा स्मरणमात्रसे सभी योगिनी-डाकिनीगण, विघ्नकारी राक्षसियाँ तथा बाधा उत्पन्न करनेवाले अन्य उपद्रव, भूख, प्यास, निद्रा तथा अन्य विघ्नदायक दूरसे ही पलायन कर जाते हैं॥ २७—२९॥ [इस कवचके प्रभावसे] मनुष्य भयरहित, तेजस्वी तथा भैरवतुल्य हो जाता हे। जप, होम आदि कर्मोंमें समासक्त मनवाले भक्तकी मन्त्र-तन्त्रोंमे सिद्धि निर्विघ्न हो जाती है॥ ३०॥

[कामाख्या-कवच]

ओ प्राच्या रक्षतु मे तारा कामरूपनिवासिनी।
आग्नेय्या षोडशी पातु याम्या धूमावती स्वयम्॥ ३१॥

नैर्ऋत्या भैरवी पातु वारुण्या भुवनेश्वरी।
वायव्या सतत पातु छिन्नमस्ता महेश्वरी॥ ३२॥

कौबेर्या पातु मे देवी श्रीविद्या बगलामुखी।
ऐशान्या पातु मे नित्य महात्रिपुरसुन्दरी॥ ३३॥

ऊर्ध्व रक्षतु मे विद्या मातङ्गी पीठवासिनी।
सर्वत पातु मे नित्य कामाख्या कालिका स्वयम्॥ ३४॥

ब्रह्मरूपा महाविद्या सर्वविद्यामयी स्वयम्।
शीर्षे रक्षतु मे दुर्गा भाल श्रीभवगेहिनी॥ ३५॥

त्रिपुरा भ्रूयुगे पातु शर्वाणी पातु नासिकाम्।
चक्षुषी चण्डिका पातु श्रोत्रे नीलसरस्वती॥ ३६॥

मुख सौम्यमुखी पातु ग्रीवा रक्षतु पार्वती।
जिह्वा रक्षतु मे देवी जिह्वाललनभीषणा॥ ३७॥

वाग्देवी वदन पातु वक्ष पातु महेश्वरी।
बाहू महाभुजा पातु कराङ्गुली सुरेश्वरी॥ ३८॥

पृष्ठत पातु भीमास्या कट्या देवी दिगम्बरी।
उदर पातु मे नित्य महाविद्या महोदरी॥ ३९॥

उग्रतारा महादेवी जङ्घोरू परिरक्षतु।
गुद मुष्क च मेढ्र च नाभि च सुरसुन्दरी॥ ४०॥

पादाङ्गुली सदा पातु भवानी त्रिदशेश्वरी।
रक्तमासास्थिमज्जादीन्पातु देवी शवासना॥ ४१॥

महाभयेषु घोरेषु महाभयनिवारिणी।
पातु देवी महामाया कामाख्यापीठवासिनी॥ ४२॥

भस्माचलगता दिव्यसिहासनकृताश्रया।
पातु श्रीकालिकादेवी सर्वोत्पातेषु सर्वदा॥ ४३॥

रक्षाहीन तु यत्स्थान कवचेनापि वर्जितम्।
तत्सर्वं सर्वदा पातु सर्वरक्षणकारिणी॥ ४४॥

इद तु परम गुह्य कवच मुनिसत्तम।
कामाख्याया मयोक्त ते सर्वरक्षाकर परम्॥ ४५॥

[कामाख्या-कवच]

कामरूपम निवास करनेवाली भगवती तारा पूर्व दिशामे, षोडशीदेवी अग्निकोणम तथा स्वय धूमावती दक्षिण दिशामे रक्षा करे॥ ३१॥ नैर्ऋत्यकोणम भैरवी पश्चिम दिशामे भुवनेश्वरी और वायव्यकोणमे भगवती महेश्वरी छिन्नमस्ता निरन्तर मेरी रक्षा करे॥ ३२॥ उत्तर दिशामे श्रीविद्या देवी बगलामुखी तथा ईशानकोणमें महात्रिपुरसुन्दरी सदा मेरी रक्षा कर॥ ३३॥ भगवती कामाख्याके शक्तिपीठमे निवास करनेवाली मातङ्गी विद्या ऊर्ध्वभागमे और भगवती कालिका कामाख्या स्वय सर्वत्र मेरी नित्य रक्षा करे॥ ३४॥ ब्रह्मरूपा महाविद्या सर्वविद्यामयी स्वय दुर्गा सिरकी रक्षा करें और भगवती श्रीभवगेहिनी मेरे ललाटकी रक्षा कर॥ ३५॥ त्रिपुरा दोनो भौंहोंकी, शर्वाणी नासिकाकी, देवी चण्डिका आँखोंकी तथा नीलसरस्वती दोनों कानोंकी रक्षा करें॥ ३६॥

भगवती सौम्यमुखी मुखकी, देवी पार्वती ग्रीवाकी और जिह्वाललनभीषणा देवी मेरी जिह्वाकी रक्षा करें॥ ३७॥ वाग्देवी वदनकी, भगवती महेश्वरी वक्ष स्थलकी, महाभुजा दोना बाहुकी तथा सुरेश्वरी हाथकी अङ्गुलियोकी रक्षा करे॥ ३८॥ भीमास्या पृष्ठभागकी, भगवती दिगम्बरी कटिप्रदेशकी और महाविद्या महोदरी सर्वदा मेरे उदरकी रक्षा करे॥ ३९॥ महादेवी उग्रतारा जङ्घा और ऊरुओकी एव सुरसुन्दरी गुदा, अण्डकोश, लिङ्ग तथा नाभिकी रक्षा करें॥ ४०॥ भवानी त्रिदशेश्वरी सदा पैरकी अङ्गुलियोंकी रक्षा करे और देवी शवासना रक्त, मास, अस्थि, मज्जा आदिकी रक्षा करें॥ ४१॥ भगवती कामाख्याके शक्तिपीठमें निवास करनेवाली, महाभयका निवारण करनेवाली देवी महामाया भयकर महाभयसे रक्षा करें॥ ४२॥ भस्माचलपर स्थित दिव्य सिहासनपर विराजमान रहनेवाली श्रीकालिकादेवी सदा सभी प्रकारके विघ्नासे रक्षा करे॥ ४३॥ जो स्थान कवचमें नहीं कहा गया है, अतएव रक्षासे रहित है उन सबकी रक्षा सर्वदा भगवती सर्वरक्षणकारिणी कर॥ ४४॥

मुनिश्रेष्ठ! मेरे द्वारा आपसे कहा गया सभी प्रकारकी रक्षा करनेवाला भगवती कामाख्याका जो यह उत्तम कवच है, वह अत्यन्त गोपनीय एव श्रेष्ठ है॥ ४५॥

अनेन कृत्वा रक्षा तु निर्भय साधको भवेत्।
न त स्पृशेद्भय घोर मन्त्रसिद्धिविरोधकम्॥ ४६॥

जायते च मन सिद्धिर्निर्विघ्नेन महामते।
इद यो धारयेत्कण्ठे बाहौ वा कवच महत्॥ ४७॥

अव्याहताज्ञ स भवेत्सर्वविद्याविशारद ।
सर्वत्र लभत सौख्य मङ्गल तु दिने दिन॥ ४८॥

य पठेत्प्रयतो भूत्वा कवच चेदमद्भुतम्।
स देव्या पदवीं याति सत्य सत्य न सशय ॥ ४९॥

इस कवचसे रक्षित होकर साधक निर्भय हो जाता है। मन्त्रसिद्धिका विरोध करनेवाले भयकर भय उसका कभी स्पर्शतक नहीं करते ह॥ ४६॥ महामते! जो व्यक्ति इस महान् कवचको कण्ठमे अथवा बाहुमे धारण करता है, उसे निर्विघ्न मनोवाञ्छित सिद्धि मिलती है॥ ४७॥ वह अमोघ आज्ञावाला होकर सभी विद्याओमे प्रवीण हो जाता हे तथा सभी जगह दिनानुदिन मङ्गल और सुख प्राप्त करता है॥ ४८॥ जो जितेन्द्रिय व्यक्ति इस अद्भुत कवचका पाठ करता है, वह भगवतीके दिव्य धामको जाता है, यह सत्य है, सत्य है, इसमे सशय नहीं है॥ ४९॥

॥ इति श्रीमहाभागवते महापुराणे श्रीमहादेवनारदसवादे श्रीमहाकामाख्याकवचवर्णन नाम सप्तसप्ततितमोऽध्याय ॥ ७७॥

॥ इस प्रकार महाभागवत महापुराणके अन्तर्गत श्रीमहादेव-नारद-सवादमे 'श्रीमहाकामाख्याकवचवर्णन' नामक सतहत्तरवाँ अध्याय पूर्ण हुआ॥ ७७॥

अठहत्तरवाँ अध्याय

कामाख्यादेवी तथा सदाशिव भगवान् शकरकी उपासनाका विशेष महत्त्व, बिल्वपत्र तथा बिल्ववृक्षकी महिमा एव कामाख्यापीठका माहात्म्य

श्रीमहादेव उवाच

वैशाखस्य तृतीयाया तत्र सम्पूज्य चण्डिकाम्।
यो जपेत्परम मन्त्र तस्य कोटिगुणोत्तरम्॥ १॥

जायते सुमहत्पुण्य न पुनर्जन्म विद्यते।
शिवरात्रिचतुर्दश्या रात्रौ सम्पूज्य शकरम्॥ २॥

सर्वतीर्थमये तस्मिन्क्षेत्रे देवादिदुर्लभे।
उपोष्य नियतो भूत्वा प्रहरे प्रहरे नर ॥ ३॥

पूजयेत्परया भक्त्या मा सदा तत्र सस्थित ।
प्राप्नोति स महापुण्य वाजिमेधशतोद्भवम्॥ ४॥

अन्यच्च यन्महापुण्य स्नानदानादिसम्भवम्।
काश्या तत्र दिने चापि पूजन यत्फल तथा॥ ५॥

श्रीमहादेवजी बोले—वहाँ [भगवती कामाख्याके शक्तिपीठमे] जो व्यक्ति वैशाखकी तृतीया तिथिको भगवती चण्डिकाकी पूजा करके उनके श्रेष्ठ मन्त्रका जप करता है उसको करोडो गुणा अधिक पुण्य प्राप्त होता हे तथा उसका पुनर्जन्म नहीं होता॥ १-१½ ॥ चतुर्दशी तिथिको शिवरात्रिके दिन रात्रिमे मुझ शकरकी पूजा करके देवताओके लिये भी दुर्लभ सर्वतीर्थस्वरूप भगवती कामाख्याके उस शक्तिपीठमें उपवास करके सावधान होकर मनुष्याको प्रत्येक प्रहरमे सदा वहाँ स्थित रहकर परम भक्तिपूर्वक [देवीकी] पूजा करनी चाहिये [ऐसा करनेसे] वह सैकडों अश्वमेधयज्ञ करनेके समान महापुण्य प्राप्त करता है और काशीम स्नान-दानादि-जन्य जो फल प्राप्त होता है, वह कामाख्यापीठम शिवरात्रिके पूजनमे प्राप्त हो जाता है॥ २—५॥

गवा कोटिसहस्त्राणा कुरुक्षेत्रे प्रदानत ।
यत्फल जायते तस्मादधिक मुनिसत्तम॥ ६ ॥

एक मे विल्वपत्र य प्रदद्याद्भक्तिभावत ।
स याति परमा मुक्ति सत्य सत्य न सशय ॥ ७ ॥

स्वर्णपुष्पसहस्त्रैश्च मणिमाणिक्यसचयै ।
अनर्घ्यरत्नैरभ्यर्चा न तथा प्रीतिकारिका॥ ८ ॥

यथा प्रीतिकर बिल्वपत्र मम महामुने।
बिल्वमूले प्रपूज्याथ शकर लोकशकरम्॥ ९ ॥

सुरश्रेष्ठत्वमाप्नोति न ततो विच्युतिर्भवेत्।
बिल्वमूले वसेत्तीर्थं सर्वश्रेष्ठतम परम्।
तत्र सम्पूजन शम्भोर्महापातकनाशनम्॥ १० ॥

ब्रह्मरूपी स्वय रुद्र सर्वलोकहिताय वै।
पृथिव्या सस्थित साक्षात्सर्वलोकेश्वरेश्वर ॥ ११ ॥

अत पुण्यतम स्थान महापातकनाशनम्।
बिल्वमूल मुनिश्रेष्ठ सर्वतीर्थान्महत्तरम्॥ १२ ॥

गङ्गा काशी गयातीर्थं प्रयागश्च महामते।
कुरुक्षेत्र च यमुना तथैव च सरस्वती॥ १३ ॥

गोदावरी नर्मदा च तथान्यत्तीर्थमुत्तमम्।
सदा सन्निहित ज्ञेय बिल्वमूलेषु नारद॥ १४॥

तत्र यत्क्रियते कर्म दैव पैत्र विधानत ।
तदक्षयतम ज्ञेय कोटिजन्मसु निश्चितम्॥ १५ ॥

यस्तु बिल्वतरोर्मूले दह त्यजति मानव ।
स याति परम सौख्य पद ब्रह्मादिदुर्लभम्॥ १६ ॥

एव पुण्यतमो यस्माद्बिल्ववृक्ष परात्पर ।
शम्भो प्रीतिकरो नित्य तस्मात्तस्य त्रिपत्रिकै ॥ १७॥

पूजयित्वा महेशान मुच्यते भवबन्धनात्।
फल तस्य तथा शम्भो परमाह्लाददायकम्॥ १८॥

दत्त्वा तस्मै नर सद्यो महापुण्य समश्नुते।

मुनिश्रेष्ठ! कुरुक्षेत्रमे करोडो गायोका दान करनेसे जो फल होता हे, उससे अधिक फल उसे प्राप्त हो जाता हे॥ ६॥ भक्तिपूर्वक जो व्यक्ति मुझे एक बिल्वपत्र प्रदान करता है, वह उत्तम मुक्तिको प्राप्त करता है। यह सत्य है, सत्य हे, इसमे कोई सदेह नहीं है॥ ७॥

महामुने! हजारो स्वर्ण-पुष्पोके अर्पण करनेसे, मणिमाणिक्यके समूहोका अर्पण करनेसे तथा मूल्यवान् रत्नोके द्वारा पूजा करनसे मुझे वैसी प्रसन्नता नहीं होती जैसी बिल्वपत्र चढानेसे होती है। बिल्ववृक्षके नीचे लोककल्याणकारी भगवान् शकरकी पूजा करके मनुष्य श्रेष्ठ सुरत्व प्राप्त करता हे और उससे उसका वियोग नहीं होता॥ ८-९½ ॥ बिल्ववृक्षके मूलमे उत्तमोत्तम तीर्थोंका वास होता है। वहाँ भगवान् शकरकी पूजा करनेसे महापातकका नाश होता है॥ १०॥

सभी लोकोके कल्याणके लिये सर्वलोकेश्वरेश्वर ब्रह्मरूप साक्षात् रुद्र [बिल्व-वृक्षके रूपमें] पृथ्वीपर प्रतिष्ठित हैं॥ ११ ॥ मुनिश्रेष्ठ! इसलिये बिल्ववृक्षका मूल महापातकका नाश करनेवाला तथा सभी तीर्थोसे उत्तम है॥ १२॥ महामते नारद! गङ्गा, काशी, गयातीर्थ, प्रयाग, कुरुक्षेत्र, यमुना, सरस्वती, गोदावरी, नर्मदा तथा अन्य उत्तम तीर्थ सदा बिल्ववृक्षके मूलमे सन्निहित रहते हैं—ऐसा जानना चाहिये। वहाँ जो देव तथा पितृकर्म विधानपूर्वक किया जाता हे, वह निश्चित ही करोडो जन्मोतक अक्षय रहता है, ऐसा जानना चाहिय॥ १३—१५॥

जो मनुष्य बिल्ववृक्षके नीचे देह-त्याग करता है, वह परम आनन्द तथा ब्रह्मादि देवताओके लिय भी दुर्लभ पद प्राप्त करता है॥ १६॥ यह बिल्ववृक्ष पुण्यतम श्रेष्ठतम तथा भगवान् शकरके लिये सदा प्रीतिकारक है, इसलिये तीन पत्तावाले बिल्वपत्रसे भगवान् शकरकी पूजा करके मनुष्य ससारके बन्धनोसे मुक्त हो जाता है। बिल्व-फल भगवान् शकरके लिय परम आनन्ददायक है जिसे समर्पित कर मनुष्य सद्य महापुण्य प्राप्त कर लेता है॥ १७-१८½ ॥

अन्यत्र यत्र कुत्रापि बिल्वपत्रादिकं मुने॥ १९॥
महाप्रीतिकरं ज्ञेयं कामरूपे विशेषतः।
अन्यत्ते किं मुने वक्ष्ये कामाख्यातीर्थतः क्वचित्॥ २०॥
नापरं विद्यते स्थानं महापुण्यफलप्रदम्।
चैत्रे मासि सिताष्टम्यां सर्वतीर्थमये शुभे॥ २१॥
लोहित्ये विधिवत्स्नात्वा तत्तोयैर्जगदम्बिकाम्।
पूजयेत्तत्र यो भक्त्या स मुक्तो भवबन्धनात्॥ २२॥
सर्वतीर्थमयं स्थानं सर्वतीर्थाधिकं परम्।
योनिपीठं महादेव्याः सर्वदेवसुदुर्लभम्॥ २३॥
सर्वदेवमयी पूर्णा यत्र पूज्यतमा स्वयम्।
सर्वतीर्थमयं पुण्यं लौहित्यं च सुदुर्लभम्॥ २४॥
अष्टमी च महापुण्या तिथिः परमदुर्लभा।
एतेषां संगतिर्यस्य बहुपुण्यवशेन वै।
तस्य भूयः क्षितौ जन्मशङ्कैव हि न विद्यते॥ २५॥
तत्र यस्तर्पयेद्भक्त्या पितॄन् लौहित्यवारिणा।
तस्य ते पितरो यान्ति ब्रह्मलोकमनामयम्॥ २६॥
अन्यच्चापि तपो दानं तत्र पुण्यफलप्रदम्।
